॥ ॥इति श्रीमच्छारीरकमीमांसा महाभाष्य॥ ॥ ॥ ॥ ॥

॥ ॥स्य पंचपादिका विवरणस्य व्याख्यान तत्वदीपन प्रारंभः॥ ॥

तत्व० १ श्रीगणेशायनमः॥ पदवाधसमुद्धृतंयद्बोधांत्मविलीपतोनामनूपात्मकंविश्ववृत्तस्मैपूर्णात्मनेनमः॥१॥ जटाजू
टंविभ्रक्व चिदपरभागेधृतवच्चस्तथैकस्मिन्नागेभस्तिनमपरत्रामवुसूणः॥ फणींद्रंकस्मिंश्चिन्मणिगण
धरोन्यत्रभगवान्गिरीशश्रेयोनःप्रदिशतुशिवामिश्रित्तवपुः॥२॥ दिक्कुलंकषकीर्त्तिफेनविशदप्रोद्दाम
विघाजलभ्राम्यद्दाग्भ्रधतुगमंगविलसत्तीर्थप्रभेदास्पदंवादिव्रातकथाप्रसंगविसरत्तर्कोर्मिसासेद्धलं
वंदेसर्वमुनींद्रसेव्यमनिशंश्रीबोधपृथ्वीधरं। वादिवारणसंदोहप्रभंजनविशारदं॥ श्रीमदानंदशैलाद्धपंचा
स्यंसततंभजे॥४॥ विमलमदजलौघघोतमानोरुगंडस्थलनिकटनिकुंजभ्राजमानालिमालः॥ जयतिपृथु राम० २
लकुंडावद्धमालेंद्रनीलावलिरिवसुरासिद्धाराधितोविघ्नराजः॥५॥ आधारपंकेरुहमध्यसंस्थामृणालसू

त्राकृतिरप्रमेया॥ शीर्षोदिभेदर्च्छितसर्ववर्णाजिह्वांगणेनृत्यतुवागजस्रं॥६॥ नानाविधनिवंधाद्धिप्रसूनरसमा
दराद॥ निवंधमधुसंगृह्यक्रियतेतत्त्वदीपनं॥७॥ पंचमादिकांव्याचिख्यासुर्ग्रंथकरणयोग्यतार्थंपरदेववेतांप्रा
र्थयतेआद्यश्लोके नायमवेषवृणुतेतेनलभ्यइतिईश्वराधीनत्वंविद्यायालक्ष्यते। विदुषश्च ग्रंथकरणाधिकारात्परदे
वताप्रार्थनमुचितं। अत्रैषाक्षरयोजनासतेमह इतिसंवंधः। ननुकिंनमस्कार्यंसद्वेतनंवेननंवा। आद्येननमस्का
र्यत्राघटादिवत्। द्वितियेपिकिंजीवासाउतब्रह्मप्रथमेकिंनमस्कर्त्तुरतत्यत्। उतान्यत्। नाद्यः। नमस्कर्तृनम
स्कार्यभावस्यैकस्मिन्नयोगात्। द्वितियेपिकिंतात्विकमुतातात्विकं। आद्येद्वैतक्षतिः। अंत्येनसच्छब्दःस्यात्।
सच्छब्दंब्रह्मेतिपक्षेतस्यपूर्णत्वात् ननमस्कर्तृनमस्कार्यतेत्यांशंक्याकारणताक्रांतंब्रह्मनमस्कार्यमितिसाहपाल

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

नइति। जगत्स्थितसंहारपालनजन्मलयैः संबध्यते। पालनउद्देश्यसञ्जीत्यर्थः। विमलंरजस्तमोभ्यामनभिभूतयत्स
तत्व० २ त्वंतस्मिन्स्वप्नवृत्तिर्वर्तनप्रतिबिंबितायस्यतद्विमलसत्त्ववृत्तितस्मिन्रजस्तमसोरपिभावोन्नसत्त्वोपाधीकंपालयितृत्वं
इतिशंकांनिराकर्तुंविमलेतिविशेषणंरजस्तमसोरभिभूतत्वात्सत्त्वस्योद्भूतत्वात्तदुपाधेः पालनहेतुत्वमुचितमित्य
र्थः उत्तरत्राप्यनभिभूतत्वंद्रष्टव्यं। विमलंचतत्सत्त्वंचेतिविमलसत्त्वंतस्यवृत्तिः परिणामोयस्यतद्विमलसत्त्ववृत्तितस्मिन्
स्मिन्इतिवाविग्रहः। इदमिदानींपालयितव्यमित्येवमाकारः सत्त्वस्यपरिणामभेदः कदाचिदुदेतितस्मिन्प्रतिबिं
बितंचैतन्यंपालकंतदभिप्रेत्यवृत्तिशब्दप्रयोगइतितर्हिब्रह्मपालकमस्तुविधिनुद्रौस्रष्टृसंहर्तारौवितिपुणप्रक्रि राम०
यामाशंक्यतयोःकार्यत्वेननिखिलसर्जनसंहरणसामर्थ्याभावादरजस्तमोभ्यामुपहितंब्रह्मस्रष्टृसंह २

र्तृचेत्याह। जन्मेत्यारभ्यजगतइत्यंतेनेन। नवक्रमेपदद्वैयर्थ्यंजगतः सत्तासमवायसंबंधलक्षणाजन्मघटकव्यापारस्य
विवक्षितत्वात्। सकर्तृकत्वद्योतनार्थत्वाद्वेतिद्रष्टव्यं। नचगुणोपहितब्रह्मकारणत्वेविद्योपहितस्यकारणत्वप्रति
पादकश्रुत्यादिविरोधइतिशंक्यं। देवात्मशक्तिंस्वगुणैर्निगूढामित्यादिवाक्याद्देवाविद्यायांसत्त्वाद्यात्मकत्वप्र
तिपत्तेःसत्त्वाद्युपहितकारणत्वोक्त्याविद्यावतःकारणत्वस्यविवक्षितत्वादित्यर्थः। सर्वकर्मेत्यादिश्रुतेःकारण
रूपंतात्त्विकमित्याशंक्यतामप्युपलिंगानुगृहीता। निर्विशेषवस्तुप्रतिपादकवेदवचनविरोधान्नैवमित्याह। परा
क्तेतिपराक्तंद्वैतजालंवपुर्यस्मिन्तत्परावृत्तद्वैतजालवपुस्तस्मै। अथवापरा॰क्तंद्वैतजालंवपूरूपंपरस्य
एवंविधस्यतत्तथोक्तोषष्ठीबहुव्रीह्यभेदाभिप्रायेणद्रष्टव्या। परानुग्रहहेतुविविधसत्त्वविद्यांश्रुतरूपेणप्रसा

तत्व० २

रयितुंवाग्देवतांप्रार्थयतोयस्याइति।सरस्वतिनः समग्रवरदैवभूयादितिसंबंधः।तस्याः समग्रवरदत्वंकुतइ
त्याशंक्यप्रसिद्धिरित्याह।यस्याइति।जगद्गुरूणांवाचस्पतिपुरोगाणामपिवावोयस्याःप्रसादमवलंव्यासवलद्ध
दुगुणाः प्रसरंतीतिसंबंधोसवलं।तावद्भवोगुणायासुताःअसवलंसत्त्वतावहुगुणाश्चेतिवा।केतेगुणाः।श्लेषः
प्रसादः समतामाधुर्यसुकुमारतार्थव्यक्तिस्तथाकांतिरुदारत्वमुदात्तता।ओजिसमोजओर्जिसंप्रेयानथ
सुशब्दता।प्रौढिः समाधिः सौक्ष्म्यंचगांभीर्यमथविस्तरः संक्षेपः संमितत्वंचभाविकत्वंगतिस्तथा।रीतिरुक्तिस्त
थाप्रीतिरितिषट्त्रिंशतिः स्मृताः।अत्रयुक्तिमाहावेदेतिविदाश्ववशास्त्राणीचेतिवेदशास्त्राणीतैःपरिनि
मितोवंधोदेहोयस्याभातथोक्ता।सरस्वत्यावागभिमानिदेवतात्वात्तासांतदधीनत्वंधुक्तमित्यर्थः।अयं

राम० २

सिवहुविघ्नानिभवंतिमहतामपित्यादिवचनादाध्यात्मिकाद्यनेकोपद्रवप्रतिपत्तेस्तन्निरासार्थंगणेशंप्रार्थय
तेविघ्नेति।गणेशमेवोमदीयफलस्यवीजममोघंयथास्यात्तथाकुर्वित्यन्वयः।मेघसारूप्यमाहविघ्नेतिप्रवृद्धमस्तु
अहवर्षय।तैःविघ्नाभितापमयदृत्समदीयफलस्यवीजंसिंचन्नितिसंबंधःप्रवृद्धश्चासौमदनुग्रहश्चेतिप्रवृद्धमदनुग्रहः
तदवर्षाणितपातैःप्रसिद्धोदिमेघोवर्षपातेनतापंनिरस्यवीजमंकुरयतिअयमप्यनुग्रहाख्यवृष्ट्याध्यात्मिका
दितापनिरासनमदीयफलस्यवीजमंकुरयत्वित्यर्थः।सितत्तरोपितिप्रसिद्धमेघादतिशयमाह।नील।नीरदोक्ति
प्तिंकुर्वन्नलंकुरयति।अयंतुसिततरोपीत्यतिशयः।अभिप्रा फलमितिअनर्थनिवृत्त्यादिफलमितियावत्।अमो
घमितिअविघ्नपरिसमाप्त्यादिप्रयोजनमित्यर्थः।व्याख्येयटीकामूलभाष्यसूत्रार्थस्फूर्तिर्थतल्लतीरः संमारा

ध्याः।तत्रप्रथमंसूत्रकृतंप्रणमतिश्यामइतिविज्ञानंयज्ञंतनुतइत्यादिवचनादंतःकरणानिकर्तॄणिप्रतियंतेतयो
तत्व० ४ गाद्वत्वंपदार्थस्यकर्तृत्वंससमानःसन्नुभौलोकावनुसंचरतिध्यायतीवलेलायतीवेतिश्रुतेःतस्मादंतःकरणनमस्क
र्तृत्वनिर्देशेनस्वस्यतत्रिर्दिष्टंस्यात्ततश्चनमतइत्युक्तिर्युक्तेत्यर्थः।व्यासस्यनमस्कार्यत्वेहेतुमाह।जगत्यपूर्वभानु
मिति।अपूर्वत्वमाहश्यामइति।प्रसिद्धस्त्वरुणाः।अयंतुश्यामइत्यपूर्वत्वमित्यर्थः।विधांतरेणापूर्वत्वमाह।श्र
तीति।श्रुतयएवकमलानिश्रुतिकमलानितेषामवबोधेरागोयस्यसतथा।भानुस्तुरक्तःसकमलविकसनहेतुः
अयंतुश्यामोपिश्रुतिशाखिलासम्यीबधारणहेतुरित्यर्थः।वैधर्म्यांतरमाह।शांतइतिरविनुग्रःसतुबाह्यंतम
सांसंदोहंसंदुनोति।अयंतुशांतएवअज्ञानलक्षणंतमोददहतीत्यर्थः।वैधर्म्यांतरमाहनीनूपमिति।प्रसिद्धः राम० ४

स्तुकिरणसहस्रैर्विशेषवत्प्रथयतिअयंतुपुनर्निर्विशेषंब्रह्मलोयतिषमदकदंवकेभासपातीत्यर्थः।संप्रतिपुरुषोत्तमसाध
र्म्येदर्शयन्शंकराचार्यप्रणमति।उद्धृत्येति।तंशंकरंनमामीतिनमस्कार्यत्वमुक्तं।तत्रहेतुमाह।उद्धृत्येति।वेदपयसोब्धेर्वि
द्यामुद्रूपमःसर्वस्मैप्रादात्तंनमामीतिसंबंधः।वेदाएवपयांसियस्यसवेदपयाः।तस्मादित्यर्थः।अत्रोपनिषदांपयस्थानत्वं
कार्मब्रह्मविषयवेदवाक्यसमुदायस्याब्धिस्थानाचमितिद्रष्टव्यं।कामिवेसत्राह।कमलामिति।नारायणोहिक्षीरांबुधेरि
दिरामुद्धृत्यसर्वस्मैप्रादात्।तथायमपीत्यर्थः।विद्यायाःकमलासाधर्म्यमाह।आलिंगितेति।अखिलस्यजगतःप्रभवोय
स्मात्सोखिलजगत्प्रभवः।तस्यैकाद्वितीयामूर्तिरालिंगितापयासातथोक्तां।कमलाखलुनारायणगात्रमेवालिंग्य
अवस्थितातद्वद्विद्यापिब्रह्मैकमूर्तिविषयीकृत्यैवावस्थितेत्यर्थः।साधर्म्यांतरमाह।शेषेतिकनकांकुरक्षेत्रादिसंपादने

तत्व० ५ न्नकमलाय यथा सुखदा तथा विद्याप्यविद्यापनयनेनानंदात्मानं व्यनक्तीत्यर्थः। केन द्वारेण विद्यादातृत्वमित्याशंक्य भाष्यद्वा
रेणेत्याह विमलेति शब्दतोर्थतश्च निरवद्यभाष्यकर्तारमित्यक्षरार्थः। संप्रति स्वगुरुं नमस्करोति। वंदइति। तस्यात्मनो वि
शेषाभावादनमस्कार्यत्वमित्याशंक्याह। यइति। अनन्यश्चासावनुभवश्चेति विग्रहः। अनन्यानुभवत्वं जीवादिवत्ना
ममात्रं ब्रह्मरूपतया अनन्यानुभवत्वमस्माकमप्यस्तीत्याशंक्याह। अर्थतोपीति। अर्थतोनन्यानुभवत्वमस्माकमप्यस्ती
तियदुक्तं तत्राह। आत्मेति। आत्मसंबुद्धतया स्वप्रकाशतया स्फुरद्ब्रह्मत्वविषयो बोधो यस्य स तथोक्तः। तस्मादित्यर्थः।
घटादिनामिवान्याधीनं स्फुरणमिति शंकां निराकर्तुमात्मसंबुद्धेति विशेषणं। आत्मना वासौ संबुद्धश्चेत्यात्मसंबुद्धः। त
स्य स्फुरद्ब्रह्मत्वेनावबोध्यादिनिवा स्वयंप्रकाशत्वेन सदा ज्ञातः प्रसिद्धः। ब्रह्मापि तादृशमिति अभेदयोग्यत्वमिति ततश्च राम० ५

त्वपि नुं संबुद्धस्फुरदिति विशेषणं। अयमर्थः। यद्यप्यस्माकमनन्यानुभवत्वं तथाप्यविद्यापिहितत्वात्तनतया यथावद्ब्रह्म
न प्रथते गुरोस्तु करतलाकलितामलकवत्साक्षात्कृतब्रह्मतत्त्वतया अविद्यातत्कार्यनिवृत्तेरिति विशेषइति। संप्रति चिकी
र्षितं प्रतिजानीते प्रकाशात्मेति। प्रकाशात्मा यतिरहं यं च पादिकं व्याख्यास्य इति संबंधः। यथा ग्रामो दग्ध इत्यादिव्यपदेश
एकदेशदाहे पि तद्वदेकदेशस्य व्याविख्यासितत्वे पि पंचपादिकेति व्यपदेशो घटत इत्यर्थः। व्याख्यानयोग्यतामाह।
यथेति। श्रुतमनेनेति श्रुतस्येत्यर्थः। न श्रवणमेव केवलं अपि तूहापोहकृतेन तत्त्वमपीत्याह। यथाशक्तीति न व्याख्यास्येकदेशेन
व्याख्यानमित्याह। प्राप्तेति। शंप्यकशास्त्रावाप्तौ भ्यां प्राप्ता या विद्या या असम्यक्त्व भ्रमादिकं निराकर्तुं ब्रह्मविज्ञाकप
रमसुशोधनेच्छये त्यर्थः। कृतमपि व्याख्यानं रागद्वेषदूषितत्वात्तेनोपाददते लतश्च न विद्याशुद्धिरित्याशंक्याह किं केन चित्रा

त.त्व० ६

पादइतेउत सर्वपि।आद्येनविरोधइत्याह। विदितेति।तर्हिविफलमेतत्स्यादित्याशंक्याह।इतिविफलेति।इतिशब्दः
प्रशंसाभावपरामर्शीप्रशंसाभावाद्विफलसमत्वमित्यर्थः।प्रशंसाभावेपिमतिवैफल्यंसेत्स्यतीत्यभिसंधिः।ननुक
थंतदपिसिध्येत्।नकेश्चिदनादृतत्वादित्याशंक्येष्यारहितैरादृतत्वात्सिध्यतीत्याह।क्षंतुमिति।निर्मत्सरत्वंसत्वदार्थः
एतेनद्वितियोपिकल्पोनिरस्तः।अनाद्यांनदेत्यत्रमंगलाचरणंसंपादितंतदयुक्तंप्रमाणफलविधुरत्वात्।नचशिष्टा
चारःप्रमाणंविकल्पासहत्वात्।सकिंस्वतःप्रमाणंउतवेदमूलत्वेन।नाद्यःप्रत्यक्षाधन्यतमत्वाभावादतिरिक्तमानस्य
चाप्रसिद्धेः।नद्वितियः।तदसिद्धेः।तत्रशिष्टाचारएववेदमूलताकल्पकः।किमाचारत्वाद्वेदमूलतांकल्पयति।उतधर्मत्वा राम० ६
त्।नाद्यः।निष्ठीवनादेरपितत्कल्पकत्वप्रसक्तेः।नांत्यधर्मत्वसिद्धौवेदमूलत्वताकल्पकः।किमाचारत्वाद्वेदमूलतांक

ल्पयति।प्रसक्तेः।नान्त्यधर्मत्वसिद्धौवेदमूलताकल्पकत्वेवेदमूलत्वेवधर्मत्वमितीतरेतराश्रयत्वात्।नापिफलंपश्यामः
किंशिष्टाचारंपरिपालनंफलंआहोविघ्ननिरासः।नाद्यःतस्यकिंचित्करत्वात्।नद्वितीयः।उपस्थितविघ्नविनाशेथागा
मिनोनिवर्तयितुमशक्यत्वादित्याशंक्याह।प्रारिप्सितेति।नतावदत्रप्रमाणाभावबोध्यवदमूलशिष्टाचारस्यप्रमा
णत्वात्।तत्वतस्यवेदमूलत्वासिद्धिः।शिष्टैर्धर्मबुध्यानुष्ठीयमानाचारस्यतत्कल्पकत्वात्।नापिशिष्टासिद्धिः।वैदिका
र्थानुष्ठातृणांशिष्टत्वादित्यभिसंधायवशाद्वप्रयोगः।नापिफलासंभवः।अविघ्नपरिसमाप्तिप्रचयगमनशि
ष्टाचारपरिपालनानांफलत्वात्।नचागामिनिवृत्त्यसंभवान्नविघ्नाभावःफलमितिशंक्यं।आगामिनिविघ्ने
पितत्प्रागभावपरीपालनस्यफलत्वात्।वर्त्तमानेतुध्वंसएव।तस्मात्प्रमाणफलवत्वात्मंगलाचरणमनुष्ठेयमित्य

र्थः । अविघ्नपरिसमाप्तेप्रचयगमनयोर्दृष्टफलत्वसाम्यात्समस्य वचनमितरस्यादृष्टफलत्वात्पृथक्कथनं । अतएव
तत्व० ७ तस्याः किंचित्करत्वं निरस्तं प्रमाणफलवाञ्चेद्देवतागुरुनमस्कारस्तर्हि याकाचिद्देवतानमस्क्रियतामिति तत्राह । अभि
लषितेति समाराधितायाः अभिलषितदेवताया एव फलहेतुत्वप्रसिद्धेस्तत्समाराधनमुचितमित्यर्थः । तथाप्यानादीसा
दिविशेषणवैयर्थ्यं तत्राह । पूजेति । गुणागणकीर्त्तनं पूजा सत्कृतौ सत्यां नृपादिषु प्रीत्युत्कर्षदृष्टेः सोचितेत्यर्थः । तथापि अ
न्मब्रह्मणोरैक्यं कस्मान्निर्दिष्टमित्याशंक्य विषयत्वात्तस्य निर्देश इत्याह शास्त्रार्थ इति । तथापि ग्रंथ एव नमस्कारः क
स्मान्निर्दिष्ट इत्यैदिति शंकां निरस्यति शास्त्रेति । प्रत्यग्ब्रह्मणोरेकत्वं वेत्तर्द्धिकिमिति न प्रथा । तदन्याशंक्य पदार्थबुद्ध्यम राम० ७
वादप्रथनमित्याह तत्त्वमिति । सकलशास्त्रार्थस्यैकेन पद्येन प्रदर्शनमशक्यमित्याशंक्याह संक्षेपत इति शास्त्रपर्यालो

चनयैव विषयसिद्धेः किमत्र तत्कथनेनेत्याशंक्याह कृतस्येति । तात्पर्यमपुत्रस्यैवाधिगन्तुं शक्यं किमत्र तन्निर्देशेने
त्याशंक्य शास्त्रस्य ब्रह्मात्मैक्यपरत्वसिद्धेस्तत्प्रतिपादकशास्त्रे मुमुक्षोः प्रवृत्तिर्नेतरथेति अतिप्रायेणोपसंहरति ।
इति तदुभयमिति । इति शब्दो हेत्वर्थः मंगलाचरणं विषयप्रयोजनद्वयस्मादवश्यं तवितस्मादित्यर्थः उभयमिति शास्त्रा
र्थे देवतानमस्कारे । ननूभयपरत्वे वाक्यं भिद्येतेत्याशंक्यैकोर्थो मुख्यतोऽन्यस्त्वर्थादित्याह । श्रुत्यर्थाभ्यामिति । नन्वत्र
तात्पर्यस्य प्रदर्शितत्वादुत्तरत्र तात्पर्यकथनं व्यर्थं । न वात्र ब्रह्मात्मैक्ये तात्पर्यं दर्शितमुत्तरत्र लक्षणादाविति न वैयर्थ्य
मिति शंक्यं पूर्वापरविरोधप्रसंगादित्याशंक्योत्तरत्र लक्षणादाववान्तरतात्पर्यं कथ्यते अत्र ब्रह्मात्मैक्ये महातात्प
र्यं कथ्यत इति न विरोध इत्याह । कृतस्येति वितज्येति लक्षणादिपरतयावान्तरतात्पर्यस्य प्रदर्शनादिति यावत् ।

तत्व० ८ अनाद्यानंदत्वस्यायमर्थः। ब्रह्मकार्यंकारणत्वान्मृद्वदिति अनुमानात्ब्रह्मणोपिकार्यजयाहेयत्वंततश्चानम॰
स्कार्यत्वमितिशंकांनिरस्यति। अनादिति। किंतत्स्वतोजायतेउतकारणांतरात्। नाद्यः। व्याघातात्। नापिद्विती
यः। तदनिरूपणात्। उत्पत्तिनिषेधकश्रुतिस्मृतिबाधाच्चेत्यर्थः। ज्वरभारादिनिवृत्तावहोसुखमितिसुखव्यपदेशात्दु
खाभावएवसुखंभावरूपत्वेपितस्यब्रह्मगुणत्वमितिशंकांनिराचष्टेआनंदेति। अभावस्यसप्रतियोगिकत्वात्सुखस्यच
प्रतियोगिप्रतीतिनिरपेक्षप्रतीतिकत्वात्तारतम्यस्यव्यवस्थाव्वनाभावत्वंविज्ञानमानंदंब्रह्मेतिब्रह्मसामानाधिकरण्यात्
नतस्यगुणत्वं। एकधैवानुद्रष्टव्यमित्येकत्वप्रतिपत्तेश्चेत्यर्थः। ब्रह्मपरिणामिउपादानत्वात्मृद्वदित्यनुमानात्ब्रह्मपरि
णामीतिकेचिन्मेनिरेतान्प्रत्याहकूटस्थेति। विमतंनपरिणामिनिरवयवद्रव्यत्वात्गगनवदितिअनुमानानुगृहीतयानि राम० ८

ष्कलंनिः क्रियंशांतमित्यादिश्रुत्याबाधात्पूर्वानुमानस्याभासत्वमित्यर्थः। ज्ञानगुणंब्रह्मेतिपक्षंनिरस्यति। ज्ञानेतिविज्ञा
नमानंदंब्रह्मेतिसामानाधिकरण्यादद्वितीयत्वाच्चज्ञानंब्रह्मस्वभावइत्यर्थः। घटज्ञानंसमुत्पन्नंपटज्ञानंनष्टमित्युत्पत्तिवि
नाशप्रतिपत्तेर्नज्ञानस्यस्वरूपत्वंकिंतर्हिब्रह्मणोप्यंतवत्त्वप्रसक्तेस्तत्राहानंतेति। नहिद्रष्टुर्दृष्टेर्विपरिलोपोविद्यतइति
ज्ञानस्यनित्यत्वप्रतीतेर्जन्मविनाशप्रतीतिस्तस्यांतःकरणवृत्तिविषयत्वात्स्वरूपत्वंयुक्तमित्यर्थः। असदेवेदमितिश्रु
तेर्नूनमभावत्वमितिशंकांनिरस्यतिसदिति। अस्तीत्येवोपलब्धव्यः। स०देवसोम्येदमित्याद्यनेकवचनेनविरोधादसच्छब्दो
नभिव्यक्तनामरूपविषयइत्यर्थः। संसार्यसंसार्यादिभावेनजीवपरयोर्भेदंकेचिदाचक्षतेतान्प्रत्याहात्मनइति। न
रो त्वमस्ययमात्माब्रह्मेत्यादिवचनविधानविरुद्धधर्मप्रतिभासस्यचकाल्पनिकभेदविषयत्वादभेदएवेत्यर्थःसर्वक

तत्व० १

भेत्यादिवचना।त्सप्रपंचंब्रह्मेतिपक्षंनिरस्यति।अभुतेति।निरस्तसमस्तभेदायेत्यक्षरार्थः।जडाजड्योस्तत्वतोभेदानु
पपत्तेर्निर्विशेषत्वप्रतिपादकास्थूलादिवचनाविरोधाच्चसर्वंकर्मेत्यादिवचनमन्यथाव्याख्येयमित्यर्थः।ब्रह्मणःप्र
त्यक्तेनमस्कार्यत्वानुपपत्तिर्भेदाभावादित्याशंक्यापारमार्थिकभेदशालित्वादविरोधइतिवत्याह।अभूतेति।आत्मव्य
तिरिक्तस्यसर्वस्यदृश्यत्वादपिनतद्धर्मत्वमित्याह।साक्षिणइतिभ्रू।आद्यश्लोकेनैवापेक्षितसिद्धेःकिमुत्तरश्लोके
रित्याशंक्याह।अत्रेत्यादिना।यस्यदेवेपराभक्तिर्यथादेवेतथागुरौइति।वाक्यात्देवताभक्तिवत्गुरुभक्तेरपिवि
धानात्प्रत्यंतरंगत्वप्रतीतेर्गुरवोपिपूज्याइत्याह।गुरूनिति।तमंशाद्यर्थमाह।वाग्मनइति।प्रह्वीभावार्थस्यनमःशब्द
स्यत्रयाणामपिनमस्काराणांसाधारणत्वाहाग्मनकायप्रणिधानैरित्युक्तमितिद्रष्टव्यं।गुरवःपूज्याश्चेत्ग्रंथाद्बहिरेवपूज्यं राम० २

तां।तत्राह।अत्रेति।अत्रेत्यस्यातिपूज्येत्यनेनसंबंधः।ग्रंथएवपूजायांहेतुमाह।देवतेति।देवतावासौगुरुश्चेतिदेवतागु
रुःदृष्टांतार्थोवादेवताशब्दःआदिशब्देनध्यानंगृहीतं।ग्रंथाद्बहिःक्रियमाणाकर्त्तुरपेक्षितकारीपघापितथापिग्रंथे
क्रियमाणाश्रोतॄणामन्यमनस्कानामपिफलदास्यादितिमत्वाग्रंथेकरणमित्यर्थः।श्लोकानामेषार्थः।बदरायस्मिन्दे
शेसंतिसबादरःसएवायनंयस्यसबादरायणः।बादरायणइतिसंज्ञायस्यसबादरायणसंज्ञःतस्मैतपोनिर्द्धूतकल्मषा
येत्यर्थः।श्रवणपौष्कल्यमाह।श्रुतीविति।श्रुतीनांशिरांसितान्येवपद्मानिश्रुतिशिरःपद्मानितेषांषंडःसमूहस्तद्विक
सनेपटुनरांमार्त्तंडएवमूर्त्तिर्यस्यसतथा।मुनयइतिमननसंपत्तिमाह।श्रवणादावधिकारयोग्यतामाह।शमेति।श
मएववेश्मयस्येति।शामवेश्माशमस्यवेश्मेतिवा।भाष्यार्थप्रतिपत्त्यर्थंतत्कर्त्तारंनमति।नमामीति।प्रसिद्धशंकरविल

तत्व० ४

र्यपांपरमहंसपरायणशंकराचार्यंनमामीत्यर्थः। वैलक्षण्यमाह। भोगित्यादिनभोगिनामधेयसर्पपरिवारसयंतमसिद्धशंक
रः सः। अयंतुनिरस्तसमस्तैषणमुविवरनिकरपरिवृतइत्यर्थः। भूतिभिसितंतदनुलिमगात्रः सः। अयंत्वैरवर्यलक्षणभू
तिविधुरइत्यर्थः। गिरिजार्द्धविग्रहः सः। अयंतुनतथाभवति। सकूरः उग्रत्वात् अयंतुशांतइत्याह। अनुग्रमिति। कंटेका
लः सः अयंतुकृत्स्नाविद्यालांछनरहितइत्याह उन्मृदितेति। विनायकोगणेशः तत्सहितत्वंतस्यएवषविनायकंविग
वर्त्तत इतिनिरस्तसमस्तबौद्धसमयइन्यर्थः भाष्यकर्तृत्वीपाधोशंकराचार्यगुनुतक्र्यातिशयद्योतनार्थंपुनःपूजयति। य
दुक्तेति। भाष्यमेववित्तंयेषांतेभाष्यवित्तकाः स्वार्थेकप्रत्ययः। त्तेवत्तेगुरवश्चेततथोक्ताः भाष्यवित्तकानांगुरवइतिवाविग्र
हः। पूर्वस्मिन्पक्षेनमस्कार्यत्वेब्रह्मविद्यासंप्रदायकर्तृत्वनूपंहंनुदर्शयितियदुक्तेति। षष्टीसमाससपक्षेभाष्यवित्तकुतो राम० ४

द्यमित्याशंक्यगुनुभ्यएवेत्याहयदुक्तेति। येषांवक्त्रंतदेवमानसाख्यंसरः तस्मात्प्रतिलब्धंजन्मानेनेतितत्तथोक्तः द्यभाष्यारवि
दंवेतिनथातस्यमकरंदः यदुक्तमानससरप्रतिलब्धजन्मभाष्यारविंदमकरंदः तस्यरसमित्यर्थः। मकरंदंपुष्परसइति। मकरंदशब्दस्य
पुष्परसेप्रसिद्धत्वातरसशब्दोनर्थकइतिचेतितन्नदलविशेषावस्थाद्योतनार्थत्वात्नानर्थक्यमितिब्रमः। प्रत्याशांदिशंदिशंप्र
तिप्रतिदिशंस्थितेत्यर्थः। उन्मुखाश्चतेविनिताश्चउन्मुखविनीताः तेवतेविनयतस्याश्चेवतितथातएवभृंगवद्भृंगाइतिउन्मु
खविनीतविनेपभृंगाः। उन्मुखत्वंतनामास्तिक्यमुक्तताविनीतत्वमौद्धत्यादिराहितत्वं। नमस्कारानंतरंटीकाकृतः प्रतिज्ञाकरणंम
र्थमित्याशंक्यफलवद्ग्रंथकरणासन्निधानात्नमस्कारस्यतद्विषयलद्योतनार्थंप्रतिज्ञानंसन्निहितप्रयोजनसंभवेसंनिहितफल
कल्पनानुपपत्तेः इत्याह। यत्कार्य्यमिति। पदादिवृत्तेत्यस्यैषोर्थोभाष्यष्यस्यआरभेयत्नमाह। गंभिरमिति। नत्यनंवगाह्यत्वात्

तत्व० ११ व्याख्येयत्वंनेत्याह प्रसन्नेति।आपाततःप्रसन्नत्वंविचारणायांतुगंभीरत्वमित्यर्थः।गांभीर्यमेवाह।पदादिति।पदच्छेदपदा
र्थकथनविग्रहवाक्ययोजनाक्षेपसमाधानलक्षणप्रसववंधनतूपवृंभारेणेत्यर्थः।भाष्यस्यव्याख्येयत्वप्रतिज्ञायतदितरंव्या
ख्यानेप्रतिज्ञाविरोधःस्यादितिशंकतेननुतेदमिति।इदंभाष्यंनभवति।अतोनव्याख्यानपदवीमुरोढुमर्हतीतियोजना।
भाष्यकृत्प्रणीतत्वेनभाष्यत्वंतस्यास्त्वित्याशंक्यनतत्प्रणीतत्वमात्रेणभाष्यत्वसिद्धिः।अतिप्रसंगात्।अतोभाष्यल
क्षणलक्षितत्वेनभाष्यत्वंवक्तव्यंनचतन्निरूपयितुंशक्यमित्याह।भाष्यलक्षणेति।लक्षणावगममंतरेणतदभावावगमा
नुपपत्तेर्लक्षणमाह।सूत्रार्थइतियत्रार्थोवर्ण्यतेतद्भाष्यमित्युक्तेसागरादिवर्णनस्यापिभाष्यत्वंस्यात्तद्व्यावृत्त्यर्थंसू
त्रेतिविशेषणंपदवृत्तिंव्यावर्तयतिवाक्यैरिति।वार्त्तिकव्यावृत्त्यर्थंसूत्रानुकारिभिरितिवार्त्तिकेसूत्रप्रतिकूलवर्णनस्या राम० ११

पिसंभवात्तद्व्यावृत्तिरित्यर्थः।वृत्तिंव्यावर्तयति।स्वपदानिति।अस्त्वेवंभाष्यलक्षणंकथंतदभावःप्रकृतेइत्याशंक्यकिंसौत्रश्रो
त्रार्थसंस्पर्शित्वेनभाष्यलक्षणाक्रांतत्वंउतार्थार्थसंस्पर्शित्वेनउभयथाप्यसंभवइतिप्रतिपादयितुंप्रथमंसाकांक्षत्वेनसूत्र
स्यानर्थक्यशंकांनिरस्यति।तत्राथातइत्यादिना।तत्रभाष्यलक्षणेएवंव्यवस्थितेइत्यर्थः।सर्वज्ञवादरायणप्रणीतत्वादानर्थक्या
उपपत्तेरध्याहारेणापिसूत्रंयोजनीयमित्याह अध्याहर्तव्यमिति।तत्रापियोग्यमध्याहर्तव्यमित्याह।कर्त्तव्येतियोग्यत्व
उपपादयति।शास्त्रइति।पुनःप्रवृत्तिरेवमाभूदित्याशंक्याह।अनुवादेतिनिरर्थकसिद्धबोधिवाक्यमनुवादःशास्त्रार्थः।भा
वप्रधानश्चायंनिर्देशइतिद्रष्टव्यं।कर्त्तव्यपदाध्याहारेथानर्थक्यंतदवस्थंप्रकृतिप्रत्ययार्थयोर्ज्ञानेच्छयोःकर्त्तव्यतासंभवा
दित्याशंक्यजिज्ञासापदेनविचारंलक्षयित्वातस्याःकर्त्तव्यतोच्यतइत्याह।तत्रजिज्ञासापदेनेति।तत्रसूत्रेइत्यर्थः।लक्षणा

यांहेतुमाह।अत्रनुष्ठानेति।विचारस्यैवलक्षणायांकोहेतुरित्याशंक्यतस्यजिज्ञासापदवाच्यसंबंधादित्याहांतर्न।तमिति।
तत्व० १२ ज्ञानेद्वयोरंतर्मध्येनीतमितियावत्।परोक्षतयाज्ञाते परोक्षफलंज्ञानमिष्यतेसंदिग्धेचनिश्चयफलेनत्वविचाराविना
भूतमितिविचारेलक्षणेत्यर्थः।अथवाजीज्ञासाकर्त्तव्येत्यत्रेष्यमाणज्ञानस्यसाक्षात्साध्यत्वासंभवात्तन्निर्वाहकोविचार
आक्षिप्यतेइच्छायाअपिसाक्षात्साधनत्वेनान्वयात्तन्निर्वाहकोविचारआश्रयणीयः।क्रियायाःकालांतरभाविफ
लसाधनत्वानुपपत्त्याअपूर्वाभ्युपगमवदित्यर्थः।एवमप्यधिकारिफलसाकांक्षत्वेनानर्थक्यमित्याशंक्याह।साधनचतुष्ट
येति।अथशब्दाद्विशिष्टाधिकारिप्रतिपत्तिः।इच्छाविषयत्वात्ब्रह्मज्ञानस्यफलत्वंचेत्यर्थः।ज्ञानस्यसुखदुःखप्राप्ति
निवृत्त्यन्यतरत्वाभावादफलत्वमित्याशंक्यार्थार्थमाहार्थादिति।इदमत्राकूतं ब्रह्मज्ञानायविचारकर्त्तव्यतातावत्तृतीय राम० १२

ते।नचब्रह्मज्ञानस्यस्वरूपेणपुमर्थतासुखावाप्तिदुःखनिवृत्त्यन्यतरत्वाभावात्।तस्मात्फलेविशेषाकांक्षायामथशब्दोप
त्ताधिकारिविशेषणभूतोमोक्षःफलत्वेनसंबध्यते।यथास्वर्गकामोयजेतेत्यत्राधिकारिविशेषणस्यस्वर्गस्यफलत्वंतद्वत्।
नन्वधिकारिविशेषणत्वेनमोक्षस्यफलत्वंउतकाम्यत्वेन।नतत्रप्रथमकल्पोवकल्पतोजीवनगृहदाहादेरपिफलताप्रसं
गात्।नद्वितीयःपरस्त्रीकामःप्रायश्चित्तंकुर्यादित्यत्रकाम्यमानयोषितिसिंउस्यापिफलतापातात्।तस्मादधिकारिविशे
षणस्यफलत्वमसंगतमितिचेत्।नैतत्।नविशेषणत्वमात्रेणकाम्यत्वमात्रेणवामुक्तेःफलत्वंकिंतुकाम्यत्वेसत्यनिर्दि
तत्वेन।तस्मादधिकारिविशेषणीभूतोमोक्षःफलमितिसुभूक्तमिति।विचारस्यविषयसाकांक्षत्वात्तस्यचानिर्दिष्टत्व
त्साकांक्षाचशंकांनिरस्यतिसन्निधानादिति।वेदांतवाक्यविचारइतिचसिध्यतीतिसंबंधः।प्रत्यक्षाद्यगोचरत्वेनोपनि

षन्मात्रप्रतिपाद्यत्वात्तद्विषयोविचारः साधनमित्यर्थः सूत्रार्थवर्णनमुपसंहरतइति श्रुत्यर्थाभ्यामिति। फलितंदर्शय
ति। तत्रेति युष्मदस्मदित्यादिसूत्रार्थकलामपिनप्रतिपादयति आतोन भाष्यमितियोजना। अभाष्यत्वसमर्थनफलमा
हातइति। इतिशब्दः पूर्वपक्षसमाप्तिद्योतनार्थः। तदुत्तरत्वेनटीकामवतारयति। एवंशंकितमिति। भाष्यद्वयमेवकस्मा
दाक्षिप्य समाधीयते उत्तरत्रार्थाक्षेपसमाध्योरविशेषादित्याशंक्य सूत्रितविषयप्रयोजनहेत्वध्यासविषयस्य युष्मदस्म
दित्यादेर्नीष्यत्वसिद्धावध्यासविषयोत्तरभाष्यस्यापि भाष्यत्वं सिद्ध्यतीत्यभिसंधायादभाष्यत्वं उस्येति। भाष्यद्वयस्येत्यर्थः
उत्तरभाष्यस्यैतत्भाष्यसमानयोगक्षेमत्वं दर्शयितुं खंडशाद्वप्रयोग इत्यर्थः। किं इत्यंतं यद्भाष्यं तत्प्रतिपादयतीत्यन्व
यः किंवेत्यंतं यत्तद्भाष्यमिति। नाद्यः। अद्यापि भाष्यत्वासिद्धेस्तत्प्रतिपादयतीत्युक्त्यनुपपत्तेः। नद्वितीयः प्रतिपा

दयतीत्यत्र कर्त्रभावप्रसंगात् नवेत्यंतस्यैव ग्रंथस्य कर्तृत्वेन संबंध इति शंक्यं। तस्य विषयादिप्रतिपादकतायाएवानुप
लब्धेरिति शंकां निरस्यति। तत्रेति। यदित्यंतं तद्भाष्यमिति विपीयतो नवप्रतिपादयतीत्यत्र कर्त्रभावप्रसंग इत्याह इति
ग्रंथ इति। तत्र टीकायामेषग्रंथः प्रतिपादयतीतीयोजना। नवतत्रप्रतिपादकत्वमसिद्धमिति शंक्यतस्य वक्ष्यमाणत्वा
दित्यर्थः। अथवा प्रतिपादयतीत्येनेद्विधीयतो नच भाष्यत्वासिद्धेरनुवादासंभवः। भाष्यशब्दस्य प्रथमाक्षावित्वा
दित्यर्थः। इत्यंतं भाष्यमित्यंत ग्रहणसामर्थ्यादवधारणं प्रतीयते तत्केनान्वेतीति विवेचनीयं। किं भाष्यद्वयेन। उतवि
षयप्रयोजनाभ्यां आहोस्वित् प्रतिपादयतीत्यनेन त्रिधापिनान्वय इत्याह। ननु कथमिति। व्यत्रैषाक्षरयोजना। भा
ष्यद्वयमवेकथं विषयादिकं प्रतिपादयति। अत्यानर्थहेतोरित्यस्यापितत्प्रतिपादकत्वात्। भाष्यद्वयं विषयप्रयोज

तत्व०
५५

नेऽस्वकथंप्रतिपादयति।अध्यासस्यापिप्रतिपादकत्वात्भाष्यद्वयंविषयप्रयोजनेप्रतिपादयत्येवेतिकथमध्यासस्यैवप्र
तिपादकत्वात्।नह्यन्यप्रतिपादकमन्यप्रतिपादकंभवतीतिकल्पत्रयेप्युक्तोदोषोत्रनावतरतीत्याहशास्त्रेति।शास्त्रारंभ
निमित्तेयेविषयप्रयोजनेतयोःसिद्धिहेतोरित्यर्थः।तत्रैषायोजनाभाष्यद्वयमेवविषयादिकंप्रतिपादयतिनोत्तरं।अस्यैव
हेतूपन्यासस्थापकत्वादुत्तरस्यैतत्सिद्धविषयाद्यनुवादकत्वात्तथाभाष्यद्वयंविषयप्रयोजनेएवप्रतिपादयतिनाध्यासल
क्षणादिभाष्यसिद्धाध्यासानुवादित्वात्।तथेदंविषयप्रयोजनेप्रतिपादयत्येवहेतूपस्थापकत्वादिति।हेतूपस्थापकंभा
ष्यंकथंविषयप्रयोजनेप्रतिपादयेत्।नखलुकलशशब्दःकालविषयोदृष्टइतितत्राहहेत्वनुवचनमिति।एवकारःसाधयती
त्यनेनसंबध्यतेसाधयेत्येवेतिहिशब्दोहिदृष्टांतार्थः।यथाधूमवत्त्वहेत्वनुवचनमग्निमत्त्वंसाधयतितथेत्यर्थः।अध्यासस्य

राम०
५५

विषयप्रयोजनसिद्धहेतुत्वंविषयादेरेवशास्त्रारंभगमकत्वमुक्तंतदसंभ।विद्यान्यभावादित्याशंक्यविशेषांशेव्याप्यभा
वेपिसामान्योपाधौसास्तीत्याह।तथाहीति।भागेसिद्धसाध्यत्वंनिराकर्तुमेतदितिविशेषणं।असिद्धिंनिरस्यतिशास्त्रं
वेति।बंधप्रत्यनीकत्वमुपपादयति।अविद्यात्मकेति।अनुमाननिगमनार्थइतिशब्दः।परमप्रकृतमुपसंहरति।तदेवमि
ति।विशेषणासिद्धिंशंकतेनानुबंधस्येति।लक्षणादिनामत्रसंभवात्कथमसिद्धिरित्याह।तआहेति।सर्ववेदांताआर
भ्यंतइत्यादेरध्यासाप्रतिपादकत्वात्कथंतदेकवाक्यतयायुष्मदित्यादेर्विषयादिसाधकत्वमित्याशंक्याहविषयादीति।ल
क्षणादिभाष्येनैकवाक्यतयाविषयादिसाधयतिचेदेतदंतमनेनेतिविभागोयादानमनुपपन्नमित्याशंक्याह।तएवेति।
अतःशब्दार्थमाह।व्यवधानेति।लक्षणादिनाप्यमध्यासंप्रतियाद्यविषयादौपर्यवस्यति।इदंतुसाक्षात्।अतोविभागोया

दानंयुक्तमित्यर्थः नन्वस्यानर्थहेतोरित्यादेरध्यासासाधकत्वात् तेनधर्यैवस्यदित्यभिधानमयुक्तं इतिचोदयति। ननुनहीति।
शब्दतः प्रतियमानमर्थमंगीकरोति। सत्यमिती। तर्ह्यस्यानर्थहेतोरित्यनेनधर्यैवस्यदितिटीकानुपपन्नेतितत्राहास्येति। अस्या
नर्थहेतोरितिभाष्यस्यपूर्वभाष्येणलक्षणादिभायेणसहोपादानंकृतमित्यन्वयः। तत्र हेतुमाह। सव्यवधानेति। व्यवधानेन
सहवर्त्तत इति। सव्यवधानंतस्यभावस्तत्वं कुत्रसव्यवधानत्वमितिवीक्षायामाह। विचारशास्त्रीयेति। अस्यानर्थहेतोरिति
भाष्यस्याध्यासासीधवत्वात्कथंसव्यवधानत्वमितितिवीक्षायामाहविषयेति। वेदांतानांविषयप्रयोजनसंबंधंप्रतिपाद्यस्या
त्वद्विचारशास्त्रसंबंधप्रतिपादनात्सव्यवधानत्वमित्यर्थः भाष्यद्वयस्यविषयादिप्रतिपादकत्वंमंगीकृत्यसूत्रासंगतिमं
गीकृतोनन्वेवमपीति। असूत्रसंबंधित्वमसिद्धमित्याह। तआहेति। विषयप्रयोजनेसूत्रितेइत्युत्पनेनरूपेणयुष्मदित्यादेःप्र राम० १५

तिपादकत्वाभावात्सूत्रितेइतिप्रतियादयतित्येतदनुपपन्नमित्याशंक्याहेतिशब्दइतिहेतुत्वमेवाह। यस्मादिति। विषयादिहे
त्वध्यासोपस्थापकत्वेनभाष्यस्याव्यख्येयत्वमुक्तं संप्रतिसूत्रस्यैवासंगतत्वात्तन्मूलंभाष्यमप्याव्याख्येयमित्याशंकवानाह। कःपु
नरिति। अयमर्थः। जिज्ञासितंहिसूत्रणीयंजिज्ञासाहिज्ञातेज्ञानंचनशास्त्रश्रवणमंतरेणसंभवति। पाठकादिष्वदृष्टेरित्य
संगतिः तथाप्रसज्यतेनेनेतिप्रसंगः संजकः सकिमापुतननाथः। वेदांतवाक्यविचारकर्त्तव्यतायाःप्रमाणांतरगोचरत्वा
त् श्रोतव्यइत्यादिवाक्यंप्रसंजकमितिवक्तव्यं। नचतत्संभवति। विकल्पसत्वात्। ततत्किंनित्यंनैमित्तिकंवान्नायश्चित्तन्
यंवा अथवाकाम्यंनाद्याः। अकारणेप्रत्यवायाश्रुतेः। नद्वितीयः। गृहदाहादिष्विवनिमित्तश्रवणात्नतृतीयःअस्त्वावार्य
चकीर्णीनेत्यत्रतेनंगर्दभमालतेतेतिवत्दोषसंप्रयोगेसत्यवादिनत्वात्। नापिचतुर्थः। विध्युद्देशेफलाश्रवणात्नचरमःस्व

MEMORIAL

तत्व०
१६

त्रस्य प्रमाणापेक्षितन्यायसूचकत्वात्तदभावे सूत्रस्यैवासंगतेः तस्मात्प्रसंजकाभावाद्वासंगतिः। तथा शास्त्रासंगतिश्च
समन्वयादिप्रतिपादकं शास्त्रं न च समन्वयाद्यन्यतमदप्यनेन प्रतिपाद्यत इति तथा आदावेवास्य सूत्रस्य प्रसंगं न पश्याम इति
चेनु विषयाद्यप्यसंगतेरत्रासंगतिरित्याहोच्यत इति असंगतेरुपपादनात्कथं तदसंगतिरित्याशंक्याद्यामसंगतिं निरावष्टे
निरावष्टे नित्येनेति। अधीतस्वाध्यायो वेदांतवाक्येभ्य इदमवगच्छति इति संबंधः। अध्ययनप्रसंजकमाहाध्ययनेति। तस्य
काम्यत्वं प्रत्याह। नित्येनेति। अर्थावबोधे सति तत्कामना तत्कामनायां च सत्यां ततः सांगाध्ययने प्रवृत्तस्यार्थावबोधे इतीत
रेतराश्रयत्वप्रसंगान्नित्यत्वमित्यर्थः। अध्यायनविधिप्रयुक्तमध्ययनमि। तिमतं निरस्यति। एवेति एवकारस्य विधिनां सं
बंधः। नित्यानित्यसंयोगादिविरोधप्रसंगान्नाध्यविधिप्रयुक्तमध्ययनमेतद्वत्तृतीयवर्णके प्रतिपाद्यत इति नात्र विस्तार्य
त इत्यर्थः अधीतस्वाध्याय इति। सांगाध्ययनवान् इत्यर्थः सांगाध्ययनादेवावगतिजनिपक्षे शास्त्रवैयर्थ्यमिति तत्राहाप राम०
१६

तत इति। विचारं विनेत्यत्र ज्ञानमापातदर्शनं तस्य चानिश्चयरूपत्वात् शास्त्रप्रवृत्तिरित्यभिसंधिः इदमापरामृष्टमर्थमा
त्मनस्त्वित्यादिना। आत्मप्रेप्सोः श्रवणं नामांगिविधियत इति संबंधः। वंदनवनितादिप्रेप्सुत्वादात्मप्रेप्सानकस्यापीत्यत आह
सर्वत इति प्रमाणमाहात्मन इति। पुत्रादीनां प्रियत्वं न स्वरूपेण किं त्वात्मार्थत्वेन इतरथा वैरिपुत्रादेरपि प्रियत्वप्रसंगात्त
स्मादात्मनि मुख्यप्रीतिरितरत्त्वौपाधिकी तस्माद्ध्येयमात्मव्यतिरिक्तमिति विशिष्टाधिकारिसिद्धिरित्यर्थः। प्रयोजनमा
हतादर्थ्येनेति। दर्शनोद्देशेनेत्यर्थः द्रष्टव्य इति दर्शनेतव्यप्रत्ययश्रवणाद्दर्शनमपि विधेयमिति तत्राहात्मदर्शनमिति। प्रम
पावस्तुपरतंत्रत्वान्नात्मसाक्षात्कारे विधिसंभव इत्यर्थः ननु ज्ञानस्योद्देश्यत्वसुखादिरूपत्वाभावादित्यत्राहामृतत्वेति। तत्र
प्रमाणमाहात्मनि विज्ञात इति। सर्वस्यात्मोपादानत्वात्तद्व्यतिरेकेणाभावः ततश्चात्मज्ञानात्सर्वज्ञानं युक्तमित्यर्थः। ल

तावदित्यात्मज्ञानमेवामृतत्वसाधनत्वादमृतत्वमित्युपचर्यते। लांगलंजीवनमितिवत्। खल्विति ज्ञानस्यामृतत्वसाधनत्वं
प्रसिद्धमित्यर्थः। असंभावनादिप्रतिबंधात्कथंश्रवणात्तत्वसाक्षात्कार इतितत्राह मननेति। अद्वितीयब्रह्मणिवेदांतानांश
क्तितात्पर्यावधारणंश्रवणंश्रुतस्यार्थस्योपपत्तितोऽनुसंधानंमननंविजातीयप्रत्ययतिरस्कारेणसजातीयप्रत्ययप्रवाहक
रणंनिदिध्यासनमितिविभागः। श्रवणोत्तरकालीनयोस्तयोः कथंश्रवणांगत्वमित्याशंक्यनस्वरूपोपकारितयांगत्वंप्रोक्ष
णादिवत्। अपितुप्रयाजादिवदित्याह फलेति। श्रवणस्ययत्तत्वसाक्षात्काराख्यंफलंतत्रमननादेरुपकारकत्वमित्यर्थः। स्वा
ध्यायादधिकार्य्यादिप्रतिपत्तावपिशास्त्राप्रवृत्तिरापातदर्शनस्यानिश्चयरूपत्वादित्युक्तंतत्रकथमनिश्चयरूपत्वंतत्राह। स
वत्रेति। सआपाततदर्शनवान्। तत्राधिकार्याद्यनुबंधप्रथे इतिजिज्ञासत इतिसंबंधः चशब्दस्यचतेनैवसंबंधः नकेवलमधि
कार्य्याद्यनुबंधंजानातिकिंतुजिज्ञासतेचेत्यर्थः। इतिपदपरामृष्टंप्रकारमाह। कियद्विशेषणेति। कियंतिविशेषणानियस्यतो

वधिर्यस्यसतथा किंवैराग्यमेवविशेषणंआहोअन्यदपीतिविमर्शार्थः। यदान्यदपिविशेषणंतदातत्रकायुक्तिः किंचमान
मितिविवेचनीयमित्याह किंप्रमाणक इति। अधिकार्यनुबंधेजिज्ञासामभिधायविचारविधेरव्यवहितविषयानुबंधेतामा
ह। कोवेति किंप्रयाजादिवत्सकृदनुष्ठेयंत्वपिकिंप्राभ्यामीमांसयागतार्थत्वंउतनेतिविमर्शांतरमाहान्यत इति साधनानुबंधे
संशयमाह उतावघातादिवत्सकृदितिजिज्ञासत इत्यर्थः। दृष्टफलत्वेनासकृदनुष्ठेयः कथंवेति। किंकर्मसमुच्चितंज्ञानंसा
धनमसमुच्चितंचेत्यर्थः। असमुच्चितत्वपक्षेपिज्ञानंनिरूपणीयमित्याह किंप्रमाणकमिति व्यवहितविषयानुबंधेसंशयमाह।
किंवातदात्मतत्वमिति। आत्मतत्वंकिंसविशेषमुतनिर्विशेषमितिनिर्विशेषत्वेमानंवक्तव्यमित्याह। किंप्रमाणकमिति। प
जिज्ञासायाः परंप्रत्यप्रत्यक्षत्वात्। कथंतन्निरासायशास्त्रप्रणयनंतत्राह तंचेति। तंजिज्ञासुमुपलभमानोबादरायणोनुबंध
त्रयंसूत्रयामासेतिसंबंधः। उपलंभहेतुमाह। भगवानितिउत्पत्तिंवैविनाशंचभूतानामागतिंगतिं। वेत्तिविद्यामविद्यांचस

तत्व० १८

वाच्यो भगवानिति निप्रसिद्धः परजिज्ञासोपलंभो युक्त इत्यर्थः। तत्र हेतुमाह। वादरायण इति। काकदंतजिज्ञासौवैलक्षण्यमा
ह पुरुषार्थेति। प्रसंजकाभावादित्युक्तं निरस्यति वेदांतवाक्येति। सर्वविधिः काम्य इत्याह। साधनचतुष्टयेति। यद्यपि न
विध्युद्देशे फलश्रवणं तथाप्यर्थवादिकफलो मा दानेनामृतत्वसाधनदर्शनकामो वेदांतवाक्यानि विचारयेत् इति विधिः
परिणाम्यते। यथा प्रतितिष्ठंति ह वै य एता रात्रीरुपयंतीत्यत्र प्रतिष्ठाकामो रात्रिसत्रं कुर्यादिति विधिः परिणाम्यते। त
द्वदित्यर्थः। ननु वेतत्सूत्रं श्रवणविधिमूलमिति कथं गम्यते। तत्राह। श्रुतिसूत्रयोरिति। तद्विजिज्ञासस्व श्रोतव्य इत्यादि
श्रुतौ सूत्रे च विचारकर्त्तव्यतापरत्वस्य चाविशेषादित्यर्थः। श्रवणस्यांगित्वं मननादेरंगत्वं चोक्तं तत्रैव परिसंख्यं किं न स्यादि
त्यत आह मननेनेति। आत्मैकत्वविद्याप्रतिपत्तय इत्येतद्व्याख्यानसमये वक्ष्यत इत्यर्थः। ननु श्रवणे विधेरसंभवात् क
थं तन्मूलं सूत्रमिति चोदयति। ननु श्रोतव्य इति किमपूर्वविधिरुत नियम आहो परिसंख्येति विकल्प्याद्यं दूषयति। श्रव राम० १८

णादीनामिति। अपूर्वविधेः अत्यंताप्राप्तविषयत्वात् श्रवणादीनां च ज्ञानसाधनत्वमन्यतः प्राप्तमिति नापूर्वविधित्वं तस्ये
त्यर्थः। दृष्टफलेप्यवहननादौ व्रीहीनवहन्यादिति यथा नियमस्तद्वदत्रापीति द्वितीयं कल्पमाशंक्याह नवेति। व्रीहीनवहन्यादित्यत्रा
दृष्टदृष्टप्रयोजनसंभवान्नियमविधिर्युज्यते न तथात्रेत्यर्थः। चकारेणोभयार्थत्वाभावेपि नियमविधित्वमिति शंकां निरस्यति
दृष्टतंदुलमात्रनिष्पत्तिफलस्यान्यथापि संभवाद्विवैधिवैयर्थ्यमित्यर्थः विधिबलादत्राप्युभयार्थत्वं कल्प्यत इत्याशंक्य किंपरमा
पूर्वं नियमापूर्वं साध्यं उतात्मबोध एव साध्य इति विकल्प्याद्यं प्रत्याह दृष्टादृष्टेति तंदुलतत्समवेतादृष्टसाध्यपरमापूर्वंवच्छ्रवणा
दिवदृष्टसाध्यमदृष्टं न यस्याम इत्यर्थः। द्वितीयं निरस्यति। आत्मावगमस्येति दृष्टसामग्र्यां सत्यामदृष्टाभावापराधेन बोधा
नुदयादर्शनान्न तस्यादृष्टसाध्यत्वमित्यर्थः नच परिसंख्या। पंचनखाः पंचनखभक्षणयोरन्यतः प्राप्तावन्यपरिवर्जनवदात्मतत्व

साक्षात्कारस्योपनिषद्‌तिरिक्तात्प्राप्तसंभवादित्यर्थः। अपूर्वपरिसंख्यानिराकरणमदिष्टमेवनियमविधिस्तेननिद्धोनुंशक्य
तत० १२ तइत्यतआह। नैतत्सारमिति। अदृष्टसाध्याभावादित्युक्तंनिरस्यति। आत्मतत्वेति। सर्वापेक्षावयज्ञादिश्रुतेरश्ववदित्यत्रव
स्यमाणत्वादित्यर्थः। यत्रान्वयव्यतिरेकलभ्यंकारणत्वंतत्रकेवलव्यतिरेकापेक्षाइहपुनर्विविदिषंतीत्यादिवाक्यबलाददृष्टस्य
कारणताश्रियतइतिनव्यतिरेकोर्थ्यतोनवादृष्टस्यायोगासंभवः। तपसाकल्मषंहंतिअविद्ययामृत्युंतीर्त्वेत्यादिश्रुतिस्मृ
तिपार्यालोचनयापारिपंथिककल्मषनिवर्हणेनोपयोगादित्यभिसंधिः। नन्वेकस्मिन्विषयेद्वयोःसाधनयोःपक्षप्राप्तौनियमवि
धिः। यथातंदुलनिष्पत्तेरवहननात्रखनिर्भेदनाच्चसंभवेवहन्यादितिनियम्यतोनतथात्मज्ञानेसाधनद्वयंप्राप्तमितिकथंनि
यमइतिइतिचेत्मैवंविकल्पासहत्वात्। किमात्मज्ञानमात्रेसाधनांतराप्राप्तिःउतनिर्विशेषात्मज्ञाने। नाद्यःसविशेषात्म राम० १२

ज्ञानेप्रत्यक्षादिप्रसरात्द्वितीयेपूर्वीयेषुव्रीहिषुदलनाद्यप्राप्तावपिव्रीहिमात्रेदलनादिप्राप्तेर्नियमवन्निर्विशेषात्मज्ञानेसा
धनांतराप्राप्तावपिअन्यत्रसाधनांतरप्राप्तेर्नियमइतितुल्य। प्रकारांतरेणश्रवणादिविधिमाक्षिपति। ननुविधिपरत्वइति। उ
तयपरत्वेवाक्यभेदापातात्ब्रह्मसिद्धिमिच्छतावेदांतानांविधिपरत्वमेष्टव्यमित्यर्थः। विधिविशेषणतयाब्रह्मणोगुणत्वप्रसंग
आदिशब्दार्थः। भाष्यवचनविरोधादपिनवेदांतेषुविधिसंभवइत्याह। इतिभाष्यकारैरिति। अतस्तद्विषयलिङादयःश्रूयमा
णाअप्यनियोज्यविषयत्वात्कुंठीभवंतीत्यत्रेत्यर्थः। किंविधिविशेषस्यतत्रनिरासःआहोविधिमात्रस्येतिविकल्प्याद्यमंगीक
रोति। सत्यमिति। अंगीकृतमंशमाह। ज्ञानविधिरिति। द्वितीयंदूषयति। नश्रवणेति। सामान्यवचनंकथंविशेषविषयंत
पाव्याख्यायइति। तत्राहतत्रेति। ज्ञानविद्यानुक्तदोषस्यश्रवणविधौप्रसंगाभावादितिहेत्वर्थः। ब्रह्मस्वरूपासीद्धादिदोष

तत्व०
२०

प्रसंगोत्रापितुल्यइत्याहकथमिति।श्रवणविधिपक्षेब्रह्मणोगुणत्वाभावंदर्शयितुंदर्शनविधौगुणत्वंतावदाहदर्शनेति।क
र्मतयेतिक्रियात्वेनेतियावत्।विधेयज्ञानस्यक्रियारूपस्यनियोगनिर्वर्त्तकतयाविशेषणत्वात्।तद्विशेषणंब्रह्मापिविशेषणंस्या
दित्यर्थः।विचारविधावपिब्रह्मणोदर्शनंप्रतिगुणत्वंतुल्यमित्यत्राह।ब्रह्मदर्शनमिति।स्वयमेवप्रधानंस्वप्रधानंस्वप्रधानंचत
त्फलभूतंचेतिस्वप्रधानफलभूतंतच्चतत्दर्शनंचेतिस्वप्रधानफलभूतदर्शनंतस्यविशेषणतयेत्यर्थः।प्राधान्यमुपपादयतिफ
लभूतेतिधर्मज्ञानार्थवेदवाक्यानिविचारयेदित्यत्रधर्मस्यप्राधान्यवद्ब्रह्मज्ञानायविचारविधावपिज्ञायमानंब्रह्मप्रधानमितिनवि
शेषणत्वप्रसंगइत्यर्थः।विधिपरत्वेस्वरूपासिद्धिप्रसंगमुक्तंनिरस्यतिइतिवेदांतैरिति।ब्रह्मणिमहातात्पर्यंविधौत्ववांतरतात्प
र्यमितिनविरोधइत्यर्थः।अवांतरवाक्यत्वेदेनवेदांतानांश्रवणविधिपरत्वेनसुरांपिबेदित्यादावपिअवांतरवाक्यत्वेदकल्पनया

राम०
२०

MEMORIAL

सुरापानविधिनिषेधप्रसंगइत्याशयेनशंकतेननिति।एवमपीति।ब्रह्मणःप्राधान्येपीत्यर्थः।आत्मनस्तुकामायसर्वंप्रियमि
त्युपक्रमादात्मनिविज्ञातेसर्वमिदंविज्ञातंभवतीत्यात्मनोपसंहाराच्चैकंवाक्यमित्यर्थः।किंपदैकवाक्येअवांतरभेदेनार्थभेदप्र
तिपादकत्वंनिराकरोषि।उतवाक्यैकवाक्ये।तत्राद्यमंगीकृत्यद्वितीयंनिरस्यति।अवांतरवाक्यभेदेनेति।एकार्थप्रतिपादकत्वे
नैकवाक्यत्वाविशेषेक्वचिदवांतरवाक्यभेदःक्वचिन्नेत्ययंविभागःकुतइतिचेत्।तत्रेदंवक्तव्यंकिमेकदेशिनएतद्वाच्यंउततांत्रि
कस्य।नाद्यः।वाक्यैकवाक्येष्ववांतरभेदस्यतैनैवोररीकरणादित्याह।विविदिषंतीतिज्ञानसंयोगोज्ञानार्थत्वाद्द्वितीयेपिकिमे
तज्ञादस्यातगुरोःनाद्यइत्याह।उपरिहिदेवेभ्यइति।अधोधारणेनैकवाक्यताप्रतीतावपिउपरिहिदेवेभ्यइत्यस्यापूर्वार्थत्वेनोप
रिधारणविधिपरत्वंयथावांतरवाक्यभेदेनतथात्रापीत्यर्थः।इदमत्रविवक्षितंअधस्तात्समिधंधारयन्ननुद्रवेदित्यधोधार

त०त्व० णं विधीयते तत्रैवं श्रूयते उपरि हि देवेभ्यो धारयतीति तत्रेदं संदिह्यते किमुपरिधारणं विधीयते। उत नेति तत्र न विधीयत इति
२१ तावत् प्राप्तं। अन्यप्रकरणत्वात् वर्त्तमानापदेशत्वाद्वैसेवं प्रायप्पराद्धातितं।। ।।विधिस्तु धारणेपूर्वत्वादिति। उपरिधा
रणस्यान्यतोप्राप्तत्वाद्विधेयत्वमेष्टव्यं। अथापि स्यादन्यस्मादन्यत्रनीयमानं हविराघ्राणशिर्षे नीयत इति शिष्टाचारप्राप्तउ
परिधारणं अतो स्यान्यतोपिप्राप्तत्वात् विधेयत्वमेष्टव्यमिति। तत्रेदमभिधीयते हविः प्रच्छादनस्यान्यतः प्राप्तत्वेपि स्रुग्दंडो
परिसन्निधोपात्तात् दडुप्रदेशे धारणं विधीयते न तत्र वर्त्तमानापदेशत्वेनानुवादरूपत्वमधोधारणवाक्यैकत्वाच्च भक्त्या विधि
रास्थीयत इति शेषलक्षणे स्थितं तथा वाक्यवाक्येप्यवांतरवाक्यभेदेन श्रवणादिविधानमविरुद्धमिति। द्वितीयं दूषयति मल
वद्वाससइति दर्शपूर्णमासयोः श्रूयते तिस्रो रात्रीर्व्रतं चरेदंजलिना वा पयः पिबेदित्यादिना तत्र दर्शपूर्णमासैकवाक्येनापि राम० २१

व्रतकलापो विधीयते तदेकवाक्यतानुपपत्तेस्तद्वदित्यर्थः। तथा दर्शपूर्णमासयोरेव श्रूयते मलवद्वाससा न संवदेतेति किमयं प्रति
षेधः क्रत्वर्थः उत पुरुषार्थ इति जिज्ञासायामपि प्रकरणात् क्रत्वर्थप्राप्तौ राद्धांतितं प्रागवरोधान्मलवद्वाससइति तामप्यवरुध्यमेय
जेतेति सर्वास्मात् क्रतुव्यापारान्निवृत्त पारजस्वलपासंवादप्रसक्त्यनावात्र क्रत्वर्थत्वेन प्रतिषेधः स्वातंत्र्येण प्रवर्त्तमानपुरुषर
जस्वलयासंवादे प्रसक्तोसत्यां निषिध्यते पुरुषार्थतयेति। एतदभिप्रेत्य व्रतकलापविधानवचेति वशब्दं प्रायुक्तेत्यर्थः प्रकारांत
रेण श्रवणविधिमाह। अथवेति। पांडित्यबाल्यमुनिशब्दैः श्रवणमनननिदिध्यासनानि क्रमेण निर्दिश्यंते। तस्याथात्म
प्रकरणपठितस्य कथं श्रवणादिविधिपरत्वमित्याशंक्यापूर्वार्थत्वाद्विधिरंगीकर्त्तव्य इत्याह। सूत्रकारेणेति। सहकार्यंतर
विधिः पक्षेण तृतीयं तद्वतो विध्यादिवदित्यत्र वक्ष्यमाणत्वादित्यर्थः विधिसमर्थनमुपसंहरति। सर्वथेति। पक्षद्वयेपीत्यर्थः।

विधिसमर्थनफलमाहातइति। अस्तिश्रवणविधिः सर्वे संदिग्धार्थो यस्मात्तस्मादित्यर्थः समन्वयाद्यप्रतिपादकत्वात्सूत्रं शास्त्रा
संगतं तस्य शास्त्रादित्वं वा संगतमिति शंकाद्वयं निराचष्टे कर्त्तव्यइति। वशब्दः शंकानिवृत्त्यर्थः शास्त्रारंभकर्त्तव्यतासिध्युत्तरका
लीनत्वादुत्तरविचारस्येत्याद्यत्वं चिंताप्रकृतसिध्यर्थामुपोद्धातप्रवृत्तात्तरसुपोद्धातत्वेन शास्त्रे संगतिश्चेत्यर्थः। एकश्चशब्दोव
धारणार्थः। सचप्रतिपादितइत्यनेन संबध्यते। इतिशब्दः सूत्रनिरवद्यत्वोपसंहारार्थः। सूत्रनिरवद्यतायां वदं तदर्थप्रतिपाद
कभाष्यस्यापि निरवद्यत्वमित्याह तत्रेत्यादि। सूत्रस्यानिरवद्यत्वे सतीत्यर्थः भाष्यकारस्य व्याख्यानाचतुरतामाशंक्य। ननुप
दीति। विषयप्रयोजने अर्थात्सूत्रिते यदि तर्हि भाष्यकारेण विषयप्रयोजने प्रतिपादनीये इत्यन्वयः। हेतूपस्थापनेन विषयादेः
प्रतिपादितत्वात्तद्बोधावसरइत्याशंक्याह क्षेपेति। हेत्वाक्षेपेति। हेत्वाक्षेपसमाधानाभ्यां तथा प्रतिपादिते इत्याशंक्याह सूत्र

स्येति। व्यापारमिति तत्प्रतिपादनसामर्थ्यमित्यर्थः। भाष्यकृत्वाप विषयादिवाचकशब्दान्यां ते निर्दिष्ट्व्ये इत्याह साक्षादिति। प्रतिपा
दनमात्रमुपयुक्तं न तु साक्षादित्याशंक्याह अन्यथेति अवप्रतिपादनमसिद्धमित्याह तत्राहेति वशब्दः शंकाव्यावृत्त्यर्थः। जिज्ञासित
व्यमिति अस्मात्पूर्वं युष्मदाष्यं तदादि भाष्यं तत्रेत्यर्थः। भाष्यकारेण विषयादिकं प्रतिपाद्यमिति शंकायां प्रदर्शयिष्याम इति समाधा
नमनुचितमित्याशंक्याह। भाष्यकारेणेति। युष्मदस्मदित्यादेर्हेतूपस्थापकत्वेन भाष्यत्वसिद्धावाक्षेपानवसरमाशंक्याह। प्रथमग्र
थेति। न त्रेतदंतमनेन पर्यवस्यदितिविभागेन भाष्यार्थस्य प्रदर्शितेनेत्यत्राहानितएमिति। एतद्विवृणोत्याक्षेपे हेतूपस्थापकत्वात्यु
ष्मदित्यादेः कथमाक्षेपरतिवोदयति नवस्यानर्थेति हेतूपस्थापकत्वसिद्धमित्याह नेत्यादेति। अध्यासं विनापि विषयादिसिद्धेर्नो
ध्यासस्य तद्धेतुत्वमित्यभिसंधीः ननु विचारकर्त्तव्यतायाः श्रौतत्वात्तत्परित्यागेन प्रथममध्यासवर्णनं ततो विषयादिवर्णनं तत्तो

विचारकर्त्तव्यतानिरूपणमितिव्युत्क्रमः कस्मादित्यत आहात्रविचारेति। अत्रविचारकर्त्तव्यतादिष्विति क्रमनियममविवक्षित्वेति संबंधः
इतिपदपरामृष्टमर्थमाह। अध्यासेति। तत्रोपपत्तिमाह। विचारकर्त्तव्यतेति। उत्तरोत्तरेणेति पाठक्रमाभिप्रायेणेति द्रष्टव्यं। विषयप्र
योजनयोरध्यासाधीनतया वक्ष्यमाणत्वात्तदुपस्थापकस्य भाष्यत्वं युक्तमित्युक्तमुच्यत इत्यत्र तदसंगतं दृश्यमाणत्वेन ज्ञानस्यफल
त्वतश्चनाध्यासमपेक्षते ज्ञान्यध्यासस्यासूचितत्वात्तत्प्रतिपादकभाष्यमसंगतमित्याशयेनेशंकतेनानुब्रह्मज्ञानेति। बंधनिवृत्तेसु
चित्रितत्वमसिद्धमित्याहतवाहेति। किमनर्थहेतुनिवृत्तिर्मुखतः सूचितोतार्थात्। नाद्योनुपलंभात्रद्वितीयोऽनुपपत्त्यभावादित्याशं
क्याह। विचारेति। ब्रह्मज्ञानोद्देशेन विचारकर्त्तव्यता विधीयमाना ब्रह्मज्ञानस्यानर्थनिवृत्तिफलतामाक्षिपति। स्वरूपेण तस्यापु
रुषार्थत्वादित्यर्थः। अनर्थनिवृत्तेः सूत्रितत्वात्तन्मिथ्यात्वमेववर्णनीयं किं तत्स्वरूपथनिर्देशेनेत्याशंक्य शंकांतरनिरासार्थमि राम०
२३

ति दर्शयितुं शंकांतरमाहनन्विति। शरीराद्यतिमानपुरःसरं नरकपातादिजनितदुःखप्रमाहतायाएवानर्थत्वात्तत्रासंगतिरित्या
हानेत्याहेति। अनर्थनिवृत्तेः सूचितत्वमंगीकृत्याप्यासस्सूत्रेणमाक्षिपति निवर्त्ततां हीति। परमार्थस्यप्रपंचस्येश्वरज्ञाननिवर्त्त्य
त्ववद्ब्रह्मज्ञानेनापि निवृत्तिः स्यादित्यर्थः। दृष्टांतासंप्रतिपत्त्योत्तरयतिनेत्याहेति। वस्तुनापरमार्थसतानिष्पन्नं वस्तुकृतं वस्तुथा
तथावाकृतमित्यर्थः वस्तुनोज्ञानानिवर्त्यत्वमुपपादयति। तथाहीति ज्ञानस्यवस्तुनिवर्त्तकत्वं किं दृष्टवलात्किंवास्मृतिआधे
पितत् किंविषयं संबंधिनं निवर्त्तयति। उताश्रयसंबंधिनं किंवोत्तयसंबंधिनं। आद्येपिद्रमालोचनिपंकिंनियंतृत्वादिविशिष्टवि
षयंनिवर्त्तकं उतकेवलविषयं। तत्रनाद्यः सगच्छतेव्यभिचारादित्याहचित्रेति। चित्राख्यरूपस्यैकत्वेनतत्रनीलरूपाद्यभावात्क
थंनीलज्ञानस्यनीलाधनीवर्त्तकत्वमुदाह्रियत इतिचेत्तमेवं। चित्रावयव्यारंभकनीलविशिष्टवस्तुज्ञानस्यानिवर्त्तकत्वोदाहृते

तत्व० २४ नीविरोधः नवतदाचित्रावयविनीतिपदवैयर्थ्यंशंक्यंनीलज्ञानस्यस्वविषयनिवर्त्तकत्वेचित्रावयविन एवानुपपत्तिरितिप्रदर्श
नार्थत्वात्।नानारूपसमाहारश्चित्रमितिव्योमशिवबृष्टिंप्रतिभासंवापेक्ष्येदमुदाहरणमित्यर्थः केवलविषयज्ञानंतद्गुणनियंत
त्वादिनिवर्त्तकमित्यत्रापिव्यभिचारमाहस्वविषयसमवेतमिति।नीलत्वज्ञानस्यनरसादिनिवर्त्तकत्वमावरोधात् विशुद्धात्मवि
षयंपुनस्तद्विरोधिनंनिवर्त्तयतीत्याशंक्यतत्रापिव्यभिचारमाहविरोधिनंचेति।विषयगतव्यवहारयोग्यत्वंयथानीलज्ञानेन
निवर्त्ततेतद्वदत्रापीत्याशंक्याज्ञाननिवृत्तावयोग्यतानिवृत्तेः तज्ज्ञातनिवर्त्त्यत्वमित्याहस्वविषयानवबोध एवेति।ज्ञानप्रागभा
वस्यवस्तुसतोपिज्ञाननिवर्त्त्यत्वंदृष्टमित्याशंक्यप्रागभावनिवृत्तेर्ज्ञानमात्रत्वाभ्युपगमात्ज्ञानप्रागभावस्यनिवर्त्त्यत्वमित्या राम०
ह।केवलइतिद्वितीयंपक्षमुत्थापयति।स्वाश्रयेति।जीवगतनियम्यत्वादिप्रपंचनिवृत्तौतत्साक्षीनियंतृत्वादेरपिब्रह्मगतोऽर्थ २४

न्निवर्त्ततइत्यर्थः।व्यभिचारान्नायंपक्षः साधुरित्याह।नघटादिज्ञानेनेति।तृतीयंपक्षंदूषयति।नवाश्रयेति।ज्ञानस्ययावदाश्रयवि
षयोतदुभयंसंबंधिवस्तुनिवर्त्तकंज्ञानमात्मज्ञानस्यात्मैवाश्रयोविषयश्चेतेनतद्गतोबंधस्तत्ज्ञानान्निवर्त्ततइतित्रामतांतरम
शंक्याह।नचेति।कुतइत्याह।आत्मनइतिमदीयमिदंशरीरमितिज्ञानस्याश्रयआत्माशरीरंविषयस्तयोः संबंधस्तु आश्रयवि
षयसंबंधीसंबंधस्यद्विष्टत्वात्तथापिननिवर्त्ततेऽतोनेयंव्याप्तिरित्यर्थः।कर्तृत्वादेराश्रयविषयसंबंधिनोज्ञाननिवर्त्त्यत्वानुप
पत्तिरित्यक्षरार्थः सभादिरादिशब्दार्थः।श्रुतिबलात्ज्ञानस्यवस्तुनिवर्त्तकत्वमितिपक्षमुत्थापयति।नतुनदृष्टेति।येनेत्यस्याय
मर्थः।दृष्टबलात्ज्ञानान्निवर्त्ततेबंधइतिपक्षेज्ञानस्यवस्तुनिवर्त्तकतायाअदृष्टेरध्यस्तत्वंस्यादिति।तथाविद्वान्नामरूपाद्विमुक्त
इत्यादिरागमः वस्तुसतोज्ञाननिवर्त्त्यत्वासंभवान्मायात्मकबंधस्यज्ञाननिवर्त्त्यत्वंश्रुत्यर्थः इतरथादृष्टविरोधाच्छ्रुतिप्रामाण्यंपत

तत्व०
२५

स्यादितिपरिहरति। ननुक्तेति। क्तेरप्युपपत्त्यपेक्षादर्शत्तेनाह। यथेति। आग्नेयोष्टाकपालः उपांशुयाजमंतरायजति। अ
ग्नीषोमीयमेकादशकपालमिति। पौर्णमासत्रंया आग्नेयोष्टाकपालः ऐंद्रंदधिऐंद्रंपयइति दर्शत्रयंइत्येतेषांषण्णांयागानाम
धिकारापूर्वसाधनत्वोपपत्त्यर्थमपूर्वाणिकल्प्यंतइति संबंधः। नन्वपूर्वसाधनत्वस्याभावात्तत्रोपपत्त्यपेक्षेत्यत्राह अधिकारेति।
परमापूर्वविषयतयेत्यक्षरार्थः। अयंभावः। स्वर्गकामोयजेतेत्यत्रलिङालौकिककार्यव्युत्पत्त्यनुरोधेननियोगस्तावदुपलक्ष्यते। नि
योगश्चाधिकारिविषयावंतरेणानुपपद्यमानोधिकारिविषयावाक्षिपति। तत्रकस्यकुत्रनियोगइति विषयाकांक्षायां यागोवि
षयत्वेनसंबध्यते यागेति योगविधि इति। तदिदमुक्तं। अधिकारापूर्वेतिनियोगप्रतित्युपयोगित्वंविषयशब्दार्थः यागविषयोनि
योगः कृतिसाध्यतायाप्रतीयमानः साक्षात्कृतिसाध्यत्वात्स्वस्यकृतिसाध्यत्वनिर्वाहार्थविषयतयाच्चितानांतेषामेवकरणत्व

रामं०
२५

MEMORIA

माक्षिपति। तदेतदुक्तमपूर्वकरणेतिनियोगनिष्पत्त्यनुबंधित्वंकरणशब्दार्थः। तदिदमुक्तंशालिकायां। कृतितत्साध्यमध्यस्थो
यागादिर्विषयोमतः। कार्यसंघटिताकारेकरणत्वेनसंमतइति। यागानामेवप्रधानापूर्वकरणत्वात्किमवांतरपूर्वैरित्याशंक्य
किमेकैकयागनिष्पत्त्यनंतरमपूर्वमजनिकृत्सर्वनिष्पत्त्यनंतरमितिविकल्पाद्यंदूषयति। कालांतरेतिदर्शपूर्णमासाभ्यामिति
तृतीययासमुच्चितानांकरणताप्रतीतेर्नाद्यंयष्टः साधुरित्यर्थः। द्वितीयंदूषयति। क्रमभावीति। देवतोद्देशेनद्रव्यत्यागलक्षणा
नांयागानांसकृदनुष्ठानंनसंभवतीत्यर्थः क्रमेणोत्पन्नास्तएवमिलिताः कार्यहेतवइत्याशंक्यलाक्षणीकृत्वान्मेलनमेनानुपपन्न
मित्यभिसंधिनोक्तंकर्मेति। अपूर्वाणामपियागवत्क्रमभावित्वात्संभूतहेतुत्वमनुपपन्नमित्याशंक्योक्तंमध्यवर्तीनीति। यागप्रध
नापूर्वयोर्मध्येस्थितानीत्यर्थः। नचैतावत्तायागकरणताभंगः। तेषामेवसूक्ष्मरूपत्वादपूर्वाणामित्याह। वांतरेति। परमापूर्वम

नेस्य यांतरेतिविशेषणंनन्ववांतरापूर्वंफलसिद्धेः किमंतर्गडुनापरमापूर्वेणनंव लिंगादिबलात् तत्तत्त्यत्यात्रन्नान्निराकरणमितिशं
क्यं। तस्यप्रसयार्थत्वासिद्धेरितिमन्वानंप्रतिदृष्टांतांतरमाह। पथेति। यागगतस्येत्यनुषंगः एषाभाट्टप्रक्रियायजेतेत्युक्तेशाब्दभा
वनाभाव्यत्वेनपुरुषप्रवृत्तिलक्षणार्थभावनाप्रतीयतेसाचभाव्यकरणेतिकर्त्तव्यतारूपमंशत्रयमपेक्षते। तत्रयद्यप्येकपदोपात्त
त्वेनयागस्यभाव्यत्वंप्रतियत्तेतथापिक्लेशात्मकत्वेनतस्यभाव्यत्वासंभवात्। तत्रयदोपात्तस्वर्गोभाव्यत्वेनसंबध्यते। यागःक
रणत्वेनप्रयाजादिरितिकर्त्तव्यतात्वेन। तत्रयागस्यक्षणतंगुरस्यसमयांतरभाविफलसाधनतानुपपत्तेःक्तकरणत्वनिर्वा
हाया पूर्वंकल्प्यतेयथातथाक्तवंधध्वंसनिर्वाहार्थंबंधस्यमिथ्यात्वंकल्पनीयमितिदृष्टांतोविषमइतिशंकते। ननुनत्रेति। स्वर्गापू
र्वेति। भाट्टमतेस्वर्गसिध्यर्थमपूर्वंकल्प्यतं। गुरुमतेपरमापूर्वसिध्यर्थमितिविभागः सेतुंदृष्ट्वासमुद्रस्यब्रह्महत्यांव्यपोहतीत्यादि

वचनात्तत्तदुरितस्येसेतुदर्शनेनध्वंसवत्तत्तत्वंधस्यब्रह्मज्ञानान्निवृत्तिसंभवाद्वैषम्यमित्यर्थः। साम्येनसमाधत्तेतर्हीहापीति। सेतु
साक्षात्कारमात्रात्दुरितनिवृत्तिर्नस्मृत्यर्थः। सेतुस्थानामपिदुरितनिवृत्त्योतत्फलभागित्वप्रसक्तेः। किंतुदूरदेशागमनछत्रपादुका
विधुरत्वस्वकृतोद्घोषणादिनियमकलापयुतस्यसेतुदेशप्राप्त्याकल्पषनिवृत्तिः तस्माद्दृष्टांतासिद्धेर्वैधवैतथ्यसाम्येयं। ज्ञाननि
वृत्त्यत्वसिद्धयइतिभवः तार्क्ष्यस्मरणंसत्यंविषंनाशयतियथा। यथावाविषयदोषदर्शनंसत्यरागस्यनिवर्त्तकंतद्ब्रह्मज्ञानात्सत्यंवंधध्वं
सइतिशंकानिराकंनुमज्ञानस्येवेत्युक्तं। नतावत्तार्क्ष्यस्मरणमात्रस्यविषाणांशमयितृत्वंकिंतुध्यानंमंत्रप्रयोगादिक्रियायाःइत
रथातिप्रसक्तेः। नचविषयदोषदर्शनरागनिवर्त्तकंरागविरुद्धवेलोहृत्सुदयाद्रागानवृत्तिरित्यर्थः। तद्यदित्यादिग्रंथफलितपरतया
त्याहरोतिअतइति। सूत्रार्थश्चासोविचारकर्त्तव्यतावेतितथातस्याउपपत्तिर्याभ्यांतेसूत्रार्थविचारकर्त्तव्यतोपपत्तीतेचार्थप्रये

तत० २१ जनेवेति तथोक्तेतयोसाधनयेतिविग्रहप्रसग्वत्वैक्यमर्थशब्दार्थः। सूत्रार्थोयपत्त्युपयोगीतयेत्यस्यायमर्थः विचारकर्त्तव्यतारूपस्यसू
त्रार्थस्योपपत्तिर्याभ्याविषयप्रयोजनाभ्यांतेसूत्रार्थोपपत्तीतदुपयोगितयाबंधस्याविद्यात्मकत्वप्रदर्शनद्वारेणाध्यासोवर्णनीयइ
ति। मिथ्यात्वसूत्रणमंगीकृत्यप्रथमप्रतिपादनेकोहेतुरितिशंकते। ननुसूत्रेणेति। विषंभुस्वेत्यादिवाक्यात्प्रथमप्रतिपन्नस्या
प्यनुपादेयत्वंतद्वत्रेत्याह। प्रतिपाद्यमिति। एकेनोभयोरप्रतिपत्तेः कथंवरमेत्युक्तंतत्रहार्थिकेतिप्रयोजनविवक्षयाप्रथमप्रतिपा
दनमित्याहतत्राहेति। अध्यासभाष्यस्याध्यासबोधःप्रयोजनंततस्तत्रोपोद्धतिहेतुरितियोजना। उपोद्घातप्रतिपादनयोर्भेदाभा
वात्तोयोद्घातइतिविशेषणंतत्राहंप्रतिपाद्यमितिशब्दवर्णनव्यावर्त्तयत्यर्थेति। प्रतिज्ञावर्णनंव्यावर्त्तयितुमर्थांतरेतिअसबद्धार्थ
वर्णनव्यावृत्त्यर्थंतदर्थमिति। तदुपयोगितयेत्यर्थः। अग्निमानयमितिप्रतिज्ञायधूमवत्वादित्यर्थांतरवर्णनंव्यावर्त्तयिंतुप्रतिपाद्य रामु०

अर्थेउद्धौसंगृह्येत्युक्तं। तावन्युक्तेवुद्धौसंगृह्यपश्चात्प्रतिज्ञाययद्वर्णनंतस्योपोद्घातत्वंव्यावर्त्ते। धेनुप्रागेवेति। शब्दप्रयोगात्सागेवे
त्यर्थः। प्रतिपादनस्वरूपमाहप्रतिपाद्यमितिप्रतिपाद्यंप्रतिज्ञायहेतुवर्णनमित्युक्तेउपोद्घातेपिप्रसंगःतदर्थंवहिरिवेति। अव
यवविपर्यासेनाप्राप्तकालतांव्यावर्त्तयतित्यश्चादिति। असंबद्धहेतुव्यावृत्त्यर्थंतात्सिद्ध्येति। अध्यासस्यविषयफलसिद्धिहेतोःक
थंतंत्रशब्दवाच्यशास्त्रोपोद्घातत्वमित्याशंक्याहतंत्रमिति। तंत्र्यतेप्रतिपाद्यतेइतिव्रह्मात्मैक्यंतंत्रमित्युप्यतेधातूनामनैका
र्थत्वात्तंत्रिकुटुंवधारणइतिधातोःप्रतिपादनार्थत्वादित्यर्थः। व्रह्मणोनादित्वात्तत्वप्रक। शत्वाच्चनाध्यासस्यतद्धेतुत्वमितिशंक
ते। ननुभवत्विति। शास्त्रार्थप्रतिपत्तिप्रतिवंधनिवृत्त्यावध्यासवर्णनोपयोगइतिसमाधिग्रंथार्थः तथाचेति। यथाध्यासस्यतंत्रा
र्थहेतुत्वंतेनप्रकारेणेत्यर्थः। ऐदंपर्यस्यशब्दधर्मत्वात्कथंचैतन्यैकरसतेतिसामानाधिकरण्यमित्याशंक्याहेदंपर्यमितिपोन

तत० २८

त्यं निरस्यति। तदेवेति। तात्पर्यस्य प्रतिपाद्यमानत्वात्प्रतिपादितमिति कथमुक्तमित्यत्राह्। अयमनर्थ इति। तत्रार्थे निर्दिष्टे तस्याध्या
साधीनत्वं निर्देष्टव्यं ननु विरोधप्रदर्शनं उचितमित्याशंक्य तदपि अध्यासोपयोगित्वयेत्याह् तत्रार्थमिति शास्त्रविरोधात्सुखाद्य
वभासस्याप्रामाण्यमित्याशंक्याह् प्रत्यक्षेति ज्येष्ठत्वात्तस्य प्राबल्यमित्यर्थः। नाहं दुःखी त्यादि विद्वत्प्रत्यक्षविरोधादितरस्य
भासत्वमाशंक्य तस्यासप्रतियत्नेनैतदित्याह्। बाधितकल्पेतेति विषयादेरध्यासाधीनत्वे पितद्वर्णनमनर्थकं शास्त्रोन्द्य
यादध्यासस्य निवृत्तौ विषयादि सिद्धेः समारोपितरजतादेरध्यस्ततावोधं विनाथधिष्ठानसाक्षात्कारनिवृत्तिरिवेत्याशय
वानाह्। ननु शास्त्रमिति। लोकावलोकितपदार्थशक्तियोग्यतानुसारेण पदानामर्थवोधकत्वं। न च वंधवैतथ्यवोधं विन राम० २८
प्रत्यक्ब्रह्मणोरेकत्वयोग्यताधिरानुशक्या। तस्मान्मिथ्यात्ववर्णनमुचितमित्यतिप्रायेणाह्। तत्राहेति। जरद्गवः कंवलपा

दुकाभ्यां द्वारि स्थितो गायति मंगलानि। तं ब्राह्मणी पृच्छति पुत्रकामा राजन्नुमायां लशुनस्य कोर्व इति। जरद्गवादिवाक्यशब्देन
गृह्यते शंखः कदल्यां कदली च तेय्यामेर्य्याम हद्वाविरभूद्दिनानां। इत्येतदादिशब्दिशब्दार्थः विद्यांतरेणाध्यासस्य सूत्रार्थ
त्वां शंकतो ननु शास्त्वेति। तस्य वर्णनमेवायपोगि ननु मुख तइत्याशंक्याह् अन्यर्थेति। मुखतोवर्णनीय इत्यत्र किं साक्षा
द्वर्णनेन भवितव्यमिति विवक्षीतमुतार्थादिति विकल्पाद्यं प्रत्याह् तत्राहेति द्वितीयमुत्थापयति तदुपोद्घातत्वादिति समन्वय
भावे विरोधाशंकानात्रतासयोर्निर्विषयत्वमुक्तं तदनुपपन्नसत्यत्ववादिनं प्रति मिथ्यात्वसाधनसंभवादित्याशंक्य नयरःपक्ष
प्रतिक्षेपमात्राभिप्रायेण सूत्रकृतः प्रवृत्तिः किंनु तत्वनिर्णयाभिप्रायो णेत्याहार्थनिर्णयेति। अर्थनिर्णयः प्रधानमुद्देश्यं यस्या
सावर्थनिर्णयप्रधानस्तस्य भावस्तत्वं तस्मादित्यर्थः अर्थविशेषसमन्वये प्रदर्शिते सति प्रत्यक्षादिविरोधशंकायां मिथ्यात्वप्रति

तत्व०
२९

पादनेनतन्निराकरणोपपत्तिरितिटीकार्थः।संप्रतिसूत्रानानुसारित्वंभाष्यकृतःशंकतोत्तर्दीति।विषयप्रयोजनवशादितिलंघन
मित्याहतत्रादेति।सुखप्रतिपत्तिर्वाकस्मादित्याशंक्याह।सुखप्रतिपत्त्यर्थमिति।युष्मदित्यादेरुक्तविषयाभाष्यत्वसिद्धौकिंमंग
लाचाराक्षेपसमाधानाभ्यामित्याशंक्यतयोरप्यव्याख्येयत्वव्याख्येयत्वयोः पर्यवसानात्तेउक्तेइत्याहैवमपीति।मंगलाचरणं
वाकस्मादित्याशंक्याहविघ्नेतिइतोपिमंगलाचरणंकार्यमित्याह।शिष्टाचारेति।शिष्टाचारेणानुष्टेयोतिप्रसंगादितिशंक
ते।ननुशिष्टानामिति।किंशिष्टानामाचारमात्रस्यानुष्ठेयत्वंउततद्विशेषस्यतत्राद्यस्त्वंगीक्रियतेद्वितीयस्त्वसंगतइत्याह
नेत्याहेतिअतिप्रसंगस्यकःसमाधिरित्याशंक्याचारंविशिनष्टिस्वारइति।धार्मबुध्यानुष्टीयमानस्यशिष्टाचारस्यानुसरणी
यत्वंश्रीनिवनादेश्चानीदृक्त्वात्अननुष्टेयत्वंनचतस्यप्रमाणत्वाभावःमूलश्रुतिस्मृत्यनुमापकत्वात्तथात्वे।आचारात्तुस्मृति राम० २९

त्वात्।स्मृतेश्चश्रुतिकल्पनमितित्यर्थः।प्रामाण्यप्रतिपादनफलमाह।कर्त्तव्यमिति।मंगलाचरणेपिक्वचिदपरिसमाप्तिदर्शनात्क्व
चिन्मंगलाचरणंमंतरेणापिपरिसमाप्तिदृष्टेस्तदप्रयोजकमितिशंकतेननुप्रयोजनेति।यत्रापरिसमाप्तिस्तत्रप्रतिबंधबाहुल्यंयत्रमं
गलाचरणविनापिपरिसमाप्तिस्तत्रयंथादूहिमंगलाचरणंकृतमितिनिश्चीयतइत्याशयेनाह।नेत्याहेतिमंगलाचरणस्यान्यत्र
फलवत्वेपिनात्रानुष्टेयत्वफलासंभवादितिशंकते।नचत्रेति।ग्रंथकरणस्यव्यासादिनुष्ठफलवत्वात्रविघ्नसंभवइत्यर्थः।मननंश्र
वणसाधनत्वेनप्रसिद्धं।तथावैदिकादिसकलभोगव्यावृत्तचेतस्कस्यग्रंथकरणंमननं।तत्रचविघ्नःसंभावितइत्यभिप्रायेणाह।ते
त्याहेतिप्रवृत्तेर्निश्चयपूर्वकत्वादत्रचविघ्नानिश्चयात्रतन्निर्हरणार्थाप्रवृत्तिरितिशंकते।ननुसंभावनेति।कृष्यादाविवसंभावनया
पिप्रवृत्तिःस्यादित्याशंक्यदृष्टादृष्टफलत्वेतवैषम्यान्नैतदित्याहकिंचेतिलोकप्रसिद्धेर्दृष्टात्मप्रसिद्धिंवत्रिमूलत्वात्रनिश्चापकत्व

तत० ३०

मितिशंकते।ननुलोकेति।निर्मूलत्वमसिद्धमित्याह।तत्राहेति।प्रत्यक्षेनेसतिदेवताप्रत्युत्तं निवर्त्ततेयस्मात्तस्मात्एषांदेवानामित्यर्थः।
अत्रोच्यतइत्यैमंगलाचरणस्यासमर्थतातप्रश्नानुसारित्वंप्रतिवचनस्येत्याशंक्याहसर्वदेति।परमात्मगलात्मतत्त्वानुस्मरणस्या
प्रत्यक्षत्वात्त्मानांतराभावाद्वकृतमंगलत्वमसिद्धमित्याह किंतत्रेति।प्रमरणाभावोसिद्धइत्याहातआहेति।टीकायांभाष्यत्वेमेवप्र
मर्थ्यतेनप्रामाण्यमित्याशंक्यापेक्षितंपूरयतीत्यंतमितियुष्मदित्यादिभाष्यंमंगलाचरणेप्रमाणमित्युक्तं।संप्रतितद्वारादिशब्दो
चारणावत्स्वरूपमेवमंगलाचरणमित्याहमंगलाचरणंचेति।प्रमाणत्वमाक्षिपतिकथमीति।तत्त्वानुस्मरणंकिंपदार्थउतवाक्या
र्थः।नाद्यः तद्वाचकपदश्रवणाभावात्।नांत्यः।संसृष्टपदार्थानामेववाक्यार्थत्वादित्यभिसंधिः उच्चारणानुपपत्त्याभाष्यंमंगलाच
पागमकमित्याहतत्राहेति।देवतानुस्मरणमंगीकृत्यतस्यमंगलाचरणपरत्वानाशात्रविघ्ननिवर्त्तकत्वमितिगूढाभिसंधिःशंकते।न

रासु० ३०

नुनेहेति।अनुस्मर्यतइत्यत्रस्यानंत्रेणेतिशेषः।यथाश्रुतमादायसमाधत्तेसत्यमितितत्कथंचनेत्यस्यैषोर्थः।परमार्थतएवंभूतेनिर
स्तसमस्तोपप्लवेतद्विपरीतरूपप्रतिभासःकथंचनमिथ्येतिकथयितुंतद्भाष्यमितिसंबंधः।कथंचनेतिस्वरूपेणासंसृष्टस्वरूपेणचमि
थ्येत्यर्थः।कथंचनमिथ्येतिवासंबंधः चशब्दादूर्ध्वंतरंचमिथ्येत्यर्थः।एतदभिसंधिविवृणोति।नन्वत्यपरत्वादिति।अन्यपरस्यापिवि
घ्ननिवर्त्तकत्वंस्यादित्याहनेत्याहेति।तस्मात्परमार्थभूतादुत्कृतोन्योध्यासाभावस्तदन्यस्तत्परादितिटीकार्थः।अन्यपरस्यकथमन्या
र्थत्वंअन्यत्रतथादृष्टेरित्याशंक्याहान्यार्थमिति।नचात्रप्रमाणाभावःहरिर्हरतिपापानिदुष्टचित्तैरपिस्मृतः।अनिच्छयापिसंस्पृष्टोद
हत्येवहिपावकःइतिस्मरणादित्यर्थः।प्रारभ्येयत्वस्यानुपसंहरणेकोहेतुरित्याशंक्याहेनूपसंहरणाद्विनूमदुपसंहरणमपिविवक्षित
मित्याहप्रारभ्येयत्वमिति।युष्मदस्मदित्यादिकस्मादुपेक्षितंटीकाकृतातत्राहान्यार्थेतिमंगलाचरणसमर्थनप्रवृत्तेनेतियावत्।

तत्व॰ ३१

पदद्वयमिति। युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोरिति प्रत्यगभिधायकशब्दव्याख्यानेपीतरस्याव्याख्यातत्वात् कथं
युष्मदस्मदिति व्याख्यातमित्युक्तं तत्राह। अर्थादिति। सर्वेपि त्वचरादितरस्तुत्यात प्रतियोगिविषयत्वेन तदपि व्याख्यातमित्यर्थः।
उत्तरपदं तमःप्रकाशवद्विरुद्धस्वभावयोरिति। यदिदं विरुद्धस्वभावयोरिति पदं व्याविख्यासितं तद्धि विषयविषयिणोरिति क
स्मादुपात्तमिति चेत्। आत्मानात्मनोः सहावस्थानस्योपलभ्यमानत्वात् तादात्म्यायोग्यत्वं विरोध इति प्रतिपादयितुमिति ब्रू
मः। व्याख्यातमिति। सर्वेपि त्वचरादित इत्यत्रेत्यर्थः। आङ्पूर्वाद् दानास्याविहरणे वर्त्तमानाद्ददाते रात्मनेपदं भवतीत्येवमर्थादाङो
दोनास्यविहरण इति सूत्राद् आदत्त इति प्रयोगेण भाव्यमिति चेत् नैतदस्ति ङिद्विशिष्टस्याकारस्य ग्रहणमङिद्विशिष्टादाकारादुत्त
रस्य ददाते रात्मनेपदनियमाभावज्ञापनायात्र वङिद्विशिष्टस्याकारस्याग्रहणात् भिक्षामाददातीति वत् प्रयोगः साधुरिति राम॰ ३१

इष्टव्यांसांगाध्ययनानंतरं श्रोतव्य इत्यादिवाक्यादात्मनश्च साक्षात्काराय विचारकर्त्तव्यताप्रतिपत्तौ संदेहे च तद्धरासार्थमथातद
ति प्रवृत्तं तत्रायं विचारः कर्त्तव्यः उत नेति विषयादिसंभवासंभवाभ्यां संदेहे नेति तावत्प्राप्तं विषयाद्यसंभवात्। न च प्रत्यक्त्वेनै
कत्वानर्थनिवृत्त्यादेः शास्त्राप्रतिपत्तेरसंभवो सिद्ध इति शंक्या कर्तृत्वादिबंधस्य परमार्थत्वेन तदनुपपत्तेः। न च परमार्थत्वमसि
द्धं मध्यस्तत्वादिति वाच्यं। पूर्वानुभवसंस्कारसादृश्यविवेकाग्रहरूपाध्यासव्यापकाभावेनाध्यासानुपपत्तेरिति प्रतिपाद
यितुं युष्मदस्मदित्यादिकमवतारयामासा तत्र परमार्थस्थले ऐक्यतादात्म्याभावेनेतदनुभवसंस्काराभवं दर्शयितुमैक्याद्ययोग्य
त्वमाह। युष्मदिति। युष्मच्चास्मच्च युष्मदस्मदीयं तावेव प्रत्ययौ गोचरौ चेति। युष्मदस्मत्प्रत्ययगोचरौ तयोरिति द्विग्रहः नतु प्र
त्ययोत्तरपदयोश्चेति सूत्रेण युष्मदस्मदोर्मपर्यंतस्य त्वमादेशविधानात्त्वन्मप्रत्ययगोचरयोरिति निर्देशेन भवितव्यं। तत्सुत्रो

तत्त्व० ३२ मत्युत्तरइतियथेतिवचनेनैतेदस्तित्वमावेकवचनाधिकारात् युष्मदस्मदस्मदोश्चैकार्थवाचित्वस्याविवक्षितत्वात्।अस्मदर्थेष्वो
पाधिकभेदस्याविद्यमानत्वात्।त्वमादेशोनभवतःइतिद्रष्टव्यं।पराग्रूपोहंकारादिर्युष्मदर्थः।प्रत्यक्चैतन्यमस्मदर्थइतिस्व
भावतोविरोधोदर्शितःएकःप्रतीतिरूपःप्रत्यक्प्रतीतिविषयइतरइतिप्रतीतितोविरोधः।अहंकारादिप्रविलापनेनाहब्रह्मे
तिव्यवह्रियतेप्रत्यक्चाद्वैतानंदप्रव्यादनेनकर्त्रादिरूपेणव्यवह्रियतेइतरइतिव्यवहारतोविरोधः।तादात्म्यायोग्यत्वमाहविष
यविषयिणोरिति।तदेतदभिप्रेत्योक्तं सर्वोपप्लवरहितोविज्ञानघनःप्रत्यगर्थइतिति।कोयंविरोधइत्यत्रकिंशब्दःप्रश्नार्थः
आक्षेपार्थोवा।नाद्यःविरोधशब्दस्यप्रसिद्धार्थत्वात्।नांत्यःचिदचितोर्विरोधस्यप्रसिद्धत्वादेव।ततश्चायंग्रंथोसंगतइत्या
शंक्याविरोधशब्दस्यानेकार्थत्वाद्व्यक्तिविशेषजिज्ञासयाप्रश्नोघटतइत्याहतत्रेति।लोकइतियावत्तादृत्म्यलक्षणेतरेतरभा
वानुपपत्तेर्दृश्यमानत्वात्तद्योग्यत्वंविरोधइतिनिश्चीयमतइत्याशंक्यासापिसंदिग्धेत्याह।द्विविधेति।इतरस्मिन्यतिइतर राम० ३२

स्वभावःसहावस्थानं।इतरस्येतरभावस्तादात्म्यमितीतरेतरभावभेदात्तदनुपपत्तेर्भेदइतिद्वैरूप्यांप्रश्नपूर्वकंद्वैविध्यंदर्शयति।
कथमित्यादिना।सामर्थ्याभावेकोहेतुरितिनप्रष्टव्यंस्वभावत्वादित्याह।पदार्थेति।प्रश्नोत्तरंविहाययक्षांतरनिरसनमयुक्तमि
त्याशंक्योत्तरपक्षंकदीकर्तुमाद्यपक्षप्रतिक्षिपतीत्याह।तत्रप्रथममितिसहानवस्थानंलक्षणंगमकंयस्यायोग्यतालक्षणविरो
धस्यसतथातमःप्रकाशयोरेवोदाहृतत्वात्तत्रैवसहावस्थानंवक्तुमुचितंनच्छायादिष्वित्याशंक्यतमःप्रकाशनिदर्शनेदूषितेय
दिलक्षणयालक्षितलक्षणयावाछायातपादिनिदर्शनमादधात्तदात्रापिदोषतुल्येतोच्यतइत्याशयवानाहतत्रेत्यादिना।पू
र्वस्यापिसिद्धांतत्वादुच्यतइतिसिद्धांतायक्रमोयुक्तइत्याशंक्यसहानवस्थानविरोधेदूषितेकोसौविरोधइतिशंकायांपरस्यतान
त्म्नालक्षणोविरोधोविवक्षितइत्याहेदानीमितितादात्म्ययोग्यताभावेपिइदंतूप्यमित्यादौतादात्म्यहेतोर्नायंहेतुःसाधुरि

तत्व० ३३

स्याशंक्योक्तंटीकायांनजातिव्यक्त्योरिति।आत्मानात्मानौनवस्तुतइतरेतरभूतौईतरेतरभावायोग्यत्वात्तमःप्रकाशवदित्युक्तंतत्रसा
ध्याभावेपिसाधनंनकिंनस्यात्।नवदा।नवतदातमःप्रकाशयोरपीतरेतरभावप्रसंगःतयोर्भावाभावरूपतयातदनुपपत्तेरित्यप्रयो
जकत्वंभावाभावात्मतालक्षणमुपाधिंवाशंकते।ननुतमोनामेति।विवादाध्यासितआलोकाभावस्तमःशब्दवाच्यःइतरेतराभा
वव्यतिरिक्तत्वेसत्यालोकाभावत्वाद्व्यतिरेकेणालोकवदित्याद्यनुमानैरालोकाभावत्वमाक्षिपत्काणभुगादयःइतरेतरव्य
तिरेकाभ्यांरूपदर्शनाभावस्तमइतिमेनिरेउभयत्रसाधारणदोषमाहान्यतइति।तमोनाभावःधर्मिप्रतियोगिनिरपेक्षप्र
तीतित्वात्कुंभवदित्यनुमानेनतमालमालाश्यामलंतमइत्यनुभवानुगृहीतेनविरोधेइतरस्यानुत्थितेर्नाभावत्वमित्यर्थः।हे
तोरेणोपराहतिमाहउपपद्येति।तमोनाभावःअवस्थावत्वात्रूपवत्वाद्घटवत्।नचासिद्धिर्हेतोरित्याह।उपलभ्यमानमिति। राम० ३३

पःपुनर्मन्यतेतमःप्रतीतिर्विभ्रमइति।तथाहिनिमीलिताक्षस्योपलभ्यमानंतमःकिंबाह्यमुतांतरमिति।नाद्यःबहलालोकवितते देशेत
दसंभवात्नद्वितीयःबहिःप्रसृतानांतापनरश्मीनामंतरतमोग्राहकत्वाभावात्।अन्यथानयनांतस्थांजनग्रहप्रसंगइति।तंप्रत्याह
बहलेति।निमीलितनयनस्यवांधकारोपलब्धिःतद्गोलकांतवर्तितमोदर्शनमित्यन्वयः।आंतरस्यातमसोदर्शनेनवाह्यस्येत्यत्रहेतु
माहआलोकेति।मंदप्रभप्रदीपेमंदिरेतयोःसहावस्थानंदृष्टमितिकथमालोकवितते देशेतमसोसंभवइत्याशंक्याह।बहलेति।
उपलंभकाभावान्नांतरस्यतमसउपलंभइत्युक्तंनिरस्यति।नविरुध्यतइति।तत्रदृष्टांतःपिहितकर्णेति।पिहितकर्णपुटस्यापि
श्रोत्रादेशांतरशब्दोपलब्धिवद्दंतमुखेलोचनरश्मिभिरांतरतमोगृह्यते।नचातिप्रसंगःआंतरतमोग्राहकत्वेस्याजनग्राहकत्व
व्याप्ततात्।प्रशिथिलमूलतयातत्काभासत्वात्।विमतस्यगतांजनग्राहित्वसंयुक्तत्वात्।यद्येनसंयुक्तंतेनतद्गृह्यतेयथासंनमस
जलादिसंयुक्तंलोचनमितिविवक्षितत्वान्नोक्तदोषावसरइतिचेत्।तत्रसंयोगित्वमात्रग्राहकत्वप्रयोजकत्वेनविवक्षितंउतयोग्यतावत्व

तत्व० ३४ विशेषितः। आधेयगगनदिगादीनपि गृह्णीयात्। द्वितीये सिद्धिः नवोद्भूतरूपवत्वेन तत्सिद्धिरिति शंक्यं तथात्वेप्यतिसामीप्येन ग्रा
ह्यत्वानुपपत्तेः। न च प्रकृते एतत्समानं कार्यदृष्टादृष्टाभ्यां विशेषात्। उद्भूतस्पर्शस्यापि धूमस्यालोकवन्नदेशे त्वक्ग्राह्यत्वेप्यन्य
ज्ञेतयात्वचित्रिसानुभवप्रसादाद्द्रव्यांतरं तमः सिध्यतीत्यर्थः। ननु तमः किमनादि उत सादि। नाद्यः। आलोकध्वंसे तदनुत्पत्त्यनुभाव
त्। नेतरः। किं वनु विधाः परमाणवः कारणं उतान्यत्। नाद्यः। तेषां स्वंशावयविपरंपराया महाद्रव्यारंभकत्वात्। न च तदुपपद्यते।
आलोकापगमसमसमयमेवोत्पत्तेः। न द्वितीयः। तत्र प्रमाणाभावादित्याशंक्य तस्योत्पत्तिस्तावदुपेया पूर्वस्य ध्वस्ततयारित्या
हा। आलोकेति। आलोकविनाशितस्य प्राचीनस्य तमसो यत्कारणं। तस्मादेव तज्जातीयस्य जन्मेति सिध्यतीति योजना। विघ्नकदावि
वेलंबमंतरेण यथा परमाणुभिरारभ्यते तथा तमोपीत्युपेयस उठितिविद्युदादीत्युक्तं वस्तुतस्तु स्वसमन्मतेन संतमस्य से परमाणु
कारणता किं तु विधेयविदधिष्ठितात् तमोरूपेण विवर्त इत्याह मूलकारणादिति। न च प्रमाणाभाव वोद्यो सदेव सोम्येदमि राम० ३४

त्यादिवाक्याद्ब्रह्मणो द्वितीयतया प्रतिपत्तेरित्यविद्याविवर्ततायाएव तस्याश्रयणीयत्वादिति भावः एवं निष्पत्तिप्रतीतिकारणसंतव
त्तमः प्रतिपत्तिर्नविघ्नमदत्यभ्यधायि संप्रति रूपवत्वहेतोरसिद्धिमाशंकते। ननु रूपवत इति। ननु रूपवत्त्वस्य स्पर्शवत्त्वं व्यापकं तद्व्या
वृत्तौ रूपवत्त्वमपि व्यावर्तते तथा च प्रयोगः। तमो नीरूपं स्पर्शरहितत्वाद्गगनवदिति। विपक्षे बाधकाभावादप्रयोजको हेतुः इत्यादौ ने
हरति। रूपवत्वे स्पर्शविधुरत्वमंगावाधक इत्याशंकाप्रतिबंधापरिहरति। वायोरिति। अयमर्थः। यत्स्पर्शतद्रूपवदिति व्याप्तेर्यथा वायौ भ
गः तद्वद्रूपवत्त्वस्पर्शवदिति व्याप्तेस्तमसि भंगः। न च प्रमाणाभावः तमालश्यामलतम इत्युपलंभादिति यद्रूपवत्तच्चक्षुर्देशादन्यत्रोप
लभ्यमानस्पर्शवदिति नियमस्य धूमे भगवत्स्पर्शवत्वनियमस्य तमसि व्यभिचार इत्याह। धूमस्येति। तस्यानुपलभ्यमानस्पर्शवत्वाद्दृष्टांतो
विषम इत्यत आह। तद्वदिति। सर्वसाम्यस्यानपेक्षितत्वाद्रूपवत्तमः स्पर्शमात्रहीनं स्यादित्यर्थः। यद्वा न केवलमप्रयोजकताहेतोरसिद्ध

तत्व० ३५

तावेत्याह धूमस्येति। न च स्पर्शवत्वेन तदुपलंभापत्तिरित्यपि शंक्यं स्पर्शवत्वाद्धूमस्य लोचनदेशाद् यत्र स्पर्शानुपलब्धिवत् क्वचिदप्यनुपलभ्यमा
नस्पर्शत्वप्रः किं न स्यादित्यर्थः सर्वस्पर्शहीनमिति सर्वत्रोपलभ्यमानस्पर्शशून्यामित्यर्थः। किंवालोकाभावस्तम इति वदन्त्रष्टव्यः किमेकैक
मएकैकालोकाभावः। उत सर्वालोकाभावः। आद्येपि किं प्रागभावः। उत प्रध्वंसाभावः। आहोस्विदितरेतराभाव इति विकल्प्यकल्पनं प्र
मथ संभववीत्याह। सवितृकरणेति। जन्मविनाशयोरिति। सति सप्तमी। प्रदीपजन्मनः। प्राक् प्रागभावः। जन्मनीतरेतराभावः। नाशो
त्तरकालं प्रध्वंसाभावश्च तत्रास्ति तथापि सवित्रालोकव्याप्ते देशे तमो नोपलभ्यते इतरथा तत्रापि तदुपलंभः स्यात्। प्रागभावाद्यवस्थासु
तमोवुद्ध्यभावो विरोध्यालोकसन्निधिनिबंधन इति। वदता विरोध्यभावसहितप्रागभावादेस्तमोवुध्यालंबनत्वमिति वक्तव्यं न च तदु
पपद्यते विरोध्यभावगिरा प्रागभावोक्तौ प्रध्वंसोक्तावितरत्रानुपपत्तेरितरेतराभावोक्तावालोकभावेपि तद्भावात्तमोवुद्धिरनिवार्येत्यर्थः। राम० ३५

द्वितीयमनूद्य दूषयति सर्वेति। किमस्य सर्वेषामालोकानां सन्निधानं निवर्तकं उतैकैकस्य आद्ये सकलालोकोदयमंतरेण तन्निवृत्तिर्न भवेत्।
द्वितीयेप्येकैकस्य सकलालोकाभावनिवर्तकत्वाभावात्तमोवुद्धिः स्यात्। न चैकलोकप्रादुर्भावे तदभावस्य व्यावृत्तेर्न तमोवुद्धिरिति शंक्यं।
प्रागभावादिविकल्पदूषणयोरत्रापि तुल्यत्वादिति हृदयं। रूपदर्शनाभावस्तम इत्यत्रापि किमेकैकस्य रूपदर्शनाभावः उत तत्सर्वस्य। आ
द्येपि किं रूपदर्शनमात्राभावः उत यत्र तमोवुद्धिस्तत्रत्यरूपदर्शनाभाव इति विकल्प्याद्यं प्रत्याह वहलांधकारेति द्वितीयोपि प्रागभावा
दिविकल्पेन दूष्यः सर्वरूपदर्शनाभावस्तम इति पक्षे सर्वरूपदर्शनोदयमंतरेण तमो न निवर्तेतेत्यर्थः तद्वालोकसंसर्गाभावस्तम इत्य
त्रापि किं संसर्गाभावः प्रागभावः उत प्रध्वंसः आहोस्विदितरेतराभावः। आद्ये प्रध्वंसे तमोवुद्धिर्न स्यात् द्वितीये प्रागभावे। तृतीयेप्या
लोकव्याप्तेपि देशे तमोवुद्धिः स्यात्। न च भावरूपतमोवादिनापि तद्ग्राहकत्वेनालोकाभावः समाश्रितः। ततस्तस्यैव तमोवुद्धिग्रा

तत्व० ३६

चरत्वमितिशंक्यांइतरेतराभावव्यतिरिक्तोऽलोकाभावस्यव्यंजकत्वमाश्रीयतोनवसत्वेयेष्टव्यइतरेतराभावस्येतरेतराभावानिरूपणा
त।नुचतमसोरूपिद्रव्यत्वेआलोकसहितचक्षुर्ग्राह्यत्वप्रसंगइतिवाच्यं।रूपवदभावस्यालोकसहितचक्षुर्ग्राह्यत्वनियमेपिआ
लोकाभावस्यकेवलचक्षुर्ग्राह्यत्वनियमवदन्यत्रापितदुपपत्तेरित्यतेसर्वमनसितिधायोपसंहरति।अलमतिप्रसंगेनेति।विरु
द्धस्वभावेनेतरेतराभावेप्रतिक्षिप्तेकथमितिवाच्यस्यानुपपत्तिरित्याशंक्यपरमार्थिकतादात्म्याभावेपितद्भ्रमःस्यादितितात्पर्य
माह।ननुदृश्यदृश्ययोरिति।अनुपपत्तिरित्यत्रपरमार्थतइतिशेषः।व्यांविभ्रमोनिमित्तंयस्यसतथातमित्यर्थः।नचविभ्रमामात्रम
नयोरेकत्वा।न्निमित्तनैमित्तिकतानुपपन्ना।पूर्वभ्रमस्योत्तरभ्रमनिमित्ततयाविवक्षितत्वेनानुपपत्त्यभावादित्यर्थः।ननुस्वाभा
विकतादात्म्याभावेपितादात्म्यभ्रमःस्यादितिवादितेआत्मनोनात्मात्वनिराकरणमसंगतमित्याशंक्याधिष्ठानाध्यस्यमानयोः
किंचिद्विशेषरूपेणान्यत्रतादात्म्याभावःउतसामान्यरूपेणेतिविकल्प्याद्यमंगीकरोतिसत्यामिति।नद्वितीयमित्याह।इदमंश

राम० ३६

शमात्रस्येति।इदंरूपयोःसामान्यविशेषादिभावेनकल्पितात्तादात्म्यवत्तोरेवतादात्म्यभ्रमोदृष्टः।नचप्रकृतेतादृशमपितादात्म्यमस्ती
त्यर्थः।किंतुयुष्मदंशस्यस्वस्मात्रसंभवः।विषयिणाश्चिदेकरसत्वादित्यर्थः।उतविषयिणःसकाशात्रसंभवइति।आधेयाधिकरणता
द्वितीयेहेतुसिद्धिरित्याशंक्याह।अयमाशयइति।अवयवशआशयोभिधीयतइत्यर्थः।हेतुसिद्धिंनिरस्यति।वेत्संहीति।कर्मकार
कतयाभासतेहेतुमाह।जडमिति।फलितमाह।तत्कथमिति।कर्मत्वेप्यात्मत्वंकिंनस्यादित्यतआहकर्तुरिति।क्रियांप्रतिगुणभू
तःकर्तातस्यविपरीततयाप्रधानतयावस्थानंतत्ताप्यत्रावस्थानेनतथोक्तागुणत्वप्राधान्ययोःकथमेकत्रविरोधःगगंतुर्विदिकर्म
त्वदृष्टेरित्याशंक्याह।एकस्यामिति।द्वितीयमनुवदत्यागनुकेतिसोपिविकल्पासहइत्याहसहेतुरिति।अनात्माकारपरिणामे
किमन्योहेतुरस्तुतेनेतिविकल्पार्थः।आत्मनोपरिणामित्वमात्मकृतेःपरिणाद्दिमादितिसूत्रेणसद्वसत्त्वाभवदित्यादिश्रुत्या
र्विरुद्धमित्याशंक्यनिरवयवस्याविधांविनातत्वतःपरिणामानुपपत्तिरित्याशयमाहनहिनिरवयवमिति।आद्यंदूषयति।नसहेतुः

ति। असिद्धिं निरस्यति। नहीति। चेतनस्यानात्माशंकाभावेप्यनात्मनश्चैतन्यांशत्वं स्यादिति शंकते नचेत्यनात्मेति। क्वचिद्दृष्टमिति
तत्व० ३७ अहमुपलभ इत्युपलब्ध्याश्रयत्वमहंकारस्य दृष्टमित्यर्थः। चैतन्यांशत्वं किं स्वभावतः। उतागन्तुक इति विकल्प्याद्यं प्रत्याहेनेत्याहेति। सम्
योरप्यात्मनोर्विषयविषयित्ववदात्मानात्मनोरपि तत्किं न स्यादिति शंकायामाह। अयमर्थ इति। प्रत्यक्षविषयत्वस्य निषिध्यमा
नत्वान्न व्यभिचार इत्यर्थः। द्वितीयेपीदं निरूपणीयं किमनात्मा स्वतश्चिदाकारेण परिणमते उतान्यः। नाद्यः सदा तत्परिणामप्रसंगा
दिति मत्वा द्वितीयं प्रत्याह परतोपीति। निमित्तोजजोजउपादानत्वात्संमतवदित्यर्थः। मुखसन्निधानाद्दर्पणस्य तदाकारत्ववदनात्म
नोपि चित्संनिधानाद्विषयता स्यादिति चोदयति तदपीति। अनात्मनश्चिच्छायता चिदाकारपरिणामः उत चैतन्यस्य तत्र संक्र
मणं। नाद्यः पूर्वरूपस्थितेनष्टे वान्यस्यान्यभावासंभवात्। अंत्येपि संक्रमणं किं तात्त्विकमुतातात्त्विकं। न प्रथमः निष्क्रियत्वात्पूर्णत्वाच्च राम० ३७
द्वितीयः क्वचित्तात्त्विकांशाशिताभावे कल्पनाया एवासंभवादित्यभिप्रेत्याह। तत्राहेति। टीकायामपेक्षितं पूरयति तत्स्यादिति। आत्म

नमुख्यप्रत्यक्षादिभागहमितिप्रतिभासमानत्वादहंकारवदित्याशंक्य प्रतीतिकर्मत्वं हेतुरुत प्रतीतिरूपत्वं आद्ये सिद्धिरित्याह। अस्मत्प्रत्यय
इति। अस्मच्चासौ प्रत्ययश्चेत्यस्मत्प्रत्ययोन्तःकरणं अहंप्रत्ययो वा। तत्रानिदमंशस्य कर्मत्वं न विद्यत इति यावत्। तत्र हेतुश्चिदिति। द्वितीये सा
धनवैकल्यमिति। अहंकारादेरहमित्येव प्रतीयमानत्वान्न युष्मदर्थत्वसितिनतदध्यस्ततासेप इति चोदयति। नन्वहंकारादियति। शरी
रादेर्न यद्यपि स्वरूपेणाहंप्रत्ययः तथापि मनुष्यत्वकारणत्वादिविशिष्टे समस्तीत्यर्थः। तद्बलनिर्भासिततयेत्यत्र तद्ग्राह्येनास्मत्प्रत्ययो
निर्दिश्यत इति शंका स्यात्तथाचास्मत्प्रत्ययभास्यचैतन्यवत् अहंकारादेर्युष्मदर्थत्वमित्याशंक्याह तस्येति। अस्मत्प्रत्ययस्य विशेषण
त्वेनोपात्तत्वात् चितेश्च प्राधान्यात्तस्या एव परामर्श इत्यर्थः। अहमिति प्रतीयमानस्य कथं युष्मदर्थत्वं तत्राहाहंकारेति तद्बलनिर्भासि
ततयैव युष्मदर्थत्वासिद्धेः किंलक्षणात् इत्यनेनेत्याशंक्य व्याख्यानव्याख्येयरूपत्वान्न वैयर्थ्यमित्याह अवभास्यत्वेनलक्षणेनेति। टीकायां

तत्त्व० ३८

तसिलप्रत्ययस्तृतीयार्थे। आनंदादीनां स्वरूपत्वात्तद्धर्मत्वमिति शंकानिरासार्थमपृथक्त्वेपीत्युक्तं तदनुपपन्नं। अपृथग्भूतानां पृथग्भाव
संभवादित्याशंक्योपाधिसंबंधादविरोधमाहांतःकरणेति। निर्गुणत्वात्। निरवयवत्वाद्धनात्मनानात्मनः सादृश्यं नापि विवेकाग्रहः। प्रत्ये
कराभ्यावादिविधयाव्यावृत्त्युपलंभात्। तत्तश्चाध्यासव्यापकाभावेनव्याध्यातावादसंभावितविषयफलत्वाद्ग्रंथस्यानारंभ इति पूर्वपक्षः।
अध्यासासंभवेन विषयाद्यसंभावनया आरंभे आक्षिप्ते अध्यासासंभवांगीकारेण समाधानमभ्यधायि तदयुक्तं अध्यासासंभवे वि
षयाद्यनुपपत्तेरित्याशंक्याध्यासासंभवांगीकारे तत्सत्यमाह भूयोऽवयवेति। भूयसामवयवानां सामान्यं समानता सैव सादृश्यं तस्याभा
वादध्यासासंभवप्राप्तमंगीकरोतात्पत्त्वयः। ननु सादृश्यमध्यासव्यापकं लोहित्यादिभ्रमे व्यभिचारात्। ततश्च सादृश्याभावेनाध्यासा
संभवांगीकरणमसंगतमित्याशंक्य किं सादृश्यस्य औपाधिकभ्रमव्यापकत्वं निषिध्यते उत निरुपाधीकभ्रमव्यापकत्वं नाद्यः अंगी
कृते रित्यभिप्रेत्य द्वितीयं दूषयत्यात्मनि कर्तृत्वादेरिति। इदं उतमित्यादि निरुपाधीकभ्रमं प्रति सादृश्यस्य व्यापकत्वादृष्टेः शरीराध्या

राम०

स्यच निरुपाधितात्सादृश्यं वक्तव्यं। न च तत्संभवति अतोध्यासासंभवांगीकरणमुचितमित्यर्थः। सादृश्यस्य निरुपाधिकभ्रमव्यापकत्वेन
हंकारोदेरात्मन्यध्यस्तत्वं सिध्यति सादृश्याभावादित्याशंक्य भूयोवयवसामान्यसादृश्याभावेपि कार्यानुपपत्त्या सादृश्यांतरं कल्प्यत
इत्याह निरुपाधिक इति केतकीत्यर्थगंधयोः निर्गुणत्वान्निरवयवत्वाद्गुणावयवसामान्याभावेपि केतकीगंधसदृशः सर्पगंध इत्यनुभ
वाद्यथा सादृश्यांतरमास्थितं तथात्रापीत्यर्थः। निरुपाधिकभ्रमेपि न सादृश्यानुगतिरित्याह। शंखपीतिमादाविति। पर्यस्तिकमि
त्यादिभ्रमं आदिशब्दार्थः। कारणांतरमित्यज्ञानलक्षणमित्यर्थः। युष्मदित्यादिना किमध्यासस्य सत्वमपलप्यते। उत प्रतीतिरिति वि
कल्प्याद्यं तथापीत्यंगीकारद्वितिपेपि किं कारणस्यापलापो विवक्षित उत प्रतीतेः। आद्येपि किं निमित्तस्य उपादानस्य वा न तावदा
द्यः संस्कारस्य निमित्तत्वात्। प्रमाणानुभवसंस्काराभावेन विपरीतकार्याभावादर्शनादनुभवसंस्कार एव प्रयोजकः सप्रकृतेपि सु
संपादः। नन्वेतोरनराश्रयत्वं पूर्वानुभवसंस्कारस्यात्तरभ्रमप्रयोजकत्वादित्यपि संधायोक्तं नैसर्गिक इति। तदनुपपन्नं नैसर्गिकत्वेनैतन्म

वत्स्वभावत्वेनोपेक्ष्यतासंभवादित्याशंक्य नैसर्गिकपदेनानादित्वं विवक्षितं न स्वभावत्वमित्याशयवानाह। नैसर्गिक इति। प्रतीचो जडतां
व्यावर्त्तयति चैतन्येति। तस्य तुच्छतां व्यावर्त्तयति। सत्तेति। कार्योपहित सत्तानुबंधित्वं व्यावर्त्तयति मात्रेति। साक्षिस्वरूपमनुस्मृत्यानवच्छि
न्नानंदादिस्वरूपं सदा तिरस्कृत्यव्यवस्थितं गृहीत्वाह। अनुबंधीति। द्वितियेबहुवचनं व्यत्वसंभवात् प्रथमपक्षांतरं निरस्यति। अयमित्यध्या
स आक्षिप्तो लोकव्यवहारसत्त्वसमाधीयत इति वै। यधिकरणापशंकां निरस्यति। युष्मदस्मदोरिति। अनादेः कथं कार्यत्वमिति शंकते क
थमिति। प्रवाहरूपेणानादित्वं न स्वरूपेणेत्यविरोधं दर्शयितुमध्यासस्वरूपमाह आत्मनीति अध्यस्यत इति कर्मपरोध्यासशब्दः ततः
किमित्यत आह तत्रेत्यादिना। अनुपभुक्ते रागो नोत्पद्यत इति वदतां मुक्तविषयो राग इत्युक्तं स्यात्। न वतत्संभवति भुक्ते रागाभावादित्या
शंक्याह तज्जातीय इति। उपभुक्तसजातीय इत्यर्थः भोक्तृत्वं च कर्तृत्वाद्यध्यासप्रपेक्षत इत्यनादित्वं सिद्धमित्याह एवमिति। कर्तृत्वादीनां

मन्यतमस्याप्तकालत्वं कायानादित्वं सुषुप्त्यादावपि तत्संस्कारसंभवात् अनादित्वं युक्तमित्यर्थः। अध्यासात्मको लोकव्यवहार इति लोक
व्यवहारस्याध्यासात्मकत्वं सिद्धमिति पुनरुक्तं कथं व्यर्थमित्याध्यासलोकव्यवहारयोर्मिन्नत्वात्कथं सामानाधिकरण्यमिति शंकानिरसन्
पुरःसरं तदेवस्पष्टीक्रियत इत्याह लोकव्यवहार इति। लोक्यत इति लोकः लोकशब्दस्य कर्मपरत्वमुक्त्वाह व्यवहारपदस्यापि नाह कृत्वं
कांनिरस्यति। व्यवहरणमिति। उभयोः कर्मपरत्वे योनरूप्यासूर्वत्र कर्मव्युत्पन्नाज्ञानोपसर्जनार्थाध्यासोनिर्दिष्टः उत्तरत्रार्थोपसर्जन
ज्ञानाध्यास इत्यर्थः। अनेकधासमाससंभवाद्विवक्षितसमासं दर्शयति। लोक इतिं ती। अर्थक्रियापरत्वं व्यावर्त्तयति। मनुष्य इति। व्य
वहारशब्दस्य हानोपादानयोः प्रसिद्धत्वात्कथं माभिमानवाचकत्वमस्यात मित्याशंक्याह। व्यवहारोतिशेति। अभिमानपदं वोपल
क्षणामित्याह। अतिज्ञानेति। अध्यासस्वरूपापप्रदर्शकत्वात्सत्यानृते इति भाष्यं तद्व्याख्यानं वा संगतमित्याशंक्य तद्व्यावर्त्याशंक

तत्व०
४०

माहात्म्यस्येति। सत्यानृतविभागस्यासिद्धत्वात्सत्यानृते मिथुनीकृत्येति कथमुक्तमित्याशंक्याह स्वसिद्धान्तमिति। सत्यानृतपदयोर्वि
वनपरतां व्यावर्तयति। सत्यमित्यादिना। कालत्रयबाधाभावोपलक्षितं वस्तु सत्यं। तस्य ज्ञानकर्मत्वं निराचिकीर्षया निदमित्युक्तं
तत्र हेतुमाह चैतन्यमिति। उभयोरध्यस्तत्वे कथं सत्यानृतविभाग इत्याशंक्यैकस्य संसृष्टरूपेणाध्यस्तत्वमितरस्य स्वरूपेणापीति
क्तो विभाग इत्याह स्वरूपत इति। अध्यासमिथुनीकरणात्मको लोकव्यवहार इत्युक्तं। तदाक्षिपति ननु क्त्वाप्रत्ययेति। प्रातीतिकयो
भेदादिव्यावृत्त्यर्थमर्थतः इति विशेषणं समानकर्तृकयोः पूर्वकाल इत्यनेन सूत्रेणैककर्तृकयोः पूर्वापरीभावेन स्थितयोः पूर्वकाले व्य
त्यर्थे क्त्वाप्रत्ययस्य विहितत्वात् क्रियाभेदादिरवेष्टव्य इत्यर्थः। व्यवहारः क्रियत इति क्रियान्तरमाध्याह्रियत इत्याशंक्य किं लोकव्यवहा राम०
र इत्येतदुक्त्वाध्याहारः उत्ताध्यस्येत्येतदुक्त्वादिति विकल्प्याद्यस्योत्तरमुक्तमध्यस्य नैसर्गिक इति द्वितीयं सूचयति। ननु किमिति।

DR. BHAU DAJI MEMORIAL

उपसंहारविरोधान्नैवमित्याह न त्वाहेति। उपक्रमानुरोधेनोपसंहारनयनं किं न स्यादिति तत्राह तद्धि पदेति। क्त्वाप्रत्ययवैयर्थ्यभयाद्धि शा
प्यप्रधानपदार्थाध्यासाभेत्तुं नेह युज्येत इत्यन्वयः। प्राधान्यमुपपादयति। वाक्यार्थ इति। वाक्यार्थत्वमेवाहोपक्रमेति। प्रतीयमान इति
शेषः। अध्यासाभिध्येसुपक्रमे एवमयमनादिरित्युपसंहारे च प्रतीयमानतया वाक्यार्थत्वं। येनोपक्रम्यते येन वोपसंह्रियते स वाक्या
र्थ इति न्यायात्। ततश्च प्राधान्यमित्यर्थः। नैसर्गिकगुणविशिष्टत्वेनोत्तरत्रोक्तस्याप्यध्यासस्य प्रत्यभिज्ञानाच्च लोकव्यवहारोऽध्यास इत्या
ह नैसर्गिक इति। अध्यासलोकव्यवहारशब्दयोरेकार्थत्वे क्त्वाप्रत्ययस्य निरालंबनता स्यादिति चोदयति किं तर्हीति। मुख्यालंबनाभावे ऽपि उ
पचरितमालंबनमस्तीत्याह मनियन्त्रित इति। व्यपदेशमात्रमित्युक्ते निरालंबनत्वमेवोक्तं स्यादिति तत्राहोपचारेति। अन्यगतस्यान्यत्रारो
पणमुपचार इत्येकस्मिन्नध्यासे प्रातीतिकक्रियाभेदपूर्वापरीभावो न घटेते इति चोदयति। कथमिति। स्वरूपेणैक्येऽपि विशिष्टभेदात्तदुपप

तत्व० ४१ तिरित्याहैकोपीति। ननुविशेषणभेदादध्यासोभिद्यतइति। कथंनखलुदंडकमंडलुभेदाच्चैत्रोभिद्यतेत्याशंक्यस्वरूपभेदाभावेपिविशिष्टभे
दइत्याहविशिष्टइति। तथापिवैशिष्ट्यभेदाननुविशिष्टस्वरूपस्येत्याशंक्याहपरोपाधाविति। परोपाधावध्यासोभिद्यतेगगनवदित्य
र्थः। तथापिकथंपूर्वापरिभावइत्याशंक्याहविशिष्टेति। तत्तद्विशेषणाविशिष्टार्थज्ञातात्तत्तद्भावकशब्दश्रवणंक्रमेणभवतीतिप्रतिपत्ति
तःपौर्वापर्यमध्यासस्याज्ञानोपादानत्वप्रतिदर्शयिषयामिथ्याज्ञाननिमित्तइत्युक्तं। तत्रभ्रांतिज्ञाननिरासार्थंमिथ्यावनदज्ञानंचे
तिविग्रहमकरोत्तत्र। विशेषणवैयर्थ्यशंकांपरिहरति। तत्रेति। नचाभावभ्रांतिज्ञानयोरन्यतरस्यकारणत्वंकिंनस्यादितिशंक्यंअभा
वभ्रांतिज्ञानयोःसमवायिकारणतयाक्वचिदप्यदर्शनात्इत्यर्थः। मिथ्याज्ञानशबलेश्वरस्याधिष्ठातृत्वंसंस्कारद्वारेणवाज्ञानस्यनिमि
त्तत्वंचेतिदर्शयितुंभाष्येनिमित्तपदोपादानमितिद्रष्टव्यं। अज्ञानमितिनञाअभावत्वंप्रति। तत्कथमनिर्वचनीयत्वमितिशंकायामुक्त राम० ४१

मज्ञानमितिज्ञानपर्युदासेनोच्यतइतियते। ज्ञानान्यत्वेहेतुमाहजडात्मिकेति ज्ञानविरुद्धत्वाद्वाज्ञानमित्याहाविद्येति। आत्मकारणत्वोपपा
दयिषयाशक्तिरित्याह। शक्तिरिनिमानाभावात्नमिथ्याज्ञानस्याप्युपादानत्वमितिशंकते। ननुकथमितिमिथ्याज्ञाननिमित्तत्वेन
तावत्प्रत्यक्षंमानमननुभावात्नाप्यनुमानं। व्याप्त्यसंप्रतिपत्तेः। नाप्यागमः। श्रुतिस्थितंप्रतितदुपन्यासस्यानुचितत्वात्नाप्यर्थापत्तिः।
मिथ्याज्ञाननिमित्तत्वमंतरेणानुपपद्यमानस्याभावादित्यर्थः। सुषुप्त्यज्ञानेरजतभ्रमोदयइतरथानेत्यन्वयव्यतिरेकाभ्यांतस्यरज
तभ्रमोपादानत्वसिद्धंतदृष्टांतेनाहंकाराद्यध्यासस्याप्यज्ञाननिमित्तत्वनिश्चीयतेविमतोज्ञानोपादानोध्यासत्वात्संमतवदित्यभिप्रे
त्यआहतस्मिन्स्यतीति। अज्ञानान्वयव्यतिरेकावन्यथासिद्धौततश्चदृष्टांतस्यसाध्यवैकल्प्यमितिशंकते। नन्विति। अन्वयव्यतिरे
कौप्रतिबंधकाभावविषयतयान्यथासिद्धावित्यन्वयः। किंतुप्रतिबंधकंकस्वतरभावरसग्राहाध्यासस्येति। प्रतिबंधकमित्युसत्त्वि

तत्व०
५२

राधीत्यर्थः। प्रतिवंधकलक्षणविधुरत्वात्तज्ज्ञानस्यप्रतिवंधकत्वमित्याहनैतत्सारमिति। प्रतिवंधकलक्षणाभावंदर्शयितुंलक्षणमाहपु
ष्कलेति। विरोधिप्रतिवंधकमित्युक्तेपूर्वज्ञानविरोधिउत्तरज्ञानेतिव्याप्तिः तदर्थंकार्येत्यादेति। सामग्र्यभावंव्यावर्त्तयितुंपुष्कलेति। पुष्कल
कारणेसतिविरोधिप्रतिवंधकमित्युक्तेपूर्वज्ञाननिवृत्तिपुष्कलकारणोत्तरज्ञानेतिव्याप्तिस्तदर्थंकार्येति। फलितमाहतवेति। दोषस्य
अध्यासपुष्कलकारणात्तर्भावात्तस्मिन्सतिनतत्वज्ञानपुत्पद्यतेनिर्दुष्टेंद्रियार्थसंयोगलक्षणकारणाभावादित्यर्थः। तत्वबोधस्याभ्या
साप्रतिवंधकत्वेपितन्निवर्त्तकतयाविरोधित्वात्तदभावविषयतयान्यथासिद्धावन्वयव्यतिरेकावितिवादयति। तथापीति। संसर्गा
भावइत्यत्राज्ञानमितिशेषः। अपेक्षितानपेक्षितविषयत्वसंदेहेनपेक्षितविधेरपेक्षितप्रतिपादनमेवोचितमित्याह। नकार्यस्येति।
नविरोधीत्यस्यायमर्थः उत्पत्तेरूर्ध्वंनिवर्त्तकाभावोपेक्षापलभ्यतेनप्रागिति। न्यायसहिताविति। अपेक्षितानपेक्षितविधानयोरपे

राम०
५२

क्षितविधानंवलवदितिन्यायाः हेत्वपेक्षायाअन्यतएवोपशांतत्वादन्वयव्यतिरेकौविरोध्यभावविषयावितिशंकतोननुक्लृप्तमिति। क्रि
यदोषः साहृश्यइंद्रियदोषः काचादिः प्रमातृदोषोरागादिरादिशब्दार्थः दोषस्यकिंनिमित्ततयाक्लृप्तिरुतोपादानतया। आद्यस्वंगीक्रि
यतइत्याह। सत्यमिति। द्वितियेदूषणमाह। उपादानेति। उपादानांतरस्यानिरूपणादज्ञानमुपादानत्वेनोररीकरणीयमित्यभिसंधिः
कार्यस्योपादानापेक्षासिद्धाप्रध्वंसेव्यभिचारादितिशंकामपवदितिसंवेवेति। विमतंसोपादानंभावत्वसतिकार्यत्वाद्घटवदित्यनुमा
नात्कार्यस्यउपादानापेक्षायामितिसंवंधः उपादानंविनोत्पद्यमानक्रियादौव्यभिचारित्वहेतोः। नचाश्रयस्यैवोपादानत्वंतयोः सहोत्प
द्यमानत्वेपोपादानोपादेयत्वानुपपत्तेरित्याशंक्याह। क्रियागुणेतिक्रियादिविशेषीतत्वमादिशब्दार्थः उत्पद्यमानस्यक्रियादेर्यआश्र
यः तस्येत्यर्थः नवसहोत्पन्नत्वाद्स्योपादानत्वमनुपपन्नमितिशंक्यंक्षणमात्रमगुणंतिष्ठतुसत्रमित्यंगीकारात्सहोत्पन्नत्वासिद्धिरि

तत्व० ४३

त्यर्थः।अथनोत्पद्यमानस्यघटादेर्यआश्रयस्तस्यनदारोरुपादानत्वंनचमृदादेरुपादानत्वेउत्पद्यमानाश्रयतयोपलंभोनस्यादितिशं
क्यं।उपादानोपादेययोरव्यतिरेकादित्यर्थः।कार्यस्यसोपादानत्वनियममंगीकृत्याज्ञानस्योपादानत्वमाक्षिपतितन्विति।भावरूपस्या
ज्ञानस्याप्रसिद्धस्योपादानत्वकल्पनाद्वरंप्रसिद्धस्यात्मादेरेवोपादानत्वकल्पनमित्यर्थः।आत्मादेरुपादानत्वानुपपत्तेरुपादानांत
रंकल्प्यमित्याहनेति।यथात्मासुखादेरुपादानंतथाभ्रांतेरपिस्यादित्याशंक्याह।आत्मनइति।किंकेवलस्योपादानत्वंउताऽवि
द्योपहितस्य।नाद्योनिरवयवद्रव्यत्वेनपरिणामायोग्यत्वात्।द्वितीयेमदिष्टसिद्धिः।निदर्शनमप्यसंमतमित्यर्थः।उक्तदोषाभावा
दंतःकरणमुपादानंस्यादित्याशंक्येंद्रियसंयोगमनपेक्ष्योतापेक्ष्यवा।आद्यइत्याहांतःकरणस्येति।परतंत्रंवहिर्मतइत्यभ्युपगमादिं
द्रियसंयोगानपेक्षित्वमनुचितमित्यर्थः।द्वितीयंदूषयतिमिथ्येति।प्रत्ययेसत्येवविपरीतंवर्त्ततेतिष्ठतीतितथोक्तंतस्मिन्नित्यर्थः।प्र राम० ४३

तिभासमात्रस्यशरीरस्यसमारोपितस्यप्रतिभासात्प्रागसत्त्वादिंद्रियसंयोगायोगइत्यर्थः।मिथ्याज्ञानस्यानिंद्रियजन्यत्वेंद्रिया
न्वयव्यतिरेकानुविधानविरोधमाशंक्याह।अधिष्ठानेति।अधिष्ठानसामान्यबोधमंतरेणाभ्रमानुत्पत्तेस्तद्विषयत्वेनान्यथासिद्धिरि
त्यर्थः।इतश्चांतःकरणंनोपादानमित्याहांतःकरणस्येति।ज्ञानस्यांतःकरणपरिणामत्वेनतदाधारत्वंवक्तव्यं।नचतत्संभवति
किंकेवलस्यांतःकरणस्याधारत्वमुतचिदध्यस्तस्य।नाद्यःजडत्वात्।द्वितीयेचिदध्यासस्तत्रतादात्म्यस्फुरणंतादात्म्यंचगगनप्रस
नायमानमितिकथमपरोक्षप्रथामियादित्यर्थः।इतोपिनकेवलस्योपादानत्वमित्याहात्मनइति।अज्ञानभ्रमसम्यग्ज्ञानानांसे
काश्रयत्वंनियतं।तत्रभ्रांतेरंतःकरणाश्रयत्वेआत्मनितदभावात्सम्यग्बोधबंधनिवृत्त्योरपितदाश्रयत्वंनस्यादितिनित्यमुक्तत्वमा
पत्तेरित्यर्थः।आत्मांतःकरणयोरनुपादानत्वसाधनफलमाह।तस्मादिति।तस्मान्मिथ्याज्ञानमेवाध्यासोपादानमितिसं

तत्व०
४६

पादोषान्वयव्यतिरेकाभ्यां दोषस्यैवोपादानत्वं किं न स्यादित्याशंक्यान्यथासिद्धिमाह। काचादिति। बहिरंगनिमित्तविषयत्वकल्पनाद्वरं त
योरंतरंगोपादानविषयत्वमित्याशंक्याह। अध्यासं प्रत्यनाश्रयत्वानतयेति। आश्रयतया स्थानं। स्थितिर्न येषां तान्यनाश्रयस्थानानि तेषां
भावस्तत्त्वं तयेति यावत्। दोषाश्रयत्वेनाध्यासस्यानुपलंभात्। न दोषस्योपादानत्वमित्यर्थः। अज्ञानस्य मिथ्याज्ञानाश्रयत्वेनानुपलंभेप्यु
पादानत्ववत्काचादेरपि तथात्वमित्याशंक्यायोग्यत्वान्नेत्याह। मिथ्याभूतमिति। दोषस्य सत्त्वादध्यासस्य च तद्विपरीतत्वात्तयोरुपादानोपा
देयत्वे त्यर्थः। मिथ्यात्वेन्ये हेतुमाह। मिथ्यार्थेति। अर्थस्य मिथ्यात्वात्तज्ज्ञानमपि मिथ्येत्यर्थः। उपादानस्यावश्यंभावित्वमुक्तं स्मारयत्यु
पादानेति। अथवा मिथ्यात्वे। पि सत्योपादानत्वं किं न स्यादित्याशंक्याह। उपादानेति। उपादानस्य सत्त्वे तत्कार्यस्यापि सत्त्वं स्यात्।
तयोरभेदादित्यर्थः। इतोपि तेषामनुपादानत्वमित्याह। विद्यमानेष्विति। व्यावृत्तेष्वननुगतेष्विति यावत्। काचकामलत्वादिदोषाणां प राम० ४६

रस्य व्यभिचारित्वात्कार्येननुगतत्वाच्च नोपादानत्वमित्यर्थः। अज्ञानकारणवादेनोक्तदोषानुपपत्तिरित्याह। मिथ्याभूतस्येति। सत्त्वे
ज्ञानं निवर्त्यत्वं न स्यादित्येवंकारार्थः। तत्रश्चात्स्योपादानत्वमुचितमित्याह सर्वकार्येति। सर्वभ्रमानुयायित्वादपि तदेवोपादानमित्याह। स
र्वत्रेति। आज्ञानं नन्वात्मपादानं तदनाश्रयत्वात्काचादिवदित्याशंक्याह। अज्ञानस्येति। कथं तर्ह्यात्माश्रयतया स्फुरणमित्याशंक्याज्ञानस्या
त्मन्यध्यस्तत्वात्तज्जन्यस्यापि तत्रिष्ठतया स्फुरणमित्याह। आत्माश्रयतयेति। एवकारव्यावर्त्यमाह। नात्मेति। ज्ञानाध्यासस्यात्माश्रयत्वेपि कथ
मर्थाध्यासस्य तदाश्रयत्वं रंरदंतूप्यमिति वहिरनुपलंभादित्याशंक्याह। शुक्तिदमंशावच्छिन्नचेतन्यं मोहकार्यत्वात्समारोपितस्य शुक्त्याद्याश्रय
तया विभ्रमत्वादित्याह। त्माश्रयेति। कोवाबूते नांतरीत्यत्र वक्ष्यतइत्यर्थः। कथं पुनरित्यत्र कथं शब्दस्याक्षेपार्थतामाह। केस्यैवेति। नवप्रवाद
रूपेणानादित्वस्याभिहितत्वात्र विरोधोक्तिरिति शंक्यं टीकायां वक्ष्यमाणार्थमाह। व्यनैसर्गिकपदव्याख्यानोपयोगितया विवरणकार

तत्व०
४५

आहस्मेत्यर्थैनानुक्त्यादित्यर्थः। विरोधे वेदितेतमनिरस्याविद्यासाधनमसंगतमित्याशंक्य किंनिमित्ताधीना। भिन्नत्विकत्वं नैमित्तिकत्व
मित्यंगीकृत्य विरोधं चोदयति। उत प्रागसतो निमित्ताधीनसत्तावत्त्वमिति विकल्पाद्येन विरोध इत्याशयं स्पष्टयति। तत्रेति। विरोधे वो
इति पावत्कारणस्य यद्रूपं स्वभावस्तदात्मनेत्यर्थः। कारणरूपेण कथं नैसर्गिकत्वं तदात्मता या एवासिद्धिरित्याशंक्याहाध्यासेति। अध्या
सस्य प्रवाहेण जन्म तस्मात्तथा निर्दिष्टमध्यासस्य प्रवाहरूपेण जन्माध्यासप्रवाहजन्मैतेन हेतुने निविग्रहो वा। अध्यासस्योपादाना
त्मनासत्त्वे तस्माज्जन्मानुपपत्तेस्तदात्मत्वमित्यर्थः प्रवाहरूपेणाप्यनादित्वं घटपिंडुं शक्यत इत्याशयेनोक्तं प्रप्रवाहेति। अन्यथा मिथ्यार्था
वभासानुपपत्तेरित्यत्र हेतोर्वक्ष्यमाणत्वादवश्यमेषेति। पदद्वयवैयर्थ्यमाशंक्याहावश्यमिति। प्रमाणांतरस्याभिधीयमानत्वात्रैवैय
र्थ्यं तत्रावश्यमिति पदादनुमानं सूचितं। एषेति। प्रत्यक्षमिति प्रमाणद्वयवत्तामाहेत्यर्थः। प्रत्यक्षस्य ज्येष्ठत्वात्प्रथमं तदाह। प्रत्यक्षमिति

राम०
४५

अहमज्ञ इत्यज्ञानाश्रयत्वेन मामन्यं वा न जानामीत्यात्मानात्मकर्मकावोध्याश्रयत्वेनात्मन्यपरोक्षप्रतीतिदर्शनादज्ञानस्य सत्त्वमनात्मनस्त्वज्ञा
नकर्मत्वमनुममवलं ब्योक्तं न वस्तुत इत्यर्थः। प्रत्यक्षस्याभावविषयत्वेनाप्युपपत्तेर्न भावरूपाविद्यासिद्धिरित्याह। ननु ज्ञानेति। विमतो नाभाव
विषयः अपरोक्षत्वादहं सुखीति प्रत्ययवदित्यनुमानविरोधान्नाभावविषयत्वं तस्येत्याह। नापरोक्षेति। विपक्षे बाधकाभावादप्रयोजकत्वमि
त्याशंक्य किमेतत्सर्वप्रमाणवादिनां चोद्यमुत प्रत्यक्षाभाववादिनां तत्राद्यं दूषयत्यभावस्येति। योग्यत्वे सत्यनुपलब्धाख्यषष्ठप्रमाणविषय
त्वेनाभावस्यापरोक्षत्वं तत्स्याभावप्रत्ययस्यापरोक्षत्वभंगो बाधक इत्यर्थः। द्वितीयं प्रत्याहाप्रत्यक्षेति। कथमसंभव इति शंकायां किंध
र्मिप्रतियोगिनावनुभूय ज्ञानाभावमनुभवति। उतानुभूयेति विकल्प्याद्यं प्रत्याह। मयीति। द्वितीयं दूषयति। अनवगत इति। धर्म्यादि
प्रतिपत्तौ ज्ञानाभावोऽनुभूयते। न धर्म्याद्यप्रतिपत्तावित्यर्थः। धर्म्यादिप्रतिपत्तेरभावप्रतीतिकारणत्वात् अभावे कार्याभाव इति कि

तत्व० ४६ मुपक्षव्यमित्यभिप्रेत्याह सुतरामिति धर्मिप्रतियोगिप्रतिपन्नप्रतिपत्त्योर्ज्ञानसामान्याभावावगतिरित्येतद्दोषद्वयं प्रमाणवादिमतेनेति दि
शतिषष्ठप्रमणेति। मतांतरेप्येतत्तुल्यमित्याह। फलेति। अर्थेन सहानुभूयमानत्वादप्यज्ञानं ज्ञानाभाव इत्याहेहेति। इहलोके त्वदुक्तमर्थं
न जानामीत्यत्राज्ञानमनुभूय प्रवर्त्तत इति संबंधः। अर्थे विज्ञातेपि तद्गतसंख्याज्ञानाभावाभिप्रायेण व्यपदेशोपपत्तिमाशंक्य नित्यपरोक्षा
पूर्वादौ व्यपदेशस्यापरोक्षज्ञानाभावाभिप्रायेण व्यपदेशासंभव इत्याशंक्य निदर्शनांतरमाह। संख्यामिति संख्यायां संख्यांतराभावा
त्संख्यां न जानामीत्युक्तेः संख्याज्ञानाभावविषयत्वं विरुद्धमित्यर्थः। तत्रापि परोक्षतः याज्ञाने अपरोक्षज्ञानाभावाभिप्रायत्वानुपपत्ते
र्मौवमित्याह शास्त्रेति जानन्नेव न जानामीति। श्रुतेपरपरीक्षार्थं न तज्ज्ञानसंभवादित्याशंक्य श्रवणं गुरुशुश्रूषाद्यनुपपन्न्यात्तत्राज्ञानं तम० ४६
कल्प्यत इत्याह तन्नश्रवणादाविति। अर्थज्ञानतदभावयोर्यथा न समकालत्वं तद्वत्तदज्ञानतज्ज्ञानयोरपि एतदज्ञानं नैतज्ज्ञानसमानका

लीनं एतदज्ञानत्वादेतज्ज्ञानाभाववदित्याशंक्याप्रयोजकत्वेन परिहरति। भावरूपाज्ञानेति। भावाभावयोः खल्वेककालत्वं विरुद्धं न तु
भावयोः नहि घटभावे पटभावानुपपत्तिरित्यर्थः। एतदज्ञानं नैतज्ज्ञानसमकालीनं एतज्ज्ञाननिवर्त्यत्वात् एतज्ज्ञानप्रागभाववदित्याशंक्य
किं ज्ञानशब्देन वृत्तिर्विवक्षितेउत साक्षी नाद्यः सिद्धसाध्यत्वादित्यभिप्रेत्य द्वितीये सिद्धिमाह नेति। विमतं नाज्ञाननिवर्त्तकं तत्स्फोरकत्वा
त् यद्यत्स्फोरकं न तत्तन्निवर्त्तकं यथा घटज्ञानमित्यर्थः। विपक्षे बाधकमाह नहीति। घटज्ञानेन घटस्यापि निवृत्तिप्रसंगादित्यर्थः। असिद्धो हे
तुरिति शंकते नन्विति। किं साक्षिचैतन्यं घटविशेषिताज्ञानं भासयति उत केवलं नाद्यः विषयस्य प्रमाणगम्यत्वनियमात् अन्यथा प्रमाण
वैयर्थ्यान्नेतरो ज्ञानमित्यप्रतीतेरित्यर्थः केवलस्य केवलसाक्षिवेद्यताभावेपि विशिष्टस्य साक्षिवेद्यत्वादज्ञानस्फोरकत्वं सिद्धमित्याह
न्यत इति। न च प्रमाणवैयर्थ्यमपीत्याह। तत्रज्ञाततयेति। प्रमाणानां ज्ञाततार्जनकत्वान्नवैयर्थ्यमित्यर्थः। न च केवलस्य साक्षिविषयत्वाभावे

तत्व० ५१

विशिष्टस्यसाक्षिवेद्यत्वमितिवाच्यंकेवलपरमाणौमानसप्रत्यक्षत्वाभावेपिपरमाणुमहंजानामीतिज्ञानविशेषणतयाप्रत्यक्षविषय
त्वोपगमादित्यर्थः।ज्ञाततावििशिष्टस्यप्रमाणव्यवधानेनविद्वास्यत्वेविषयत्वाविशेषादज्ञातत्वाविशिष्टस्यापिसव्यवधानत्वमित्या
शंक्याहान्यस्त्विति।अज्ञाततायाअनादित्वात्तज्जननेप्रमाणापेक्षानापितद्बोधनेविरोधात्तस्मात्साक्षात्साक्षिवेद्यत्वमित्यर्थः।
अज्ञानप्रत्यक्षत्वंनिगमयतिइत्तीति।धर्मिप्रतियोगिप्रतिपन्नअप्रतिपन्नोनञ्ज्ञाभावंप्रतिपत्तिरित्युपपत्तिशब्दार्थः।अवश्यपरस
वितमनुमानमाहानुमानमपीतिसाध्यविशेषोपादानेनसिद्धस्यधर्मिविशेषस्यस्पष्टीकारणार्थंप्रमाणज्ञानमित्युक्तेंद्रनिदृष्टव्यांव
र्त्तकपूर्वकमित्युक्तेआत्मनवस्तपूर्वकतयार्थांतरत्वंतदर्थंवस्त्वंतरेतिचक्षुरादिव्यावृत्त्यर्थंस्वदेशगतेति।अदृष्टादिकंव्यावर्तयतिस्वनि
वर्त्येति।उत्तरज्ञानानिवर्त्यपूर्वज्ञानव्यावृत्त्यर्थं।स्वविषयावरणेति।प्रागभावव्यावृत्त्यर्थंस्वप्रागभावेतिस्वप्रागभावव्यतिरिक्तपूर्वक राम० ५१

मित्युक्तेविषयेणार्थांतरतातदर्थंस्वविषयावरणेति।स्वविषयावरकांधकारव्यावृत्त्यर्थंस्वनिवर्त्येतिविषयगताज्ञातताव्यावृत्त्यर्थंस्वदेश
गतेति।मिथ्याज्ञानंव्यावर्त्तयतिवस्त्वंतरेति।धारावाहिकज्ञानेव्यभिचारव्यावृत्त्यर्थमप्रकाशितेति।अर्थपदंतुस्पष्टीकरणार्थंमध्यव
र्त्तिप्रदीपप्रभायांसाध्यसाधनवैधुर्यपरिहारायप्रथमेतिविशेषणंसवितृकिरणव्याप्तप्रदेशस्यप्रदीपप्रभाव्यावृत्त्यर्थमंधकारेति।
किमनात्मज्ञानंधर्मिउतआत्मज्ञानं।नाद्योनात्मावरकस्याज्ञानस्यानंगीकारात्।तत्साधनेबाधापातात्।नद्वितीयोऽनात्मज्ञाने
व्यभिचारात्।अप्रकाशितार्थप्रकाशकत्वंचकिमप्रकाशितार्थप्रकाशकर्तृत्वंउतकरणत्वं।नाद्योसिद्धिसाधनवैकल्पप्रसंगात्।नद्विती
योतएवततोयत्किंचिदेतदेतिकेविद्धिप्रतिपन्नस्यात्मज्ञानस्यानात्मज्ञानस्यत्वधर्मित्वमितिब्रूमः।नचबाधापत्तिःघटाद्यवच्छिन्नचैतन्य
प्रत्यक्षादिविषयत्वेनोपपद्यतेतथाज्ञानावृतत्वमितिकथंवाद्यनवहेलोदुर्निरूपत्वं।प्रकाशशब्देनतज्ज्ञप्योव्यवहारोलक्ष्यतेनतथाप्रका

तत्व० ४८ शितव्यवहारहेतुत्वंहेत्वर्थः। तस्यचोभयत्रानुगतत्वान्नासिद्ध्यादिरिति। अनुमाननिगमनार्थइतिशाह्ः प्रमेयमुपसंहरतितत इतिअवि
द्यायाःशक्तिमत्वात्कथंशक्तिरित्यभिहितमितितत्राहशक्तीरिति। आत्मकारणत्वनिवे त्वादात्मपरंतत्रत्वा-च्छशक्तिमत्त्वामपि
शक्तिशब्दउपचरितइत्यर्थः। बाह्यघटादेर्विषयत्वमध्यात्मिकाहंकारस्यचाश्रयत्वमनुभवमाश्रित्योक्तं। बाह्याध्यात्मिकेष्वितिवस्तुत
स्तुविद्यातत्स्वरूपानुबंधिनीत्युक्तंतदनुपपन्नमनात्मतंत्रत्वेतदुपादानत्वविरोधादित्याशंक्यटीकार्थंस्पष्टयति। नत्वरूपमिति। ये
षामनात्मवस्तूनामात्मतत्त्वंस्वरूपमधिष्टानत्वादारोपितसर्पादेरज्जुरिवेत्यर्थः अनात्मविशिष्टात्मपारतंत्र्यंव्यावर्त्तयितुंसत्तामात्रेस
क्तं। प्रत्यक्षानुमानाभ्यामविद्यासिद्धेस्तत्रहेत्वाकांक्षाभावादन्यथेतिग्रंथानुपपत्तिरित्याशंक्यप्रमाणांतरतयाव्याचष्टेकिंचेति। मि
थ्यार्थतदवभासयोरनुपपत्तेरितिटीकार्थः। अहंकारादितदवभासयोर्मिथ्यात्वासिद्धेःकथंतदनुपपत्त्याज्ञानसिद्धिरित्याशंक्यतास राम० ४८

र्थमाहविशुद्धेति। ज्ञानस्यैवाध्यासोनार्थस्येतिमतंनिरस्यत्यर्थज्ञानेति। निरालंबनज्ञानायोगादर्थोप्यस्तीत्यर्थः समीचितज्ञान
स्ययथार्थत्वान्नाध्यासत्वमित्याशंक्याहमिथ्याभूतस्येति। आत्मनिमुक्तौचप्रतीयमानस्यार्थस्यसत्त्वानुपपत्तेः कल्पितत्वेनज्ञानमपिमि
थ्येत्यर्थः मिथ्यार्थावभासानुपपत्त्यामिथ्याभूतमुपादानमेष्टव्यमित्युक्तंतत्रान्यथोपपत्तिंनिरस्यतिसत्योपादानत्वइतिमूर्तस्यघट
स्यमृदात्मतावत्सत्योपादानस्यसत्त्वंस्यादित्यर्थः। किंतदुपादानंसादिउतअनादिनाद्योऽनवस्थानात् नद्वितीयःप्रमाणाभावादि
त्याशंक्यकल्पनालाघवादनाद्येवतदित्याह। तस्यापीति। तथापिकथमज्ञानसिद्धिरित्याशंक्याहाद्यचेति। आत्मव्याहृत्यंधर्ममिथ्येति।
संसृष्टरूपेणतस्यापिमिथ्यात्वंतदर्थस्वयमितिप्रागभावंव्यावर्त्तयितुंमिथ्योपादानमितिविशेषणमनादिभावरूपंज्ञानायनो
धेअज्ञानमित्युक्तंभवति। स्वातंत्र्यंव्यावर्तयत्यात्मेति। अर्थापत्तिनिगमयतीतीति। इतिशब्देमथोपपत्त्यभावपरामर्शार्थः। इत्युक्त

मित्यत्रमिथ्यार्थ।वभासानुपपत्तेरित्यत्रेतिशेषः।बाह्याध्यात्मिकेष्वित्यत्रानात्मनोविद्याविषयत्वमुक्तंतदाक्षिपति।नन्वित्यादि
नाविषयत्वाभावंदर्शयितुंविषयत्वलक्षणमाहयेनेति।अज्ञानजनितावरणातिशयशालित्वादनात्मनोविषयत्वमित्याशंक्याह।नेवेदी।
अर्थानुपपत्तेःप्रयोजनानुपपत्तेरित्यर्थः।आद्यंसंग्रहवाक्यंविवृणोतिनतावदित्यारभ्यनवस्थयमित्यतःप्राक्तनेनग्रंथेन।आवरणे
किंप्रत्यक्षंमानंउतानुमानमाहोनुपपत्तिः।आद्येपिकिमनात्मन्यधिगतेआवरणमधिगम्यतेअथवानुपलब्धइतिविकल्प्याद्यंप्र
त्याहततावदिति।नीलावगमविरोधात्तत्रावरणंदुरधिगममित्यर्थः।द्वितीयेप्रत्याहानवगतइति।नीलप्रतिपत्तिंविनातत्रावरणंन
नुभूयतइत्यर्थः।अत्राप्रश्नानुभवइत्याहनतरामितिद्वितीयमुद्घाटयति।नन्ववगतइतिविमतंपूर्वमावृतमिदानीमवगतत्वात्संम
तवदित्यनुमानादावरणसिद्धिरित्यर्थः।किमिदानीमवगतत्वमात्रंहेतुःउतेदानीमेवागतत्वंनाद्यइत्याहतधारावाहिकेति।धारावा

हिकज्ञानगम्येइदानीमवगतत्वमस्तिनपूर्वमावृतत्वमितितत्रव्यभिचारात्।नतत्राप्युत्तरकालवैशिष्ट्यस्यप्रागज्ञातत्वान्नव्याभिचा
रइतिशंक्यंविशेष्यभूतार्थेव्यभिचारादित्यर्थः।द्वितीयमुद्घाटयति।नन्विदानीमेवेति।असिद्धोहेतुरित्याहनपूर्वेति।इदानीमेवा
वागतत्वेसिद्धेप्रागनधिगतत्वंसिध्यतिनास्ति।द्वाविदानीमेवावगतत्वसिद्धिरितीतरेतराश्रयाद्धेतुसिद्धिरित्यर्थः।तृतीयमनुवद
ति।ननुपूर्वापरेति।पूर्वापरकालसंबंधिविषयिणीतावत्प्रत्यभिज्ञादृष्टा।सावमध्येऽनवगतिमंतरेणनोपपद्यते।अन्यथातत्रा
पिप्रत्यभिज्ञास्यादित्यर्थः।अन्यथोपपत्त्यापरिहरति।नप्रत्यभिज्ञेति।धारावाहिकज्ञानगम्येनात्मनिपूर्वापरप्रत्यभिज्ञादर्शना
त्सदावगतआत्मन्यपीतियोजना।अर्थापत्त्यंतरमुद्भावयति।मध्यइति।ज्ञानजन्यास्मृतिज्ञानस्मृतिः।तस्याअभावादितिवि
ग्रहः।अनवगत्यभावेपिस्मृत्यभावसंभवशंकांव्यावर्तयितुंज्ञानेतिविशेषणं।अवगत्यंगीकृतौतद्विनाशेवसंस्कारस्यावश्यं

तत्व० ५० भावात्तन्मूला स्मृतिः स्यात्तत्र वस्तुतोऽस्त्यनवगतिरित्यर्थः। अस्मरणमन्यथोपपन्नमित्याह नावगत इति पथिपतितोपलब्धतृणादिवत्सैव स्म
णसंभव इत्यर्थः। अनुभूयमानमावरणं कथं युक्तितो निरस्यत इति शंकते। तथापीति। प्रतीतिमंगीकरोतीति सत्यमिति तर्हि प्रतीत्यनुसा
रेण प्रसेतव्यमथाश्रीयतामित्याशंक्याह विषयैरिति। अर्थप्रतिपत्त्यप्रतिपत्त्योः प्रमाणेनानवगतेः प्रतिपत्तुमयोग्यत्वात्साक्षिणा स्वाध्य
स्तानवगतिरनुभूयत इति न तद्विरुद्धसिद्धिः न च घटोऽज्ञात इत्यनुभवानुपपत्तिः। लोहित्यमुखयोः स्फटिकावत्प्रतिबिंबितयोः परस्प
रसंसर्गो यथा प्रतिभासते लोहितं मुखमिति तथाज्ञानात्मनोरात्मन्यध्यासात्परस्परसंबंधप्रतिभासोपपत्तेरित्यर्थः। माननत आवरण
प्रतिपत्तावपि साक्षिणस्तत्प्रतिपत्तिसंभवादर्थोऽनवगत इति प्रतिपत्तेर्मुख्यत्वमित्याशंक्याह न बाध्यस्तस्येति। आवरणभंगमंतरेणार्थप्र पूस० ५०
गा तिपत्त्ययोगात्तद्भंगो वक्तव्यः स च किं प्रमाणादुत साक्षिणः नाद्य इत्याह। द्वितीयं द्रागिवादिति। न द्वितीयः साक्ष्यधीनसिद्धितया तन्निवर्त्यत्वायो

गादित्यर्थः। मानासंभवस्यार्थनमुपसंहरति। अर्थानुपपत्तेरित्येतत्प्रपंचयति नैवेति निष्पादितक्रिये कर्मण्यविशेषाधायिनः साधनस्य
साधनन्यायातिपातादावृत्तरूपेणात्मन्यज्ञानमावरणलक्षणमतिशयं कथमादध्यादित्यभिप्रायः विषयलक्षणाविधुरतामुपपाद्या
विषयत्वमुपसंहरति तस्मादिति। विमतमनाज्ञानविषयस्तज्जनितातिशयानाधारत्वाद्व्यतिरेकेणात्मवदित्युक्ते सिद्धसाधनमेतदि
त्याह तत्राहेति। तच्चेत तत्स्वरूपं चेतिन तत्स्वरूपं तस्यावभासस्तथोक्तः। तमिति विग्रहः अज्ञानात्मकं यत्स्वरूपमनात्मवस्तुषु तस्यावभा
सोऽमविद्यानप्रतिबध्नातीति तत्र हेतुमाह। जडेऽपीति। अविद्रूपस्येन तत्त्वप्रकाशाप्रसक्तेर्न तमतिं बध्नीत इत्यर्थः वशब्दोऽवधारणार्थः नैव
प्रतिबध्नातीति। कथं तर्ह्यनात्मनो विषयत्वं निद्धिष्टमिति शंकते किंत्विति। आवरणानाधारेप्यज्ञानस्य विक्षेपहेतुत्वादनात्मविषयत्वं
युक्तमित्याह नान्यत्वैदेवेति। रूपांतरावभासहेतुरित्यत्र वस्तुत इत्यर्थः। अनात्मनः सत आहत स्वरूपत्वे संप्रत्यज्ञात इति व्यवहारानुपपत्ते

रजातत्वमन्यनिमित्तं वक्तव्यमित्याशंक्यान्यथोपपत्तेमैवमित्याह तत्रेति। अनात्मविषयांतःकरणपरिणामानुदयलक्षणवैकल्यादि
त्यर्थः। शंकांतरनिरासपरो वायं ग्रंथ इत्याह अथवेति किं तच्छंकांतरं तत्राह चैतन्येति। स्वतःप्रकाशात्मसत्तावपि नित्यचैतन्यसंनिधापर्यं
प्रकाशप्रतिबंधलक्षणकृत्यसंभवात्कथं नाज्ञानविषयत्वमित्यर्थः प्रमाणवैकल्यादित्यत्र प्रमाणशब्देन किं वृत्तिज्ञानं विवक्षितमुता
त्मस्वरूपं आद्ये प्रश्नप्रतिवचनयोर्व्यधिकरणत्वं द्वितीये तस्य नित्यत्वेन वैकल्यादित्यसंगतमित्याशंक्याह नात्मेति प्रमाणस्य साधकस्येति
यावद्वैतन्यस्य नित्यत्वेन वैकल्यानुपपत्तिमुक्तां धुनीते आवरणादिति। अनावृतचैतन्यस्याविषयसाधकत्वात्तदावरणाद्विषयानवग
त्युपपत्तेर्न पृथगावरणकल्पनमित्यर्थः। टीकागतचशब्दार्थमाह तश्चेति। आत्मावरकाज्ञाने सत्यपि तत्प्रतिपत्ति वदनात्मावरकम
ज्ञानमिति मतेपि तत्प्रतिपत्तिः किं न स्यादित्याशंक्यास्मन्मते पदार्थतत्त्वं तत्र भातियज्ञाति तत्र नावृतमितियुज्यते तन्मते तु न तथाना

त्मप्रथायामप्यज्ञानस्य तदावरकत्वादित्याह यद्यपीति अस्त्वज्ञाननिवृत्तिः को दोष इति चेत्तत्र वक्तव्यं किमनात्मावरकमज्ञानमेकं उतनाने
ति। तत्राद्यं दूषयत्यतः सत्यामेवेति। त्रिष्वपि कालेष्वात्माविद्यायां सत्यामेव विषयप्रतिभासदर्शनान्नाज्ञाननिवृत्तिः युक्तेतियोजना
रजतप्रतिभासोसाक्षात्तत्कारणत्वेन न तत्समयेस्थितिहेतुत्वेनोत्तरत्र विपर्ययोत्तरजनकत्वेनेति त्रिकालवर्त्तित्वमविद्याया इति न विषय
ज्ञानान्निवृत्तिर्युक्तेत्यर्थः। अत इत्येतन्नानात्मावरणामित्यनेन संबध्यते द्वितीयमनुवदति तन्नु शुक्तिकेति। अन्यदेवेत्यत्रान्यदन्यदे
वेतिवीप्सा द्रष्टव्या। अतश्च ज्ञानेनावरणभंगे। विषयप्रतीतावसे विद्यांतरादिपर्ययांतेराश्वाविनुद्धर इत्यर्थः। नचावरणनिवृत्तौ शुक्तिप्र
तिपत्तिवदात्मतत्त्वप्रतिपत्तिरपि स्यादित्यपि शंक्यमित्याह अन्यत्वेति कल्पनागौरवप्रसंगात्रेयं कल्पना शोभां विभर्त्तीत्याह तत्रेति वि
षयाग्रहणव्यवहारानुपपत्त्या तत्राप्यावरणकल्पनमित्याशंक्याह विषयेति। वृत्त्यनुदयाद्वै तन्यावरणाद्यविषयाग्रहणव्यवहारानुप

तत्त्व० ५२ पत्त्यात्तत्राप्यावरणकल्पनमित्याशंक्याह विषयेति। वृत्त्यनुदयाच्चैतन्यावरणाद्विषयाग्रहणोपपत्तिरित्यर्थः। अनात्मनोज्ञानविष
यत्वं पराकुर्वतः पूर्वापरपराहतिः स्यादिति शंकते कथं तर्हीति। अज्ञानस्य तत्रातिशयांतरजनकत्वात्तद्विषयत्वाभिधानमुक्तमित्याह
तदाहेति शुक्त्यज्ञानस्य तदनाच्छादकत्वेपि कथं रूप्यांतरावभासजनकत्वमिति चेत्। तत्र वक्तव्यं किमनाच्छादकत्वाद्विपर्ययजनकत्वा
भावः साध्यते। अहो विपर्ययहेतुत्वादाच्छादकत्वमिति तत्राद्यं निराकरोति। हेतुरेवेति। शुक्त्यज्ञानस्य तदनाच्छादकत्वेपि विपर्य
यहेतुत्वं घटते। शुक्त्यवच्छिन्नचैतन्यस्यावरकत्वाच्छुक्त्यवच्छिन्नचैतन्यविषयप्रमाणोदयेनावरणे निवृत्ते विपर्ययनिवृत्तिप्रसिद्धेरतस्त
दावरणेन विपर्ययजनकत्वं युक्तमित्यर्थः। विमतं शुक्त्याच्छादकं तत्र विक्षेपहेतुत्वात् यो यत्र विक्षेपहेतुः स तदाच्छादको यथा चैतन्यस्ये राम० ५२
त्याशंक्याह। केवलमिति। आच्छादकत्वाभावेप्युक्तविधया विपर्ययजनकत्वोपपत्तेरप्रयोजको हेतुरित्यर्थः। आत्मावरकमज्ञानमना

त्मनि विक्षेपं जनयतीत्युक्तं तदाक्षिपति। नन्वत्रापीति। अनात्मावरकत्वानंगीकरणात्कथमनुपपत्तिसाम्यमिति शंकते कथमिति। पू
र्वोक्तानुपपत्त्यभावेप्यनुपपत्त्यंतरं दर्शयितुमाहेति मतं दर्शयति शुक्तिकाज्ञानमिति। अस्त्वेको दोष इत्याह तत्रेति। अज्ञानस्यानुभू
यमानत्वात्कथं तन्नातिक्षेप इत्याशंक्याह। नन्वितिरेकाज्ञानवादे तन्निवृत्तावज्ञानांतराननुभवप्रसंगो तं शब्दार्थः। कल्पनागौरवप्रसंगान
भेदकल्पने त्याशंक्याह। अध्यासस्येति मिथ्याभूतस्य सत्योपादानतानुपपत्तेर्नायं पक्षः साधुरित्याशंक्याह उपादानेति। ज्ञानेनाज्ञा
ननिवृत्त्यनिवृत्त्योरपि नानुपपत्तिरित्याह। व्यतइति अनिवृत्तौ तावद्दोषाभावमाहास्मिन्पक्ष इति। तर्हि सविलासाज्ञाननिवृत्तेर्बाधु
कत्वं कथं घटते त्याशंक्य पक्षांतरमाहाथवेति। मायां तु प्रकृतिं विद्यादित्यादिवाक्यात्कल्पनालाघवानुगृहीतान्मूलाज्ञानमेकमेष्टव्यं।
तस्य चानंतावस्थाः कल्प्यंते व्यवहारनिर्वाहाय तत्र च कारणत्रितयानुरोधेन काचिदवस्था तत्तदाकारेण विवर्त्तते। तस्यां चा

तत्व० ५३ धिष्ठानतत्वसाक्षात्कारान्निवृत्तायां विपर्यासनिवृत्तिरिति न किंचनावद्यमिति द्रष्टव्यं। उपादाननिवृत्तिमंतरेणोपादेयनिवृत्तिप
क्षे निर्मोक्षप्रसंग इति चोदयति। कथं पुनरिति। ज्ञानादज्ञाननिवृत्त्यदृष्टावपि तरत्यविद्यां विततामित्यादिवाक्यात् ज्ञानादज्ञाननि
वृत्तिरिति शान्यं। शास्त्रस्यापि ज्ञानानुसारेण ज्ञाननिवर्तिबोधकत्वाभ्युपगमादित्यभिप्रायेणाह दृष्टद्वारेणेति। ज्ञानस्य विरोधि
निवर्तकतायाः लोके दृष्टत्वादज्ञानस्यापि ज्ञानविरुद्धत्वात्तन्निवर्त्यतावगतेरित्याह नैष इति। नीलाद्यर्थप्रतिपत्त्यप्रतिपत्त्योस्तत्रावरण
स्य दुरधिगमत्ववद्विक्षेपस्यापि दुरधिगमत्वमधिष्ठाने प्रतीयते विपर्यासस्यैवाभावादनधिगतिरधिष्ठाने न त्ववगते न तत्र विक्षेपाधि
गतिरित्याशंक्याह। नचावरणेति। अधिष्ठानसामान्याकारसंघटिततया रूपांतरं छन्नं त्वाधिगम्यते तद्विशेषबोधस्य क्रमविरो
धित्वादिति कुत आवरणपक्षोक्तदोषप्रसंग इत्यर्थः। अनात्मवदात्मनो ज्ञानविषयत्वानुपपत्तेस्तज्जनितातिज्ञाया निरूपणादिति सम० ५३

शंकते। नन्वेवमपीति। अज्ञाने क्षेपीत्यर्थः। अनात्मावरणं विनात्मैव विक्षेपसंभवेपीति वा। अज्ञानं निमित्तं यस्य तदज्ञाननिमित्तं आव
रणं च तत्कृतं चेत्यावरणकृत्यं। नन्वनात्मनि प्रकाशाप्रसक्त्यावरणानुपपत्तावप्यात्मनि स्फुरद्रूप आवरणं संभवतीति चोदयति क
थमिति। तत्र वक्तव्यं किमावरणं प्रकाशनाशः उत तत्कार्यप्रतिबंध इति विकल्पाद्यं दूषयति न तावदिति। न हि द्रष्टुर्दृष्टेर्विपरिलोपो वि
द्यत इति स्वरूपानपायप्रतिपत्तेः रूपविनाशे आत्मनोपि विनाशप्रसंगान्नाद्यः पक्षो युक्त इत्यर्थः। द्वितीयं निरस्यति। नापीति विषय
स्फुरणं कार्यं विषयावभासात्मनोस्तत्रत्वान्न तत्प्रतिबंधः शक्य इत्यर्थः। नयनादिकारकाणां सहकारिप्रतीक्षया कार्यकरत्ववत् ज्ञा
नस्यापि कार्यजनने कारकत्वात्सहकार्यपेक्षा। ततश्च प्रतिबंधसंभव इति शंकां व्यावर्त्तयति प्रतीक्षेति। ज्ञानस्य कारकत्वे सहकार्य
पेक्षा। तदेवासिद्धं। कार्यं कुर्वाणं कारकमित्युच्यते न चेदमर्थाश्रयमतिशयमादधाति। प्रध्वस्तादिषु तदसंभवादित्यर्थः। आवरणं

संभवफलमाहतस्मादिति।ननुप्रत्यक्षादिनाज्ञानमसाधि।अतःकथमाक्षेपइतित्राहानुपयोगादिति।नाज्ञावमदृष्टार्थंकिंत्वाव
रणार्थंतद्वोक्तविषयादुर्निरूपमितिकथमज्ञानासिद्धिरित्यर्थः।आवरणाभावेनित्यमुक्तत्वप्रसंगात्।तदेष्टव्यमितिसमाधत्ते।त
त्राहेति।आवरणदुर्निरूपत्वेवादितेतत्प्रतिसमाधेयंनत्वप्रतिसमाधीयते।नवानभासस्यावरणकल्पकत्वं।पुरुषांतरंसंवेदनेव्यभि
चारात्प्रत्यगात्मनीतिविशेषणकं।तंचनपश्यामइत्याशंकातात्पर्यमाहायमर्थइतिनास्तिनप्रकाशतेचेतियोयमात्मालंबनोव्यवहा
रःसआत्मन्यावरणमंतरेणनोपपद्यतइतिसंबंधः।नैवंविधोव्यवहारोस्त्यहमितिसत्तास्फूर्त्तिदर्शनादित्याशंक्यकश्चीयात्मकव्यव
हारेप्यशनायाद्यतीतात्मनिनैवंविधोव्यवहारइत्याहात्मगतत्वेति।आवरणमंतरेणापिपुरुषांतरेसंवेदनवत्तथाव्यवहारोपपत्तिरि
त्याशंक्याहास्तिप्रकाशइति।आभावस्याधरकत्वंभावर्त्तयितुंभावरूपेणेत्युक्तं।आवरणाभावेप्येवंविधोव्यवहाराभावस्तदर्थःमस

तिचेतिएवमपींद्रियसंयोगाद्यभावेनेत्यादृशोव्यवहारस्तदर्थमाहप्रतिपुष्कलेति।इंद्रियसंयोगमाभूरःकिंनस्यादित्याशंक्याह।सति
पुष्कलकारणइत्यादिनेति।सन्निहितेयथेकुड्यादिनावृतेप्रकाशतइतिव्यवहारात्रंपुष्कलकारणशब्दार्थः।माभूत्तर्हिव्यवहारइत्या
शंक्यतस्योपलभ्यमानत्वादावरणंकल्प्यमित्याहातइति।अनुमानंचेत्यस्यायमर्थः।विमतोव्यवहारःभावरूपाज्ञानप्रयुक्तावरण
निमितः।अस्तिप्रकाशतइतिव्यवहारपुष्कलकारणेसतितद्विपरीतव्यवहारत्वात्।पत्रैवंतव्यैवंयथास्तिप्रकाशतेघटइतिव्य
वहारइति।एवंतात्पर्यमभिधायाक्षरार्थंदर्शयतितत्सिद्ध्यर्थमित्यादिनाप्रत्यक्षिं।तीत्यंतेनग्रंथेनविशेषतणावैयर्थ्यमित्युक्तं
तन्निरस्यतितत्सिद्ध्यर्थमिति।अर्थ।पत्तनुमानेनदृष्टांतार्थः।जडवस्तुन्यनवभासोग्रहणानिमित्तोननथात्मनिस्वप्रकाशत्वादित्य
र्थः।आवरणंदुर्निरूपमित्युक्तमनुवदतिकिंतर्हीति।अनवभासएवदुर्निरूपइतितत्राहनास्तितियोग्यतायाःकल्पकमाह।व्यवहा

तत० ५५ रेति। अनात्मनिप्रतिबंधमंतरेण विक्षेपवद्विक्षेपयोस्तु किं प्रतिबंधेनेत्याशंक्यानवच्छिन्नस्फुरद्रूपानंदात्मनि प्रतिबंधं विना विक्षेप
एवनोत्वसति अन्यत्र स्वत एव प्रतिबद्धत्वान्न प्रतिबंधापेक्षेत्याह। नवेति। आत्मा स्फुरद्रूप आवृत इत्येतद्विरुद्धमित्याशंक्य किमाव
रणप्रतीतिं निरस्यति उत तस्य यौक्तिकत्वं नांत्यो गीष्ठतेरित्याह। विधेति। वशाद्वेनाप्रतीतिपक्षं निरस्यति। अहमज्ञो मामन्यं च
न जानामीत्यावरणानुभावान्न तन्निरास इत्यर्थः। स्वयंप्रकाशेऽपि पुरुषांतरसंवेदनेयथाग्रहणं तद्वदत्रापीत्याह न नु प्रमाणेनेति। त
त्र भिन्नत्वात्प्रमाणवैकल्यादग्रहणं युक्तं अत्र नु प्रत्यक्षेणः प्रत्यक्त्वमेवमित्याह नेत्याहेति। अज्ञानादन्यन्निमित्तं यस्य तद्वि
धेनेत्यन्यन्निमित्तं तस्य भावस्तत्त्वं तस्मादित्यर्थः हेत्वसिद्धिमुक्तं निरस्यस्यतत्त्वलितिनिमित्तान्तरदुर्निरूपत्वमतः शब्दार्थः। बु
ध्यादेरपिव्यवधायकत्वदर्शनात्कथमज्ञानमेवव्यवधायकं तत्राह मूर्त्तेति। प्रलक्षणः प्रसक्त्वरूपत्वान्न मूर्त्तद्रव्यं तद्व्यवधायकमि राम० ५५

MEMORIAL

त्यर्थः। तथापि कथंभावरूपाज्ञानसिद्धिरित्याशंक्याह तद्इति। भावरूपेण स्वत्रतासत्यार्थः कथितः। अत्र लक्षणार्थः इत्यपौनरु
क्त्यं अज्ञानशब्दार्थं पयोलोचनया ग्रहणाभावाज्ञानमित्याशंकते नन्वग्रहणेति। अज्ञानमित्यत्र नञः किमभावोऽर्थः उतत द्विरोधी
त्याहोतदन्यः आद्यग्रहणाभावस्यादित्याह। ग्रहणेतिद्वितियेग्रहणनिवर्त्यं भ्रांतिज्ञानमेव स्यादित्याह मिथ्याज्ञानेति। तृतिये
संस्कारः स्यादित्याह तत्संस्कारोत आवरणानुपपत्त्या ग्रहणादिविलक्षणग्रहणनिवर्त्यमज्ञानमित्याशंक्यान्यायोपपत्ति
माहातएवेति विक्षेपहेतुत्वमपि तेषामेवेति च शब्दार्थः। अज्ञानशब्दस्यान्यथास्युत्पत्तेर्मैवमित्याहेनेत्याहेति। संस्कारमात्रमेव शे
षो यस्याज्ञानस्य तत्संस्कारमात्रशेषमित्यज्ञानाभावः प्रतियत इत्याशंक्याह तत्रापीति। अहंकारादिविक्षेपस्य विपरीतरूपस्य
संस्कारमात्रस्य शेषो यस्मिन् ततत्थोक्तं शेषशब्दो भावप्रधानः तच्छेषत्वं यथा स्यात्तथा सुषुप्त्यादौ स्थित्वा जागरादौ कर्मो

तत्व॰ ५६
दिवज्ञात् विक्षेपरूपेण प्रादुर्भवति तत्त्वानवभासविक्षेपहेतुज्ञानमेष्टव्यम्। इतरथा संस्कारमात्राद्विक्षेपप्रादुर्भावासंभवा
त्सुषुप्त्यादौ मुक्त्यापत्तेश्चेति टीकार्थः। सुषुप्त्यादावज्ञानस्यकल्पकाभावात् कथं तत्रावस्थानमिति टीकार्थानभिज्ञः शंकते य
कमिति त्र्यस्तानवभासानुपपत्त्या तत्राज्ञानसिद्धिः नवान्यथासिद्धिः। तथाहि किं तत्रत्वादनवभासः। उत मिथ्याज्ञानात्स्वहोत
त्संस्काराद्दृष्टवाग्रहणात्। किंवा कर्मणः उतान्यस्मादिति विकल्प्याद्यं दूषयति। नतावदिति। नचानन्य। निमित्तत्वादित्यत्रा
स्यविकल्पस्य निरस्तत्वात् पुनस्तन्निरसनमनुपपन्नमिति शंक्यं मतभेदेन पुनर्निरासासंभवादित्यर्थः। द्वितीयं दूषयति नापी
ति। सुषुप्तेः सर्वकार्यप्रविलयरूपत्वात्तत्र मिथ्याज्ञानाभाव इत्यर्थः। तृतीयं दूषयति। नापि तत्संस्कारेति। प्रतिबंधकत्वाभावेन राम॰
नुमाह। सत्त्वपीतीति विमतो नतत्त्वावभासप्रतिबंधकः संस्कारत्वात् रजतभ्रमसंस्कारवदित्यर्थः। चतुर्थं दूषयति। नाप्यग्रहणे ५६

ति किमग्रहणं स्वरूपस्य ग्रहणस्वरूपस्य ग्रहणस्याभावः उत आगंतुकस्य नाद्य इत्याह स्वरूपेति। स्वरूप इति हेतुगर्भविशेषणं
द्वितीयं प्रत्याह स्वयंप्रकाशमान इति। कादाचित्के ग्रहणाभावेप्यात्मनः स्फुरणात्तत्तस्य प्रतिबंधकत्वमित्यर्थः। पंचमं निरस्यति। ना
पीति। अनवच्छिन्नानंदात्मचैतन्यस्यानवभासप्रसंजनमिष्टमिति शंकां निरस्यति अणुमात्रस्येति। अज्ञानप्रतिबंधे सत्यपि य
थाचिन्मात्रावभासस्तद्वत् तथा कर्मप्रतिबंधकपक्षेपीत्याशयेन शंकते ज्ञानेपीति वैषम्यादित्याह नतस्येति। अज्ञानस्य चित्प्रति
भास्यत्वात् प्रतिबंधकत्वमित्याशंक्य किमेतत्त्वमनमस्त्रियोच्यते उत मन्मतमिति विकल्प्याद्यं प्रत्याह नवाज्ञानस्येति फलोदय
नुपपत्तिगम्यत्वात्कर्मणोपीत्यर्थः। द्वितीयं प्रत्याह नवेति। न केवलं प्रतिबंधकत्वे मानाभावः। अस्ति वै परित्येमानमित्याह संस्का
रत्वादिति। विमतानि न प्रतिबंधकानि संस्कारत्वात् भ्रांतिसंस्कारवत्। नवासिद्धिः कर्मशब्देन यागादिसूक्ष्मरूपाभिधानादि

त्यर्थः प्रतिबंधकांतरस्य चानिरूपणादनादिभावरूपाज्ञानमेवष्टव्यमित्याह तस्मादिति। अस्वंउतमोगुणस्यतत्प्रतिबंधकत्वात्तत्रा
विशेषादज्ञानसिद्धिरिति शंकते ननुद्रव्यांतरमिति। प्रमाणाभावान्नैवमित्याशंक्याज्ञानमात्रं सनुतमः प्रमादेसंजयत्युतेत्युनयसि
द्धस्यतमसः प्रतिबंधकत्वे संभवान्नाज्ञानकल्पनमिति त्याह किमज्ञानेनेति। विकल्पासहत्वान्नैवमित्याहनैतदिति द्रव्यांतरं नित्यम
नित्यं वा। नाद्य इत्याह ब्रह्मेति। कुंभप्रतिपत्तिप्रतिबंधकसंतमसध्वंसकुंभोपलंभवत्प्रतिबंधकभंगेन ब्रह्मप्रतिपत्तिर्वक्तव्या नवनि
त्यवतद्भंगः सुकर इत्यर्थः। द्वितियेपितत्किंकर्म्मणानिवर्त्यते उतज्ञानेनेति। नाद्यो मानाभावादयुक्तश्चेत्यभिप्रेत्याद्वितीयं दूष
यति। ज्ञानेनेति एवं स्वपक्षं प्रसाध्य परपक्षं प्रतिक्षिप्य मुपसंहारयति। अत्रेति। भट्टमताद्विशेषमाह सर्वेति। पंचस्थलेष्वेवभट्टा
ट्टमते आस्यनु सर्वत्रेति विशेषः। जल्पनेहेनुमाह वेदांतार्थेति वेदांतव्याख्यातृत्वात्तस्यापि संप्रदायवित्त्वं तत्राह गहनेति। वे

दांतार्थश्चासौ गहनश्चेति वेदांतार्थगहनस्तत्र संप्रदायहीन इत्यर्थः। वेदांतार्थगहनोयः संप्रदायस्तद्धीन इति वा विग्रहः। तर्हि तज्जल्प
ननिरासप्रयासो मुधा तत्राह दुर्ज्जनेति। दुर्ज्जनाः श्रौतस्मार्त्तमार्गाननुसारिणः जल्पनमाहनकिलेति। संसारकार्यानुपपत्त्याज्ञा
नं कल्प्यतमित्याशंक्य परमार्थत्वात्तस्माज्ञानकार्य्यत्वमित्याह सकलेति। सता सोम्य तदा संपन्नो भवतीत्यादिवाक्यात्सुषुप्तौ ब्र
ह्मभावप्रतिपत्तेर्नाज्ञानलक्षणं प्रतिबंधकमस्ति ततश्च न तस्य संसारहेतुत्वमित्याह। वस्त्वाश्रयेपीति। एवं ब्रह्मलोकं न विंदंति
सतिसंपद्य न विदुरिति वा ज्ञानस्थितिप्रतिपत्तेर्वंचनांतरस्य च विक्षेपाभावाभिप्रायत्वात्। अज्ञानस्य कथं संसारहेतुत्वाभा
व इत्याशंक्याहासंसारेति। संसारविमोक्षात्प्रागविच्छिन्नमुत्तरकाले च विच्छिन्नमज्ञानं नेत्यर्थः। विसकाशस्याविरोधित्वा
ज्जप्रकाशस्य च सुतरां विरोधित्वान्नाज्ञाननिवृत्तिसंभव इत्यर्थः। किंतर्ह्यनवभासनिमित्तमित्याशंक्याहकिंत्विति। अय

तत्व० ५८ हणादेर्वानवभासतिमितमित्याह भ्रांतीति चशब्दात्संस्कारस्याज्ञानत्वमुक्तं भ्रांतेरज्ञानत्वेऽपि रत्नेत्यर्थान्तं संस्कारस्याज्ञान
त्वेऽनिरस्तत्वं स्यादग्रहणं तद्योग्यताया प्रतिषिद्धिमित्यभिप्रेत्य भ्रांतिं निरस्यत्ययं प्रत्यय इति भिन्नातिन्नविषयत्वेन सर्वप्रत्ययपयार्थ्या
त्भ्रांतिसिद्धिरिति किंशब्दार्थः प्रश्नमत्वोत्तरमाहाहंकारेति। सिद्धांतिसोयहासमाशयमाविष्करोति अहो इति विस्मरणशी
लत्वमाह खंड इति विमतं प्रमाणं भिन्नविषयत्वात् खंडो गौरिति प्रत्ययवदित्यर्थः विमतमप्रमाणं निषिध्यमानविषयत्वात् इदं
रजतमिति प्रत्ययवदित्यनुमानं विरोधं शंकते नन्विदमिति। किं निषिध्यमानविषयत्वमात्रं हेतुरुत प्रतिपन्नोपाधौ निषिध्यमानवि
षयत्वं नाद्यो व्यभिचारादित्याह। तत्राद्यमिति। द्वितीयमनुवदतीदं रजतवदिति। इदमि प्रतिपन्नं रजतं तत्रैव निषिध्यते नेदं रजत
मिति। तथात्मनि प्रतिपन्नं मनुष्यत्वं तस्मिन्निषिध्यत इति तस्य भ्रांतित्वं खंडो गौरित्यस्य तु न देहे परित्याज्य भ्रांतित्वमित्यर्थः एषो राम० ५८

पि हेतुस्तत्र व्यभिचारतीत्याह न खंडो गौरिति गोत्वोपाधौ प्रतिपन्नस्य खंडस्य न तत्र निषेधः किं तु मुंड इति न व्यभिचार इत्याशंक्या
ह। नायं खंड इति किं खंडस्य केवलमुंडे निषेधः उत गोत्वोपहिते। नाद्यः। अप्रसक्तेः इह भूतले घटो नेत्यत्रान्यत्र भूतलसंसृष्टतया
प्रतिपन्नस्य स्मर्यमाणस्यान्यत्र निषेधो दृष्टो न वा खंडः कदाचिदपि मुंडे प्रसक्त इति कथं निषिध्येत। द्वितीये गोत्वोपहितमुंडे खंडस्य
निषेधसमये विशेषणीभूतगोत्वे निषेधः स्यात् यथेदमिति प्रतिपन्नमिदं रजतोपहितशुक्तिव्यक्तौ निषिध्यते तद्वत्तथा च प्रतिप
न्नोपाधौ निषिध्यमानविषयखंडज्ञाने व्यभिचार इत्यर्थः। गोत्वमुपाधिर्यस्य व्यक्त्यंतरस्य तद्गोत्वोपाधितस्मिन्निति विग्रहः। गोत्वे
वावाधिगोत्वोपाधिस्तस्मिन्निति वा। अनुच्छिन्नव्यवहारत्वमुपाधिरिति वारयति। तत्रेति। नायं खंडो गौरिति निषेधप्रत्ययोत्तरका
लमपि खंडे गोव्यवहारो लक्ष्यते न तथा ब्रह्मसाक्षात्कारादूर्ध्वं मनुष्यत्वव्यवहार इत्यर्थः साधनव्यापकत्वान्नायमुपाधिः साधु

तत्व० ५९ रित्याह तदहमिति। साक्षात्कारोत्तरकालमपि प्रारब्धकर्म्मानुरोधादहं मनुष्य इति व्यवहारदृष्टेः साधनव्यापकत्वेन प्रमाण्यं स्या
दित्यर्थः प्रारब्धकर्मसमाप्तेनूत्व्यवहारस्योच्छेदात्र साधनव्यापकत्वमित्याशंक्याह मोक्ष इति। तत्केनं कं पश्येदिति मुक्तौ सकलव्यव
हारोच्छेदप्रतिपत्तेः कथमनुच्छेद इत्याशंक्यास्मन्मते सर्वस्यावोधविलासत्वात्तद्ध्वंसे तद्ध्वंसः तत्त्वतु समस्तपरमार्थत्वादनुच्छेद इ
त्याशयेनाह तत्त्वेनेति। भिन्नाभिन्नविषयत्वामसिद्धमिति शंकते जातिव्यक्तीति। अत्यंतभेदे सत्ताभेदे च जातिव्यक्त्यादिभाव
स्यासंभवाद्भेदाभेदावित्यर्थः। तेषामभावादित्यस्यैषोऽर्थः। तत्तावच्छरीरात्मनो जीतिव्यक्तिता। उभयोर्द्रव्यत्वात्। अत एव न गु
णगुणीभावः नापि कार्यकारणता शरीरस्य भौतिकत्वान्नापि विशिष्टस्वरूपतादंडवैशिष्ट्यस्यैवं तत्र तावच्छरीरस्यात्मातं
त्रत्वात्। न वांशांशिता। आत्मनो निरवयवद्रव्यत्वादिति। किमिति तेषामिति लिता नाप्रयोजकत्वमुत प्रसक्तानां योमेलनस्य बा राम० ५९

दिरप्यभावादिति चेतसि निधाय चरमं निरस्यति। तर्हि शरीरेति। न च प्रयोजकगौरवप्रसंगः। त्वयापि तस्येष्टत्वादित्यर्थः। शरीरा
त्मनोर्भेदाभेदानंगीकारे सिद्धान्तविरोधोपीत्याहान्यथेति। जातिव्यक्त्यादीनामन्यतमस्य प्रयोजकत्वमित्यभिनिवेशश्चाद्ध्योपिसु
वाद इत्याहास्ति चेति। सकलस्य ब्रह्मकार्यत्वान्न जीवकार्यतेत्याशंक्य जीवस्य तदभेदाज्जीवकार्यत्वमप्यस्तीत्याह ते तत्त्वेनेति। असि
ध्यादिदोषवैधुर्यादनुमानं निरवधमिसुपसंहरति तदिति। अहं मनुष्य इत्यादिप्रत्ययानां याथार्थ्यान्न भ्रांतित्वमित्येवोचस्यं प्रति
समवायिकारणपर्यालोचनयापि भ्रांतित्वं प्रतिक्षिप्यत इत्याह किं चेति। किं भ्रांतिरंतःकरणपरिणामः आहो आत्मपरिणाम
इति विकल्प्याद्यमनूद्य दूषयति। भ्रांतिज्ञानमित्यादिना मृज्जस्य घटस्य तत्त्वनाश्रयत्ववदाश्रयत्वमज्ञानस्यांतःकरणपरिणा
मत्वेन स्यादित्यर्थः। जपाकुसुमलौहित्यस्य स्फटिकेषु स्फुरणवदात्मन्यज्ञानप्रतिभाससंभव इति शंकते अंतःकरणेति। भे

तृत्व० दाभेदमतेप्यासएवनसंभवतीत्यभिधायिसंप्रतितदंगाकस्योत्तरमाह।तथापीति।भूतेरात्मसंबंधःसन्असत्वानतावस्यत्व
६० मित्याहान्यथाख्यातीति।नाप्यसत्वमपरोक्षप्रथानुपपत्तेरित्यर्थः।द्वितीयंप्रत्याहनवेति।निरवयवद्रव्यत्वेनपरिणामायोग्यत्वा
दितिहृत्वर्थःपरिणामित्वमंगीकृत्यज्ञानकारेणपरिणामोऽस्त्वित्याहनवेति।सुषुप्तौहितस्यनकिंचिदवेदिषमितिपरामर्शात्सु
षुप्तौज्ञानमुपेयंनचनित्यं।करणविरमेपिभावात्।तथाचैकज्ञानाश्रयस्यज्ञानांतराकारेणानपरिणतिरित्यर्थः।तन्मतेज्ञानस्य
गुणत्वमुतद्रव्यत्वंनाद्यइत्याहज्ञानगुणस्येतिनित्यज्ञानगुणस्येत्यर्थः।प्रतिज्ञातेर्थेहेतुमाह।यांतरेति।एकद्रव्याश्रितरूपरसाद्य
गुणद्वयव्यावृत्त्यर्थमर्थांतरेतिविशेषणं।कटकाधारहेम्नस्तदैवरुचकानाधारत्ववत्रित्यज्ञानाश्रयस्यज्ञानांतराश्रयत्वानुपपत्ते तृम०
रित्यत्वपक्षोपिदुर्घटइत्यर्थः।ज्ञातिज्ञानासंभवेतिसंस्कारोग्रहणंकिंवानस्यादितिशंकामुपसंहारव्याजेननिरस्यतित ६०

MEMORIAL

स्मादिति।मिथ्याज्ञानाभावान्नतत्संस्कारसंभवः।नाप्यग्रहणंग्रहणस्यस्वभावतयातदभावासंभवादित्यर्थः।कूटस्थेज्ञान
संबंधासंभवमाशंक्याहानादीति।अथवात्मन्यज्ञानाभ्युपगमेज्ञानेनतन्निरासोवक्तव्यः।नवसेसंभवतीतिधर्मान्यथात्वेअ
न्त्रफलवद्धर्मिण्यप्रथात्वप्रसक्तेरित्याशंक्यधर्मस्यसमारोपितत्वान्नैवमितिपरिहरतिअनादीति।इष्टानिष्टसाधनज्ञानपू
र्विकेप्रवृत्तिनिवृत्ती।नेवनसर्वसंकरमतेसंभवतःसर्वस्यकीर्णत्वात्सत्त्वादिदोषग्रहग्रस्तत्वाज्जीवनमपिदुर्लभमभिप्रेत्यो
पसंहरत्यलमतिप्रसंगेनेति।अज्ञानस्योत्तरत्रापिसाध्यमानत्वात्पौनरुक्त्यमित्याशंक्यापरिहरत्यत्रेति।उत्तरत्रप्रमाणांत
रस्योच्यमानत्वान्नपौनरुक्त्यमित्यर्थः।प्रागसतोनिमित्ताधीनसत्ताधीनसत्ताकत्वंनैमित्तकत्वमितिद्वितीयकल्पंनिराकु
र्वन्ज्ञानसाधनफलमाहतत्रवंभूतेनेतिटीकायामतःशाङ्क्यमिथ्याज्ञाननिमित्तइत्यनेनसंबध्यतेकार्यस्यसुषुप्त्यादौक

तृत०
६१

रणान्मनास्थितस्य पुनः समयांतरे भिव्यक्तिरतः शद्वार्थः। अनवभासहेतुत्वज्ञानाध्यासस्य प्राथम्यादहंकाराध्यासस्य कथं प्रा
थम्यमुक्तमित्याशंक्याह निष्कलंकेत्यादिना आत्मानाध्यासेनादिसिद्धे पिकारादिवित्क्रमध्यासमाश्रित्य प्राथम्यमाहेति संबंधः।
अनवभासस्यागंतुककलंकनिमित्तत्वं निराकर्त्तुमाद्यं विशेषणं। अवभासहेत्वभावभासशंकां व्यावर्त्तयितुं चैतन्येति। अंश
स्य दुःखरागादेः स्वतोसंभवात्तद्धेतुत्वेनाप्यज्ञानाध्यास आश्रयणीय इत्याह निरंशेति। बाधकस्वरूपज्ञानादेः स्वतोसंभवा
दध्यस्तत्वं वक्तव्यमित्याहाज्ञानादीनि। संज्ञायादिएदिश्शद्वार्थः अहमित्यत्र ग्रंथे शांतरानवभासाशंक्यांशांतरं समर्थितं। तदसं
गतं पूर्वपक्षसिद्धांतानुपयोगादित्याशंक्यांशांतरनिरसनमध्यासाभावोपयोगीत्याह विरंजतमिति। अंशांतरसिद्धाव
ध्यासिसिद्धिरिति सिद्धांतप्रयोजनमाह यथेति। वक्ष्यत इत्संहकारटीकायामित्यर्थः। अहंकाराध्यासमाश्रित्य शरीराध्यासमा

राम०
६१

श्रित्यानन्विदमित्यत्रसत्वेनोपपद्यते। तस्य जडत्वेनाहंकारसमानयोगक्षेमत्वादित्याशंक्य तासर्यमाह न त्वंतःकरणेति। न केवलं
पृथगुपलब्ध्यभावोपि त्वभेदेनेत्याहाध्यस्ततयेति। अधिष्ठानतत्त्वबोधापोद्यत्वादप्यध्यस्तत्वं युक्तमित्याहात्मतत्त्वेति न तस्य प्र
पाउत्क्रामंतीत्यादिपुलयश्रवणादित्यर्थः ततो वैलक्षण्यमाह शरीरं पुनरिति। अध्यस्यमानमधिष्ठानसमानरूपाधिकृततयो
पलभ्यत इदंत्वन्यथेत्याहेदमिति। आरोपितस्य केवलसाक्षिवेद्यत्वं दृष्टं तद्वन्नेत्याह केनलति। तत्र हेतुमाह। च्छुरैरिति। इदमंशा
रोपितरूपानततोन्यत्रोपलभ्यत इदंत्वन्यथेत्याहलोकांत इति। किंच शरीरस्यात्मन्यध्यस्तत्वे तत्रैव लयः स्यादज्ञानापरिकल्पित
सर्पादिवदिनान्यत्र अन्यत्र लयः श्रूयते पृथिवीं शरीरमित्यत्र अतोपि नाध्यास इत्याह भूतेष्विति। अध्यस्तत्वापत्तीत्याभावेपिप
रिकल्पितोपकरणत्वस्यासिद्धेरित्याशंक्य शरीरादेः कल्पितत्वमुक्तं तच्चारुकल्पितोपकरणत्वस्यासिद्धेरित्याशंक्याह शरीरादी

तत्व० ६२

तिपदार्थस्वरूपस्य तादर्थ्येन स्पष्टत्वात्स्वरूपेणापि मिथ्यात्वमनुमातुं शक्यत इति संबंधः। तादर्थ्येनात्मार्थत्वेनेत्यर्थः। आत्म
न आप्तकामत्वात्कथं शरीरादेस्तदुपकरणत्वं तथा कल्पितोपकरणत्वं चोपे। क्षितं स्यादित्याशंक्य तादर्थ्येनेत्येतद्विवृणो
ति मिथ्येति। मिथ्याध्यासो कल्पितश्चेति मिथ्याकल्पित। सव कर्त्ता भोक्ता प्रमाणैस्तावदोषसंयुक्तश्चात्मा चेति तथोक्तः
ज्ञानबाध्यत्वं मिथ्याशब्दार्थः समारोपितत्वं कल्पितपदार्थः। शरीरादेरात्मार्थत्वं प्रपंचपतिकार्यत्वेनेति। कार्यतावांकर्त्रादि
भिर्यथाक्रममनुषंगः विमतं कल्पितं कल्पितोपकरणत्वात्स्वप्नावाप्तछत्रादिवदित्यर्थः। छत्रादेरेव कल्पितत्वं नोपक्रियमा
णस्येति दृष्टांतवैषम्यमाशंक्य दृष्टांतांतरमुक्तं टीकायामिति द्रष्टव्यं। ऐंद्रिएकत्वादेः स्वप्नवदुपपत्तिः पृथिवीशरीरमि
त्यत्र शरीरस्य मृते पुनात्यंतिको लयो निर्दिष्टः। तथात्मोत्क्रांतावपि शरीरणि रोपत्वं भोयुक्तं। चिदधिष्ठानस्य तत्रापि भावा

राम० ६२

दित्यर्थः सप्रयोजनस्यैवोपसंहरणादविवक्षितत्वं विषयस्येत्याशंक्योपलक्षणपरतया व्याचष्टे तादृगिति। नित्यशुद्धादिल
क्षणं वस्तु तादृक्पदार्थः। सचासावर्थश्चेति तदर्थः सविषयो यस्यासौ तदर्थो विषय इति विग्रहशंकां व्यावर्त्तयति तस्यैवेति। अस्मा
त्मा वासौ वनुभवश्चेति तथोक्तः अर्थशब्दस्य विषयवाचित्वं व्यावर्त्तयत्स यथार्थ इति। शास्त्रारंभस्यासिद्धत्वादक्षरव्याख्यानमेवक्रि
यतामथशब्द आनंतर्यार्थ इत्यादि किमाहेत्यादिनेति शंकानिवृत्त्यर्थमाह कोयमित्यादिसूक्तं। तत्रादिशब्देनास्यानर्थहेतोः प्र
त्यितरप्युपात्तमिति शंकां निरा। यितुमाह सर्वलोकेति। आह कोयमित्यादेरध्यासपरत्वे एकेन भाष्येणाध्याससिद्धेः किंबहुभि
रित्याशंक्याध्यासलक्षणादिपरत्वान्नवैयर्थ्यमित्युक्तं तत्रापीतरेतरानुपपन्नं अध्यासपरत्वं लक्षणादिपरत्वं चेकमुतनाना
प्रथमे उत्तरवैयर्थ्यं द्वितीये परस्परपराहतिः। एकस्योभयरूपत्वानुपपत्तेरित्यत आहेदानीमिति। लक्षणादिताध्यासस्य प्रतिपि

पादयिषितत्वाल्लक्षणादावचांतरतात्पर्य्यमध्यासेमहातात्पर्यमितिनव्याहतिरित्यर्थः। कथंपुनः प्रत्यगात्मनीत्यतःप्राक्‌नंस
नूपरांतदारभ्यसंभावनापरमितिटीकार्थः। अस्तुतः सिद्धाध्यासोपस्थापकत्वेपियथातथापीत्यादिभाष्यस्यार्थवत्त्वंतल्ल
क्षणादिभाष्यस्यापीत्याशंक्याहलक्षणेतितथापीत्यादेरध्यासानुवादेनविषयादिपरत्वेनार्थवत्त्वंतथास्यलक्षणादिप
रत्वात्। नवतघुस्त। अन्यतएवलक्षणादिसिद्धेरित्यर्थः प्रमाणाभाष्यस्यसंभाविताऽसंकीर्णबुद्धिजनकत्वाभावान्नल
क्षणादिवदर्थवदितिचोदयतिकिमितीति। अध्यासस्यसंभावनादिबुद्धिजननाद्द्वैयर्थ्यमित्याहतत्राहेति। अनिर्णीतस्याऽसंभावि
तस्यचनिर्णयोनुपपन्नइतिवदताऽलक्षणसंभावनेअपेक्षितेइत्युक्तंस्यात् तथाचविरोधइत्याशंक्यलक्षणादेरनपेक्षित
त्वंनब्रूमः किंतुप्रमाणबलादेवतत्सिद्धिरित्याहप्रमाणमितीति। यत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्येदितिव्यावृत्तिसंभा

वनयोर्निराकरणात्कथंसंभावनादीत्याशंक्याहस्वदेशेति। यद्यथात्मसाक्षात्कारादूर्ध्वंसर्वस्यासंभावितत्वात्तथापिव्यवहाराव
स्थायांसंभावितत्वादिवटतरत्यर्थः। प्रमाणात्सिद्धेपिसंभावनादेःपृथगपेक्षादर्शनाल्लक्षणादिकमर्थवदितिशंकते। नचेनुमा
नादिति। कार्यलिंगेनकारणमात्रप्रतिपत्तौतद्विशेषब्रह्मपरमाण्वादिषुलक्षणादिकमर्थवन्मानंदृष्टमित्यर्थः। ननुप्रत्यक्षदृ
ष्टपिधरित्र्यादौलक्षणापेक्षादर्शनादध्यक्षानुभवनिर्णयेविशेषतोदुःसंपादमितिकथमुक्तमितितत्राहविशेषतइति।
सामान्यतोदृष्टेलक्षणाद्यपेक्षायामप्यसाधारणाकारेणप्रत्यक्षतयादृष्टेनान्यापेक्षेत्यर्थः प्रमाणभाष्येणाहममाभिमा
नएवसिध्यतिनाध्यासइतिकथंतयोरैक्यादित्याशंक्यसमुदायतात्पर्यमाहतत्रेति। तत्रप्रमाणभाष्येतानापन्नोद्यत्वमविद्यात्व
प्रतिभाससमानशरीरत्वभ्रांतिता। साक्षात्‌नेमिथुनीकरणात्मकत्वमध्यासत्वंतदसहिलक्षणत्वंमिथ्यात्वंसिद्धांतसाशयमज्ञा

तत्त्व० ६४

नानद्बोदयतिनन्वन्यस्येतिनिमित्तकारणेहेतुषुसर्वासांभायदर्शनमितिकात्साधनस्मरणात्कस्यहेतोरितिकस्माद्धेतोरित्यर्थः।
गृह्याभिसंधिरेवपरिहरति।नानुभवेति।प्रमाणेसत्यप्यनुभवोनेतिव्याहतमितिचोदयतिननुप्रमाणइति।मिथ्यात्वविषयंप्रमा
णमेवनेतिस्वाशयमाविष्करोतिप्रमाणेनेति।बाधेसत्यध्यासानुभवोभवतीतिकथंतस्याध्यासनिवर्तकत्वादित्याशंक्याहबा
धानुपपत्तिरितिसत्त्वेआत्मवद्बाधानुपपत्तेर्मिथ्यात्वमित्यर्थः।अहंमनुष्यइत्यादिप्रत्यक्षप्रत्यक्षशब्दार्थः।विवादाध्यासितो
व्यवहारोध्यासनिबंधनःव्यवहारत्वात्स्वप्नादिव्यवहारवदित्यनुमानेअनुमानशब्दार्थः।प्रमातृत्वादिव्यवहारोव्यवहारशब्दा
र्थः।अष्टवर्षंब्राह्मणमुपनयीतेत्यादिरागमः।आत्मन्यनात्मावभासप्रमाणस्यबाधपुरस्कारेणप्रवृत्तत्वान्नप्रमाणं।।रोप
स्यमिथ्यात्वइतिचोदयतिनन्विहापीति।अन्यस्यान्यात्मताप्रतिपत्तौविवेकप्रतिपत्तिनाथ्येत्तेनुपयोगादित्याशंक्योपयोग

राम० ६५

माहान्यथेतिवासावौभावेइतरेतरविवेकाप्रतिपत्तेरितरेतरावभासएवनसिद्ध्येदित्युक्तंतस्यकृत्स्नमाधिरित्याशंक्याहयौकि
कृति।नचैतावतैवमिथ्यात्वसिद्धेःप्रमाणांतरंन्यर्थमित्यपिशंक्यं।अपरोक्षत्वसमस्यापरोक्षप्रत्ययंविनानिवृत्तेरित्याशयेना
हापरोक्षबाधस्येति।बाधकप्रत्ययंविनामिथ्यात्वासिद्धिश्चेत्स्वयएवसंपाद्यतांकिंलक्षणेनेत्याशंक्यातइति।लक्षणमेवबहुव्य
मित्यस्यायमर्थः।नप्रमाणमात्रेणालंकिंतुलक्षणेनापिमविस्ममितिप्रसिद्धाध्यासलक्षणाभिहितेतल्लक्षणव्याप्तत्वादहं
ममाभिमानोप्यध्यासइतिसत्यतिततश्चबाधकप्रत्ययइतितदुपयोगित्यालक्षणंकथ्यतइत्यर्थः।लक्षणमंगीकृत्यसंभा
वनामाक्षिपतितर्हीलक्षणेति।संभावनांविनानिर्णयासिद्धेःसापिवक्तव्येतिशंकायामाह।प्रमाणेनेति।प्रामाणिकस्या
प्यसंभावनयायोग्यत्वमुक्तंटीकायांतत्कथमसंभावितत्वेप्रमाणिकत्वानुपपत्तेःप्रामाणिकत्वेवासंभावितत्वासंभवादित्याशं

तत्व० मद्वयमप्यनुभूयत इति परिहरति सत्यपीति। नीरंध्रे सवितरि निर्दुष्टकरणस्य कथं सुषिरप्रतिभास इत्याशंक्याह दृष्टवशादित्यौ
६५ त्पत्तिकेति। भविष्यदनिष्टसूचक औत्पातिक इत्यर्थः। असंभावनयाप्रामाणिकस्याप्यपवादवत्प्रमाणेनासंभावना
पाद्यमानादृष्टात्तद्वत्किं न स्यादिति चोदयति ननु प्रमाणेनेति। असंभावनावाहुल्यादसंभावनयाप्रमाणिकस्यापि ह्यपवादोप्यु
क इत्याह्यसंभावनेति। अविषय इत्यत्र विषयशून्यत्वमुक्तं उत विषयत्वराहित्यं नाद्यः शशादेर्भावान्नेतरो स्मत्प्रत्ययविष
यत्वान इत्यत्राहाधिष्ठानेस्यति। अविद्यादिसंगीत्वादसंगित्वमसिद्धमित्याशंक्याह इष्टुर्व्यतिरिक्तस्येति। अध्यासनिमित्तस्या
नंदादेः स्वरूपस्य गुणस्य वांगीकृते। केनचिदित्साद्यनुपपन्नमित्याशंक्याह अधिष्ठानस्येति चैतन्याधिष्ठानत्वात्रातन्मात्रता
नमारोपविरोधि इदमाकारज्ञानवदित्सत आहाधिष्ठानेति। सामान्यविशेषभावेनभेदात्सामान्यज्ञानमविरोधि विशेषज्ञानं तत्व० ६५

तु विरोधि न तथात्र सामान्यादिभेदाभावादित्यर्थः। अविषयादिरूपात्मन्यनधिगते संभावनाबुद्धिरुताधिगत इति विकल्पोभ
यथाप्यसंभवतीत्याह न त्वात्मनीति द्वितीयं पक्षमादायोत्तरयति नैतद्व्यापारमिति। अधिगतेध्यास एव न तिष्ठतीति यदुक्तं तदेव वि
विचनिय। अविषयादिरूपात्मनि किं परोक्षतया प्रतिपन्नेध्यासनिवृत्तिः उतापरोक्षतयेति विकल्पाद्येनानुपपत्तिरित्याहात्मन्य
तिपरोक्षावभासस्याध्यासाविरोधित्वान्नाध्यासनिवर्तकत्वं ततश्चासंभावनाबुद्धिः स्यादित्यर्थः। द्वितीयपक्षस्त्वंगीक्रियत इ
त्याहापरोक्षेति। उक्तत्वादिति। यतो ज्ञानस्यैव निवर्त्तकमित्यत्रेत्यर्थः। संभवस्य प्रकृतत्वात्तच्छब्देन संभवपरामर्शः शंक्येत। न
च संभवतितच्छब्दस्य नपुंसकत्वादित्याशंक्य परिहरति तन्नित्यमिति लक्षणादिनामन्यतमस्यापि वैयर्थ्याभावाल्लक्षणादित्रि
तयमप्युक्तमित्यर्थः। स्मृतिरूप इत्यत्र लक्षणमेवोच्यते नेतर इत्याशंक्याह क्रमेणेति किंशब्दस्याक्षेपप्रश्नेन च प्रयुज्यमानत्वात्य

तत्व०
६६

किमर्थइति न ज्ञायते तत्राह किंवृत्तस्येति किंशब्दादुपरिवृत्तः किंवृत्तस्तस्येति यावत् उभयत्रप्रयोगेप्येकस्मिन्वाक्येनेकस्य श
ब्दस्योभयार्थत्वं यथा गोशब्दस्यानेकत्रप्रयोगेप्येकस्मिन्प्रयोगे ऐकार्थ्यं तद्वदित्याशंक्याह उभयस्येति। अभ्यासइत्युक्ते सा
मान्यज्ञानाभ्यस्त्रमात्मनीत्युक्ते विशेषज्ञानादाक्षेप इत्यर्थः तं अतन्युत्साधतेनेनेति तत्र शब्दः शास्त्रवाचीत किंवानन्तर
त्यर्थवाची आद्ये तत्र शब्दस्य अर्थत्वाद्द्वितीये त्वसंभव अर्थेन तन्त्राकोप्युच्चारणायोगादित्याशंक्याह तन्त्रेणेति आ वृत्त्याघनेकोप
कारकत्वेन सकृत्स्य याजाद्यनुष्ठानवत् प्रश्नापेक्षार्थद्वयविवक्षया सकृदुच्चारणमित्यर्थः। प्रश्नात्सेयपोर्विषयं दर्शयति ल
क्षणेति। प्रश्नोत्तरस्योच्यमानत्वाल्लक्षणार्थः किंशब्द इति शंकते उभयमत्रेति। अत्रामयं विवक्षितं वेन प्रतिवचनसमये स
न्तुदेश्यं यस्य तदर्थनिर्णयप्रधानं तस्य भावस्तत्त्वं तस्मादित्यर्थः अर्थनिर्णयपरत्वमात्रेण कथं वादत्वमिति शंकायां तत्स्वरूप राम०
६६

माह तत्रेति कथा त्रिविधा वादो जल्पो वितंडा चेति तासां। कथानां मध्ये वादः प्रदर्श्यते। पक्षश्च प्रतिपक्षश्चेति पक्षप्रतिपक्षौ तयोः परिग्र
हो यस्मिन् स तथोक्तः तावत्युक्ते जल्पवितंडयोः प्रसंगः तदर्थं प्रमाणतर्केति। प्रमाणं च तर्कश्चेति प्रमाणतर्कौ ताभ्यामेव स्वपक्षसा
धनं परपक्षोपालंभश्च यस्मिन्स तथा निर्दिष्टः। जल्पवितंडयोश्छलजातिनिग्रहैरपि साधनोपालंभौ अत्र तु न तथेत्यर्थः। सिद्धांता
विरुद्ध इत्युक्त्या अपसिद्धांतनिग्रहप्रवेशमाह पंचावयवेति विशेषणेन न्यूनाधिकौ तथा सिद्धाद्यहेत्वाभासानां प्रवेशः सूचितः स्वप
त साधनपरकीयसाधनदूषणसमर्थेनायं शब्दादि शब्दोपलक्षणैः प्रजल्पैः पंचभिरवयवैर्युक्त इत्यर्थः। भवत्वेवं वादस्वरूपं प्रकृते
तु किमायातमिति वीक्षायामाह वादीति एवंभूत इति दुरधिगमवस्तुविषय इत्यर्थः। स्वरूपविषयत्वेन प्रश्नोत्तरस्य प्राथम्यं चेत्
तद्यनवदुसरदुरूहोयमाक्षेप इति कस्मान्नोक्तवानित्याशंक्यैवं कथने श्रोतुः कुंठितमतितया प्रतिवचनार्थप्रतिपत्तिर्न स्यादित्यभि

तत्व० ६७

प्रायेणैवंप्रतिवचनमित्युक्तेनाक्षिप्तप्रतिवचनेन। तत्राक्षेपप्रश्नयोरुभयोरपिकृतत्वादाक्षिप्तंपृष्टमितिमत्वेत्येदयुक्तमित्या
शंक्याध्याहारेणटीकांयोकरोति। तेनेति। आक्षिप्तमपिपृष्टमेवेतिमत्वाप्रत्युक्तमित्यन्वयः। ॐप्रा आक्षेपस्यापिविद्यमानत्वात्क
थंपृष्टमेवेतिमननमित्याशंक्याहाक्षेपरूपमिति। अभिप्रायमजानतेवेत्यध्याहारः। श्रोतर्य्यनवबोधारोपणरतस्यानुचितकारि
त्वबुध्याप्रतिवचनाप्रतिपत्तेरात्मन्यनवबोधान्तरोपणामित्यर्थः। प्रश्नस्यापिप्रायत्वात्कथंत्वाभिप्रायंविवृणोतीत्युक्तमित्याहश
क्याह। पुनरसावितिपयप्याक्षेपःप्रश्नाभिप्रेतःपुरातथापिप्रश्नप्रतिवचनानंतरमाक्षेपोपाख्यानमित्यर्थः। परोक्तेर्वादकथात्वद्यो
तनार्थत्वमितिकथंनियमोन्यत्रापिपरोक्तेःसंभवादितिचोदयति। ननुशास्त्रेष्विति। अर्थनिर्णायपरेग्रंथेपरोक्तेरतदेवफलमि
त्याह। नेत्याहेति। अध्यासस्वरूपेपृष्टेस्मृतिरूपःपरत्रपूर्वदृष्टावभासइतितत्स्वरूपकथनमित्यघिगंतुंशक्येतेतनअप्रश्नवाक्ये राम० ६

तिटीकावैयर्थ्यमाशंक्याह। ननुलक्षणेति। आकांक्षाद्यनुसारेणपदानामन्विताभिधायित्वादध्यासपदाभावेसाकांक्षत्वेनानर्थ
क्यात्पूर्ववाक्यस्थपदाध्याहारे। मनाकिंनप्रदर्श्यतइतिसंबंधः। नतावदयमेकांतेनाविषयइत्यत्रसंभावनाप्रदर्शितेत्याशंक्या
हप्रथममिति। प्रथमदर्शनेहेतुत्वेकिमितिशंकायामाहस्वरूपमिति। परोक्तेःप्रयोजनंपृच्छतिनन्वाहेति। वादकथात्वद्योतन
र्थेपरोक्तिरितिवक्तुंशास्त्रस्यवादरूपतामाहवादेति। तत्रहेतुमाहार्थनिर्णायइति। अर्थनिर्णयेअथोअर्थपत्रसाधसंधप
जरेणपदानामन्विताभिधायित्वादध्यासपदाभावेसाकांक्षत्वेनानर्थक्यात्पूर्ववाक्यस्थपदाध्याहारेणान्विताभिधानंप्राप्तमि
त्यर्थः। अभ्यासादिदोषाभावादार्थिकमपिविशेषणंकस्मादुपादीयतेतनस्त्वत्रेतिटीकानुपपत्तिमाशंक्याहननुपरस्येति। भ्रा
करणाविरोधाभ्रमःस्मृतिशाद्वस्यकर्मपरंतत्तिशंकतेननुकुञादीनामिति। भावइतिसूत्रेणभावेघञादिविधानवदकर्तरिच

तत्व० ६८ कारक इत्यनेन कर्मादौ घञादिविधाने थकर्त्तरि च कारके संज्ञायामिति सूत्र कर्तृव्यतिरिक्तकारके संज्ञायां घञादिप्रत्ययस्य वि
हितत्वात् स्मृतिशब्दस्य न योगवृत्त्या कर्मपरत्वमित्यर्थः। कर्मणि भवि वा विशेषेण घञादयो वृद्धैः प्रयुज्यन्ते कोभवता दायो दत्तः
को भवता लाभो लब्धः। तथा पाकस्त्यागो राग इति व्याकरणस्य वृद्धप्रयोगमूलत्वात् स्मृतिशब्दस्य कर्मपरत्वं युक्तमिति समाधत्ते
तत्राहेति सूत्रस्य तर्हि का गतिरित्याशंक्याह कर्तृव्यतिरिक्तेति। अकर्त्तरि चेति चशब्दात् संज्ञायामपि घञादिर्विधीयत इति न सू
त्रविरोधः इत्यर्थः। स्मृतिरिति पदस्य तन्त्रपशब्दस्य वैयर्थ्यमाशंकते। ननु स्मर्यत इति किं शब्दः पञ्चार्थः आक्षेपार्थो वा आद्यं प्रत्याह
स्मर्यमाणेति। अस्मर्यमाणजतादौ स्मर्यमाणेन योयमात्तस्मात् सार्थ इत्यर्थः। द्वितीयमनुवदति। ननु किमुपमेति संस्का
राद्युद्बोधविषयत्वादिति शेषः। किं संस्कारोद्बोधं विषयत्वमात्रं हेतुः। तं संस्कारमात्रजबोधविषयत्वं। आद्ये प्रत्यभिज्ञावि राम० ६८

षयेणाव्यभिचार इत्यभिप्रायेण दूषयति। नेत्याहेति द्वितीयमुत्थापयति ननु चक्षुरादीति। अनुभवविरोधेनोत्तरयति नेत्या
हेति। पुरोवस्थितत्वावभासनादित्यसंबद्धमिदमो गृह्यमाणत्वाद्रजतस्य च स्मर्यमाणत्वादित्याशंक्याह यथेति। सम्यक्
स्खलेरिदं रजतमिति सामान्यविशेषयोः संसृष्टयोरपरोक्षतया स्फुरणवद्भ्रांतावप्युभयोरपरोक्षतया स्फुरणात्तद्विरुद्धं सम
रोपितस्य स्मर्यमाणत्ववचनमित्यर्थः। अपरोक्षसामान्याविवेकाद्रजत आपरोक्ष्यव्यवहारः न संसर्गसंविदस्तीत्याशंक्य
प्रतिभासकृतवैलक्षण्यमाश्रित्य संसर्गसंविन्निरूपते वार्थाभावादिति विकल्प्य प्रतिभासकृतवैलक्षण्यमसिद्धमित्याह
नहीति। द्वितीयमनुवदत्यर्थाभावइति। भविष्यदादिज्ञानमर्थाभावेथस्तितदर्थमाह। अपरोक्षेति किमेतद्युच्छितस्य बाधं
आहोविनयस्येति विकल्प्याद्यं दूषयति। नयेथेति। संविदमनतिक्रम्य वर्त्तमानो वभासो यथा संविदवभासस्तदधीनत्वादि

तत्व० ६९

तिविग्रहः।अर्थसत्ताकुतइतिपृष्टेतदनुभवादितिवक्तव्यंततश्चार्थसंविदिस्सामर्थ्येनेस्यतिसाहसमित्यर्थः।निरालंब
नज्ञानायोगादर्थाधीनःसंविन्निश्चयइत्याशंक्यकिंसंविन्निश्चयात्पूर्वमर्थसत्तानिश्चयेनभवितव्यमितिब्रूषेकिंवार्थसत्तया
भवितव्यमितिविकल्प्याद्यंदूषयति।नह्यर्थेति।अर्थसत्तायांनिश्चितायांसंवित्सत्तानिश्चयइतिपक्षेऽर्थनिश्चयएवनसिद्ध्ये
दितिहिशब्दार्थः।कुतइतिचेत्तत्रवक्तव्यंकिमर्थसत्तानिश्चयःस्वतःआहोस्विद्विषयसंविद्बलात्।नाद्योजडत्वादित्यभिप्रेस
द्वितीयंप्रत्याहार्थसत्तेति।स्वविषयसंविन्निश्चयोपिस्वतःकिंवार्थनिश्चयाधीनःआद्येस्मदभिमतसिद्धिःद्वितीयेर्थ
निश्चयस्यापिस्वतोनुपपत्तेरस्त।द्विषयंसंविदंतरादितिवक्तव्यंततश्चपूर्वपूर्वार्थनिश्चयाधीनउत्तरोत्तरसंविन्निश्चयो
नसिद्ध्यादित्यर्थनिश्चयाधीनःसंवित्निश्चयइतिपक्षंनिराकृत्यार्थसत्ताधीनःसंविन्निश्चयइतिपक्षमुत्थापयति।ननुने राम० ६९

दमिति।पुरोवर्तिनिरजतस्यनिषिध्यमानत्वात्तदसत्त्वं।तदसत्त्वेवसंविदसिद्धिरित्यर्थः।विपरीतंकिंनस्यादित्याहनतत्रेति।
उत्तरसंवेदनइत्यर्थः।प्रथमोत्पन्नतयासंजातविरोधित्वेनप्राबल्यमाहपूर्वेति।निरपेक्षतयाप्राबल्यमाहसदावेति।ने
दंरजतमितिसंसर्गःसंवेद्यतइत्याशंक्याहयथेदंरूप्ययोःसंसर्गसंविदमंतरेणाविवेकात्संसर्गव्यवहारःतद्वदत्रापीत्याहेदं
रजतमितिइदंचरजतंचाताववृत्तेतिइदंरजताभावात्तेषांसंवेदनानिपथोक्तानितेषामितिविग्रहः।व्यवहाराविसंवादा
दिदंरजतयोःसंसर्गसंविद्भावनिश्चयः।उत्तरज्ञानेतुतद्विपरीत्यान्नैवमितिवोदयति।व्यवहारेति।रजताभावज्ञानप्रयु
क्तोव्यवहारोव्यवहारशब्दार्थः।संसर्गज्ञानंसंवादज्ञानाधीनमितिवदतःसिद्धांतक्षतिरित्याहनार्थक्रियेति।स्वसमवेत
ज्ञानंस्वस्यस्वयंप्रकाशमितिपक्षस्यार्थक्रियासंवादलिंगेनसंसर्गसंवित्सत्त्वानुमितौविरोधःस्यादित्यर्थःसंविदोनुमेय

तत्त्व॰ ७० त्वमंगीकुर्वाणप्रत्याहार्थक्रियेति। संवित्सत्त्वमर्थक्रियासंविदधीनं तत्सत्ताकुत इति पृष्टे संविदंतरादिति वक्तव्यं तत्सत्त्वं च संवि
दंतरादिति पूर्वपूर्वासिद्धावुत्तरोत्तरासिद्धेर्न व्यवहारादिसिद्धिरिति स्वतरां च संविन्निश्रयेति। वक्तव्यं तथा च तद्बलादर्थसत्त्वं वक्त
व्यमिति नार्थाभावसिद्धिरित्यर्थः। उत्थितचोद्यनिराकृत्य द्वितीयमुत्थापयति नन्वप्रतिपन्न इति। नचेति शेषः किं प्रतिभाससम
येर्थाभावसंप्रतिपत्तिरुत कालांतरे नाद्य इत्याह नयेथेति। यथा प्रतिभासं रजतस्योपगमादित्यन्वयः। रजतस्य सत्त्वे कथं ज्ञानेति
रस्येत्याशंक्याहोत्तरेति। निरसनयोग्यत्वमाह मिथ्येति। परमार्थसंहैलक्षण्यं मिथ्यात्वं ह्यर्थः द्वितीयास्त्वंगीक्रियत इत्या
हैवेति प्रतिभाससमानकालो नार्थ उपगतश्चेत्तत्कथं तर्हि कालत्रयसंबंधिसत्तानिषेध इत्याशंक्याह लौकिकेति परमार्थरज
तस्यात्राप्रसक्तेः कथं तन्निषेध इत्याशंक्याह। दृष्टेति। रजताभासप्रसक्तस्यापरमार्थरजतस्यापि बुद्धिसत्त्वान्न आत्र प्रतिषेधः। राम॰ ७०

सानान्योपाधौ प्रसक्तस्य द्वृदस्य निषेधवदित्यर्थः। उक्तव्यवस्थायाः किं कल्पकमित्याशंक्य संविद्द्वयमेव कल्पकमित्याह। संवि
द्द्वयेति। इतिसस्य व्यवस्थासिद्धिरित्यनेन संबंधः। संविद्द्वयानुपपत्तिव्यवस्थाकल्पिकेत्यर्थः। अनयोः प्रत्यययोरेका संवित्त्यज्यतां त
थाच नालौकिककल्पनेत्याशंक्याहान्यतरेति। अपह्नवायोगे हेतुमाह। तथा चेति यथान्यतरसंविदपह्नवायोगस्तथोभयसंवि
दनुभवस्ततो नान्यतरापलाप इत्यर्थः नास्त्यत्र रजतमिति कालत्रयासत्त्वं प्रतीयते। मिथ्यैव रजतमभादिति प्रागसत्त्वं। तत्तदु
भयसंविदनुरोधेन कालत्रयनिषेधस्य लौकिकविषयत्वं। सदिदं रजतमित्यनुभवस्य मायाविवर्त्तरूपाविषयत्वमित्यर्थः। पुरो
वस्थितत्वावभासनमन्यथोपपन्नमिति वादयति। नन्वपरोक्षेति अविवेकादित्यत्र रजतस्मरणस्येति शेषः। निरस्तमपि वो
ध्यंगीकारादेकं तु पुनरुपन्यस्यपित्तमिति द्रष्टव्यं अनुभवविरोधान्नैवमित्याह नेत्याहेति पुरोवस्थितत्वावभासनातिरिक्तस्य

तत्व०
७१

ष्टज्ञाद्वार्थेन विभ्रमस्तथाप्यपौनरुक्त्यमिममभिप्रायेणाह केचिदिति। भ्रांतिसमये पुरोदेशसंसृष्टतया रजतस्य स्फुरणं पुरोवस्थि
तत्वाधमासन बाधकज्ञानोत्तरकालमिदमासंसृष्टतयानुसंधीयमानत्वं स्पष्टज्ञाद्वार्थ इति विभागमभिप्रेत्याह विवेकेति। बाधक
ज्ञानोत्तरकालं संसृष्टतया प्रत्यभिज्ञायमानत्वमात्रात् कथं प्राक् संसृष्टत्वप्रतीतावित्याशंक्याहान्यथेति। अननुभूतविषयता
परामर्शस्य संसर्गस्यवाननुभूतत्वात् न तद्विषयपरामर्शसंभव इत्यर्थः। स्पष्टज्ञाद्वस्यार्थांतरमाहाथवेति। संसर्गज्ञानस्य संसर्ग
प्रवृत्तिनिमित्तत्वास्पष्टत्वेति कुतो ग्रहादपि संसर्गप्रवृत्तिसंभवादित्याशंक्यापदार्थेति। नियमेवाह तद्ज्ञानादिति। यो यत्र प्रवर्तते
सतद्ज्ञानादिति प्रसिद्धं। रजतार्थीवेदमिति प्रवर्तते तस्मात्पुरोवर्त्तिद्रव्यं रजततया ज्ञाता प्रवर्त्तत इत्यवश्याश्रयणीयमित्यर्थः। पू
र्वदृष्टावभास इत्यादेरयमर्थः। रजतस्य पुरोवर्तितयाभासमानत्वेन कथं स्मर्यमाणस्वरूपत्वमित्याशंक्याह पूर्वदृष्टेति मुख्यवि

राम०
७१

षयात्तत्र नटितिप्रादुर्भवतः कथं पूर्वदृष्टत्वं घटत इत्याशंक्य पूर्वदृष्टसदृशा इत्येवं परतया व्याकरोति। नहीति। स्मर्यमाणसदृशो
न्यस्यान्यात्मनावभासमानोध्यास इत्येवं लक्षणकरणीकारे ज्ञानस्याध्यासत्वमुपेक्षितं स्यादित्याशंक्य ज्ञानाध्यासपरत्वेन लक्ष
णं व्याचष्टे तदनुपपन्नं ज्ञानार्थयोरन्यान्तरस्याप्यध्यासत्वे इतरस्यापीष्यध्यासत्वं सेत्स्यतीति किं पुनर्लक्षणोपन्यासेनेत्याशंक्या
ह यदेति यद्यप्यर्थज्ञानाध्यासयोरन्यतरनिर्देशेऽन्यतरस्यासिद्धिस्तथाप्यर्थाध्यासलक्षणस्य ज्ञानाध्यासे संभवेनाव्याप्तिः स्यात्त
दर्थं पृथङ्निर्देश इत्यर्थः। तर्हि लक्षणान्तरमेव कथ्यतां कस्मादेतदेव तत्र प्रयोज्यत इत्याशंक्य फलाद्यैवादित्याह तदेवेति। अ
वभासस्यापीदमेव लक्षणमित्यर्थादुक्तं भवतीयतस्ततो न ज्ञानाध्यासस्यापेक्षितत्वमिति योजना। आर्थादित्यत्र कस्यानुपप
त्तिरिति न ज्ञायते अत आह वाक्येति। कथमित्यादेरयमर्थः अर्थाध्यासलक्षणं कथं ज्ञानाध्यासलक्षणं कथं ज्ञानाध्यासलक्षणं

तत्व० ७२ स्यात्।नह्यन्यलक्षणमन्यलक्षणंभवतीतिचोदयतिकथमिति।अन्यलक्षणमन्यलक्षणमितिनेदृशः।अपित्वन्यलक्षणेनान्यपर
तयोरपियोजयितुंशक्यतइत्याहतदुच्यतइतियोजनमेवाहस्मृतेरिति।स्मरणंस्मृतिः।तस्यारूपमिवरूपमस्येतिस्मृतिरूपत्वं।तस्मात्सं
स्कारजन्यत्वेनस्मृतित्वमेवकिंनस्यात्इत्याशंक्यव्यभिचारान्नेत्याहनपुनरिति।संस्कारमात्रजन्यत्वेनस्मृतित्वशंकांनिरस्यतिपूर्वेति।
स्मृतिजनकसंस्कारस्ययन्मूलंतत्पूर्वशब्देनोच्यतेपूर्वंचतत्प्रमाणंचेतिपूर्वप्रमाणंतस्ययोयंविषयविशेषस्तस्यपूर्वानुभवसंभिन्नत
यानवभासकत्वादित्यर्थः।पूर्वानुभवसंभिन्नतयानवभासकस्यस्मृतिरूपत्वमप्यनुपपन्नंप्रत्यक्षवदितिचोदयतिकथमितिवैधर्म्ये
णोत्तरयतिपूर्वेति।प्राक्वृत्तप्रमाणद्वारंमूलंयस्यसंस्कारस्यतथोक्तः।तस्मात्समुत्पन्नत्वादित्यर्थः।अस्मृतित्वेसंस्कारजन्यत्व राम० ७२
मप्यनुपपन्नमितिचोदयति।नन्विति।विमतंनसंस्कारजन्यमस्मृतित्वात्प्रत्यक्षवदित्यर्थः।अनुमानादौव्यभिचारान्नायंहेतुःस्या

दित्याहसंप्रयोगेतिप्रत्यभिज्ञायाःसंस्कारजन्यत्वप्रसंगंपरास्यतिमात्रेतिव्याप्त्यादिसंस्कारेसत्यनुमानादिज्ञानमन्यथानेत्ये
वंलक्षणावन्वयव्यतिरेकौ।चक्षुष्यन्यसंप्रयुक्तेयदन्यविषयज्ञानमुत्पद्यतेसास्मृतिरितिकथमनुमानादौव्यभिचारइत्या
शंकाभिप्रायंविवृणोति।ननुसंस्कारइति।अधिष्ठानज्ञानव्यावर्तयितुमन्यविषयत्वं।अनुमानंव्यावर्तयत्यनंतरमितिसं
स्कारजन्यत्वस्यतपाद्याश्रितत्वात्तेनव्याप्तिस्मृतेर्नकारणांतरंमृग्यमित्यभिप्रेत्याहसंस्कारइति।अनंतरपदव्यावर्त्यमाह
तद्व्यवधानेतिमासिस्मृतिव्यवधानेनेतियावत्।फलितमाहतेनेति।संस्कारोऽन्यज्ञानस्यप्रमाणस्यस्मृतिरूपत्वेशोधप
न्नपीत्याहनचेति।इदमाकारज्ञानाद्रजतार्थिनोनशुक्तौप्रवृत्तिलेशदृष्टावपितत्संसर्गेनापिरजतमात्रज्ञानात्तद्देशांतरेपिप्र
वृत्तिप्रसंगात्तस्मात्संसर्गज्ञानाभावेप्रवृत्त्यसंभवस्यबाधकत्वात्तदाश्रयणीयमितिबोध्यार्थः।संसर्गज्ञानाभावेनप्रवृत्त्य

तत्त्व० ७२

संभवे चोदिते प्रवर्त्तकं किंचिदुक्तं मानं च तदुभयत इत्यसंगतिमाशंक्य निरंतरो सत्त्वयोरित्यनेन प्रवर्त्तकमुक्तमित्याह निरंतरे ति। अंतरं व्यवधानं तद्रहितत्वयोः सति विर्यस्य बोधस्य यो विरंतरोसतीत्यर्थः। इदं ज्ञानादव्यवधानेोत्पन्नं रूप्यज्ञानं प्रवर्त्तकमिति यावत् संसर्गप्रत्यये प्रसक्तिज्ञा प्रमाणं तद्धिनुद्धो हेतुरिति बोदयति। नचेति। प्रत्यक्तिमानमस्तथापि घटत इति परिहरतिनेत्याहेति। एकत्वज्ञानाभावेप्येकत्वज्ञानं जातमिति अविवेकाद्व्यवहार इत्यर्थः संस्कारमात्रजन्यत्वहेतोरप्रभकत्वेन स्मृतावसिद्धिः शंकितसानुपपन्नेह जन्मन्यनुभवाभावेपि जन्मांतरे तिक्ररसस्यानुभवत्वेतद्धेतोः संभवादित्याशंक्याह जन्मांतरेति। जन्मांतरे नुभवसंभवेपि जन्ममरणव्यवहितत्वात् तस्य स्मृतिजनकत्वमिति शाबरस्वामिवचनार्थः न केनद्वैरात्र्यपमित्यर्थः। संस्कारोत्थज्ञानं द्विविधमेवेति कथं नियमः। अयथार्थप्रत्ययस्यापि संभवादित्याशंक्याह नतृतीयमिति ज्ञानत्वय

प्राम० ७२

थार्थमात्रवृत्तिज्ञानमात्रवृत्तित्वात् प्रमात्ववदित्यर्थः। अथवा यथार्थे प्रत्ययप्रसिद्धे कथं तदपलाप इत्याशंक्याह प्रमाणेति। तत्सद्भावे प्रमाणाभावात् प्रसिद्धेरन्यथाप्युपपन्नेर्नैदिदित्यर्थः। एवकारकव्यावर्त्यमाह। न तृतीयमिति विमतं स्मृतिः संस्कारमात्रजत्वात् संमतवदित्यनुमानं विवक्षितं तत्र विपक्षबाधकतर्कं पराहतिं शंकते ननु स्मृतिरिति अयुननुकुत्राद द्वयं स्मृतिहेतुत्वेन रजतं विविक्तं प्रतियत एवेत्याशंक्याबृहस्मरामीति अप्रमुषितस्मरणाभिमानस्य स्मरणस्याविवेकत्वमस्य वस्तद्वे परित्यान्नेवमित्याह तत आहेति। संस्कारस्य सदाभावात् सदा स्मरणं स्यादिति शंकते ननु शुक्तिकेति। शुक्तिकासंप्रयोगे रजतं किमिति स्मर्यते संप्रयोगात् पूर्वोत्तरकालयोरस्मरणं कस्मादिति योजना सादृश्यसंदर्शनसमुद्बुद्धसंस्कारस्य पूर्वोत्तरलक्षणयोरभावादस्मरणमिति शंकते सादृश्यादिति तथापि रजतं स्मर्यतां स्मर्यते अन्यदेकस्माच्च स्मर्यतां इत्याह नतिसादृश्यादिति रागादीनाम्

तत्व० ७४

पिसंस्कारोद्बोधककोधंतर्भावान्नातिप्रसंग इत्याह नेत्याहेति। स्मर्यते नेनेति स्मृतिः संस्कारस्तस्य समुद्बोध इति यावत्समुद्बोधकस्या
गंतुकत्वे हेतुमाहेंद्रियादीनामिति आदिशब्देन विषयप्रमातारौ गृह्येते रागसादृश्यकाचादिदोषग्रहार्थः स्मरणस्याविवेकत्वेपि पु
रोवर्तिद्रव्यसंयुक्तेंद्रियेण विशेषांशास्फुरणासंभवान्नाविवेक इति चोदयति। ननु माभूदिति विशेषांशेप्रतिबंधसमुद्भवान्न नयनस्य
तन्नासकत्वमित्याह नेत्याहेति विवादाध्यासिता प्रवृत्तिः पुरोवर्तिरजतज्ञानपूर्विका रजतेच्छाधीनपुरोवर्तिप्रवर्तित्वात् सम्यक्रजत
प्रवृत्तिवदित्यनुमानाद्यथार्थप्रत्ययसिद्धिरिति शंकातेनन्विति विपक्षबाधकाभावादप्रयोजकत्वमाशंक्य ज्ञानद्वयं प्रवर्तकमुत
प्रत्येकं आद्येपि किं संभूय तत्र प्रवर्तकं उत क्रमेणेति विकल्पाद्यं निरस्यति। स्मृतिग्रहणयोरिति। मनसः क्रमकारित्वनियमादुभ
त्रयोश्च स्मृतिग्रहणयोः क्षणिकत्वाद्यौगपद्यमित्यर्थः। क्रमपक्षं निरस्यति क्रमवर्तित्व इति। इदमाकारज्ञानस्य रजतज्ञानव्यवहित राम० ७४
तान्न प्रवृत्तिहेतुत्वं व्यवहितपूर्वक्षणवर्तिनो हेतुत्वनियमादित्यर्थः द्वितीयेपि किमिदं ज्ञानं प्रवर्तकं उत रजतज्ञानं नोभयथापि

मासवनादेव जन्मांतरानुभूतस्मरणस्य भावः किं त्वनुभवादपीत्याह। अस्मर्यमाणत्वादिति। इह जन्मन्यनुभवाभावेपि जन्मांतरानु
भूतत्वात्तिक्तस्मरणमित्युक्तं। तन्न संगच्छते आप्तवचनविरोधात् तिक्तत्वस्य वैधुर्यादित्याशंक्य न तावदाप्तवचनविरोधः तस्य प्रापिका
भिप्रायत्वादिति सिद्धांतयति। जन्मांतरेति। आस्वाद्य थूत्कृत्य गुडादेरुपागदर्शनं तिक्तस्मृतेकत्वकमित्यर्थः। अननुभवशंकानु
पिजे रन्यथेत्याद्युक्तमित्याशंक्य जन्मादिव्यवहितत्वात् जन्मांतरानुभवस्यानुपकारत्वमुक्तं निरस्यत इत्याशयमाह जन्मेति।
अन्यथेति जन्मांतरीयानुभवस्यानुपकारत्वे न नुभूतत्वाविशेष इति। अनुभूतत्वेनास्ति यस्य तदननुभूतत्वं तस्मादनुपकारक
त्वेन विशेषाभावसाम्य इत्यर्थः। षड्रसातिरिक्तरसत्वानुभवः स्यादित्यप्रसंगः। अननुभूतस्मरणपक्षेति प्रसंगवदनुभूतस्म
रणेप्यतिप्रसंगस्तुल्य इत्याह किं मिति तातिनियामकाभावासिद्ध इत्याह दोषेति दोषात्स्मरणं इत्यप्यतिप्रसंगः समइत्याह कि

तत्व॰ ७५

मितीतिनिकृष्टस्मरणकार्यलिंगेनदोषस्यानिकृष्टस्मारकत्वमेवकल्प्यतामित्याहनचेति।अयथार्थज्ञानानाश्रयेणेसिद्धांतस्
तिरितिशंकतेतेननूतत्वइतिशास्त्रकारेणेतिसांख्येनेत्यर्थः।अयथार्थज्ञानाभावेपितद्व्यवहाराभिप्रायंतद्वचनमित्याहनित्य
हेतिकल्पनागौरवादप्ययथार्थज्ञानंनोपेयमित्याह।वस्तुमइति।प्रत्ययपाथार्थ्येभ्रांत्यनुपपत्तिःबाधिकेत्याहोच्यतइति।अख्या
तिर्भ्रमइत्युक्तंतत्राहकेयमिति।किंवाख्यात्यभावोख्यातिःकिंवातदन्यःउतात्तद्विनुद्धइतिकिंशब्दार्थः।आद्यंप्रत्याहनतावदि
तिकतिपयख्यात्यभावस्यभ्रमत्वेप्रसक्तिःसकलख्यात्यभावपक्षेसुप्तादावपिभ्रमप्रसंगःइत्यर्थः।द्वितीयेपिकिमयथाव्यव
हारहेतुज्ञानमख्यातिःउताविविक्तानेकज्ञानमख्यातिरितिविकल्पाद्यमुद्भावयतिअन्यार्थिनइतिअव्याप्त्यादूषयति
येत्रेति।वीतरागादीनांव्यवहाराभावात्तद्धेतुज्ञानमस्तीत्यर्थःरागिणामपिप्रवृत्तिमंतरेणबाधकसंदर्शनात्ननतद्धेतुज्ञा राम॰ ७५

नमस्तीत्याहकृतिनीति।द्वितीयमुद्भावयति।अथाविविक्तेति।ज्ञानमात्रस्यभ्रमत्वनिराकर्तुमविविक्तेतिविशेषणंतावत्तु
केवलमात्रज्ञानेतिप्रसक्तिरित्यर्थमनेकेति।अविविक्तत्वंकिंभेदेनास्फुरणंत्वउतैक्यमिति।विकल्प्याद्येव्याप्तिमाह।त
र्हीति।द्वितीयंदूषयति।नवेति।अनभ्युपगमेहेतुमभिधत्तेभेदेति।भेदमर्थानज्ञानेनेत्यर्थः।किंचकिंभेदःपदार्थस्वभावउ
तधर्मःनाद्यइत्याहविविक्तेति।पदार्थप्रतिपत्त्याभेदोपिप्रतिपन्नइतिनाविवेकइत्यर्थः।द्वितीयमुद्भावयतीतरेतरेतिवै
धर्म्यादिर्भेदशब्दार्थः।तद्रहितताविविक्तेतिशेषः।आतिव्याप्तेनेतन्साधीयइत्याहगामानयेति।कर्मकरणाभावेनविवेकप्र
तिपत्तेःकथमविवेकइत्याशंक्याहतत्कारकत्वयोरितिगोदंडगतकर्मकरणकारकत्वयोरित्यर्थःननुनभलक्षणाप्रवृत्तेःक
थमतिव्याप्तिरितिशंकते।तत्रापीतिकर्मकरणप्रतिपादकविभक्तिद्वयबलाद्भेदःप्रतीयतइत्यर्थः।साम्येनसमाधत्तेइद

तत्व० ७६

मीति।एतदेव्यतिरेकमुखेनाहान्यथेतिविवेकाप्रतिपत्त्यावर्पितस्यविद्यमानत्वादिदंरजतमितिप्रतिभाससंभवइत्याशंक्या
ह।नेदमिति।इदमाकाराद्रजतस्यव्यावृत्तताप्रतिपत्तौविलक्षणशब्दानुविद्धतयातयोःस्फुरणंनस्यादित्यर्थः।किंभासमा
नयोरविवेकःउतभासमानयोर्नाद्यःइत्याहकिंचप्रतीयमानेति।अपुनरुक्तप्रतिभासादिति।अपुनरुक्तशब्दद्वयादि २
वेकस्यप्रतिभासादित्यर्थः।द्वितीयंप्रत्याहाप्रतीयमानेति।सुषुप्तादावपिप्रसंगादित्यर्थः।सामान्यतःप्रतिपन्नयोर्वि
शेषतश्चाप्रतिपन्नयोर्विवेकाग्रहणंभ्रमइत्याशंक्याभावानंगीकारादग्रहएवनसंभवतीत्याहतस्मादितिख्यातिविरु
द्धाख्यातिरितिपक्षेउत्तरज्ञानस्यपूर्वज्ञानविरोधित्वात्भ्रमत्वप्रसक्तिस्तथाज्ञानप्रागभावस्यापीत्यर्थः।किंचकिमवि
विक्तानेकपदार्थज्ञानमात्रंभ्रमःआहोग्रहणस्मरणात्मकंकिंवासंसर्गज्ञान।सहकृतत्वविशेषितंअथबाधकज्ञा राम० ७६

नविषयीकृतत्वासंताभावानाधिकरणत्वविशेषितत्वमितिविकल्पाद्यमतिव्याप्त्यानिरस्यतिकिंचरजतइतिद्वितीयमव्याप्त्या
दूषयति।नवग्रहणेतिगृह्यमाणयोरविवेकोगृह्यमाणाविवेकःतस्येत्यर्थः।तृतीयमुद्भावयति।सामान्येतिसम्यक्स्थलेसंस
र्गज्ञानसंभवात्तद्रहितत्वविशेषितंलक्षणंनप्रवर्ततेतःकथमतिव्याप्तिरित्यर्थः।सामान्यविशेषादौवैधर्म्यमात्रंतेनोक्तमिति
मतालक्षणस्यातिव्याप्तिस्तदवस्थेत्याहतथापीति।नवैधर्म्यमात्रंकिंतुसंसर्गज्ञानरहितत्वविशेषितविवेकाज्ञानंभ्रम
इतिनातिव्याप्तिरित्याशंक्यविशिष्टलक्षणस्यापितत्रवृत्तेरतिव्याप्तिरित्याहनवत्वेति।संसर्गप्रत्ययस्यकिमेकमालंबनं
उतगुणगुण्यादिसंबंधःकिंवोभयंनाद्यःअत्यंतभेदवादित्वादित्याहैकस्येति।द्वितीयमुद्भावयतिगुणगुणीतिजातिव्य
क्त्यादिदिशाद्यर्थः।गुणगुण्यादिसंबंधस्यनालंबनत्वनियमःव्यभिचारादित्याहनप्रत्यभिज्ञामांइति।तृतीयोगुणगुण्यादि

तत्व०
७७

संबंधाः किमिलिता आलंबनं उत प्रत्येकं नाद्यः मेलनस्यैकविरह्यभावात् द्वितीयगुणगुण्यादिसंबंधवत्सादृश्यसंबंधोप्यालं
बनं स्यादित्यादिहेतिनित्तत्वलक्षणसंभवइत्यभिप्रायः। चतुर्थप्रत्याहास्तिचेति। अख्यातिमतेविवेकज्ञानंबाधः तत्तत्वबाधक
ज्ञानविषयीकृतत्वात्संताभावानधिकरणत्वमपितत्रास्तीसतिव्याप्तिरित्यर्थः ग्रहणस्मरणविवेकोभ्रमइत्यत्रदोषांतरंसमु
च्चिनोतिकिंचेतिविमतंस्मर्यमाणात्स्वार्थाद्विविच्यातग्रहणत्वात्संमतवदित्युक्तेविशेषविषयत्वात्तत्रविवक्तेकत्वंनचेतद्वि
शेषविषयमित्याहविशेषेति। विशेषानामभेदः उतशुक्तित्वादिः आद्येपिसकिमिदंरजतयोरत्यंतनेतिविकल्प्याद्यमनुवद
तियदीतितत्रापिकिंधर्मिप्रतियोगिज्ञानमेवभेदज्ञानंआहोस्विदन्यदितिविकल्प्याद्यंदूषयतितदेति। धर्मिप्रतियोगीज्ञान राम०
स्यभेदज्ञानत्वाद्धर्मिप्रतियोगिनोश्वज्ञानत्वाद्वैदेपिप्रथेतेत्यर्थः। द्वितीयमनुवदत्यथेति। तृतीयज्ञानमेवभेदज्ञानत्वेतदुदया ७७

साक्षत्वेज्ञानंभ्रमः स्यादित्याहतर्हीति। भेदाभानमुच्चापपत्यथनगृहितेति अस्मिन्पक्षेनभ्रमः सिध्यतीत्याहतर्ह्यैक्यमेवेति
परस्परमन्तिस्यद्वयोरन्यतरनिषेधेन्यतरविधिनांतरीयकत्वांगीकारादैक्यसिद्धिरित्यर्थः द्वितीयेधर्मेविशिष्टज्ञानंविवेचकं
तथाचधर्मज्ञानस्यतविवेकत्वंस्यात्स्वरूपभेदमात्रेणविवेकत्वेसर्वत्रापितथात्वंस्यादितिद्रष्टव्यं। ग्रहणपर्यालोचनयावि
वेकंनिरस्यतिस्मृतिपर्यालोचनयापिनिरस्यतिकिंचस्मृतिर्वेतिअप्रमुषितस्मरणाभिमानस्यविवेकत्वादत्रवतद्वैपरिसान्मे
वमितिशंकतेस्मरणाभिमानेतिस्मरणाभिमानः किंस्मृतेरनन्यः उतान्यआहोअन्यानन्यआद्येपिकिंस्मरणाभिमानस्य
स्मृतावंतर्भावः। आहोस्मृतेः स्मरणाभिमानेतत्राद्येस्मृतौस्थितायांस्मरणाभिमानस्यकथंप्रमोषइत्याश्हनतावत्स्मृतिरेवे
ति। स्मरणाभिमानांतर्भावेतत्प्रमोषेस्मृतेरपिप्रमोषाद्रजतप्रतिभासएवनस्यादित्याहत्स्यादितिद्वितीयमनूद्यदूषयतिस्म

तत्त्व० ७८

तेरिति।स्मरणाभिमानलक्षणासहकारिणःप्रमुषितत्वात्कथंविवेकत्वमित्याशंक्योसत्रज्ञानस्यकार्यजननेनान्यापेक्षत्वा
द्दपरिपूर्णामिति।तत्तीयस्त्वप्रसिद्धत्वाद्दूरापास्तइत्याहनचेति।अन्यत्सुक्तपक्षविलक्षणइत्यर्थःकिंवस्मरणाभिमानश
ब्देनकिंस्मार्यगतोधर्मविशेषःकथ्यतेस्मरणेनाभिमन्यतइतिस्मरणाभिमानइतिव्युत्पत्त्याउतस्मरणनिष्ठोधर्मःकिंवा
स्मरामितिज्ञानस्मरणाभिमानइतिविकल्प्याद्यपक्षमुच्छापपति।ननुपूर्वेति।अनुवृत्तानविद्धत्वंनिराक्रियतेनदेशादिसं
भेदः।नचज्ञानानुविद्धतर्पसत्रज्ञप्तिर्ज्ञानमितिव्युत्पत्त्यानुभवोगृह्यतेज्ञायतेऽस्मिन्नितिव्युत्पत्त्यादेशकालयोर्ग्रहणात
थाचसर्वस्यनिरासःसंभवतीतिवाच्यंतत्रहेत्वनुपपत्त्यासादित्याशंक्यतात्पर्यमाहसोयमितिसर्वेषामाकारस्यसइत्यस्यसं
भेदावगमेपूर्वानुभवदेशकालानामन्यतमेनसंभेदावगमेपीतियोजना।तत्प्रतिवृत्तेस्यैसत्त्रानुभवासंभेदमात्रस्योच्य

राम० ७८

मानत्वाआपादितस्यैवविवक्षितत्वाशंक्यपूर्वानुभवसंभेदस्यस्मरणाभिमानत्वाभावेधिकंदोषमाहतच्चेति।हिशब्दसूचि
तांयुक्तिमाहअर्थस्मृतीतिअर्थस्मृतिकारणसंस्कारस्येत्यर्थःकिमर्थज्ञानंस्वेनविषयीक्रियतेउतज्ञानान्तरेणनाद्यइत्याह
स्वेनेति।कर्मकर्तृविरोधादितिद्रष्टव्यं।माभूत्तर्हिविषयत्वंपूर्वज्ञानस्येत्यत्राहनहिपूर्वेति।अनुभवस्मरणयोरेकविषयत्व
नियमादित्यर्थः।यस्मादर्थानुभवमात्रजनितसंस्कारस्यनविशिष्टस्मृत्युत्पादनसामर्थ्यंतस्मात्तज्जनितस्मरणमप्यर्थमा
त्रविषयमित्युपसंहरतितस्मादिति।अर्थज्ञानस्यविषयतातावेपिस्वप्रकाशतयास्फुरितत्वात्स्मरणविषयत्वंकिंनस्यादि
त्यतआहनचपूर्वेति।तदेवव्यतिरेकमुखेनाहान्यथेति।पूर्वानुभवाविषयोप्यनुभवसंस्कारजस्मरणेनविषयीक्रियतेचेत्तत्
दानीलज्ञानासीतस्मरणमपिजायेतेत्यर्थःज्ञातोघटइत्यनुभवविशिष्टार्थस्मरणस्यानुभूयमानत्वात्कथंतदपह्नवइतिशं

कतेनुनुस्मर्यमाणइति। उक्तमंगीकरोति सत्यमीति। कथं तर्ह्यनुभवसंभिन्नविषयत्वं स्मरणस्य प्रतिषिध्यत इति तत्राह मत्स्
वेति। अर्थोकाशस्य शब्देनार्थनिरूपमाकथ्यमुच्यते तस्य कार्यत्वेन कारणापेक्षायामात्मसात्मा श्रयज्ञानकारणत्वेनानुमीयत इत्य
र्थः। अर्थमात्रस्मृतेः केवलार्थानुभवमूलत्वान्नानुभवसंमिश्रविषयत्वमिति द्रष्टव्यं। कथं तर्ह्यर्थस्मृतिरनुभवसंमिश्रविष
येत्यभिधानमित्याशंक्याह यस्मादिति। कस्याश्चित्स्मृतेरनुभवसंभिन्नविषयत्वेप्युद्देशेवेत्यभिधानं कथमित्याशंक्याह द्
वेति। यावन्मात्रमित्येतद्विवृणोति वस्तुमात्रं चेति स्मृतेरनुभवसंभिन्नविषयत्वेविवादो न स्यादित्यत आह। न त्वमूलेति। अ
र्थमात्रज्ञानसंस्कारोत्थस्मरणस्य केवलविषयत्वमितरस्य विशिष्टविषयत्व। तत्रार्थस्मृतेरर्थमात्रविषयत्वेप्युक्तं तदंशेपि
तु माकांक्षामुद्भावयतीन त्वेवेति। अर्थमात्रज्ञानसंस्कारजः प्रत्ययोर्थस्मृतिशब्दार्थः। अनुभवसंस्कारजः प्रत्ययः स्मृत्यंत

मितिर्विवेकस्मृतिमात्रस्य ज्ञानसंभिन्नमात्रविषयत्वे पदार्थस्मृतौ व्यभिचारः तस्मान्न स्मरणमात्रस्यायं स्वभाव इत्याह तत्रोदाहरण
मिति वाक्यार्थप्रत्ययाय प्रयुक्तपदवृंदात्पदार्थबोधः कस्मादाधीयते आहितो वा कस्मात्स्मृतिरित्याशंक्याह। वाक्यार्थेति। वाक्या
र्थप्रत्ययोद्देशेन पदानि तावत्प्रयुक्तानि तेषां च पदानां सकृदुच्चारणासंभवात्क्रमेणोच्चारणं ते भ्यश्च क्रमेणोच्चार्यमाणेभ्यो गृहीत
संगतिकेभ्यः पदार्थबोधाः आधीयंते वाक्यार्थप्रत्ययोपायिकत्वेनं यथा काष्ठैः पाके साध्ये तदर्थज्वाला। निवर्त्स्यंते तत्र स्मृतयः। पदार्थो
नां च संगतिग्रहणसमये मानांतरसिद्धत्वात्तज्ज्ञानस्य स्मरणत्वमित्याह ज्ञातत्वेति संस्काराणां सदाभावात्संततं स्मृत्युदयः स्यादि
त्याशंक्याह संबंधीति। उद्बुद्धसंस्कारस्य स्मृतिहेतुत्वात्तत्स्य च संबंधिशब्ददर्शनतंत्रत्वान्नातिप्रसंग इत्यर्थः। पदाभिहितानां पदा
र्थानामेवान्वितबोधकत्वमिति ये ब्रुवते त इमेऽभिहितान्वयवादिनः। योग्येतरसंसृष्टस्वार्थमभिदधाति पदान्येवेति ये आचक्षते तेऽन्विता

तत्व०
८

भिधानवादिनः। विमता स्मृतिर्न स्वबीजज्ञानसंभिन्नार्था स्मृतित्वात् सदार्थस्मृतिवदित्युक्तं भवतीत्यर्थः। संबंधिशब्ददर्शनात् संबंध्यं
तरस्मरणं जायत इत्युक्तं। तदनुपपन्नं शब्दार्थयोः संबंधानिरूपणादिति बौद्धः शंकते ननु कोसाविति शब्दार्थयोः किं स्वभावः
संबंधः उत कार्यकारणतालक्षणः। किं वानुपलब्धिः। आहो देशनियमः उत कालनियमः उत संयोगादिः न तावद्द्वित्वादिशं
पात्तयोरिव स्वभावः संबंधः। एकव्यक्तिसमवायाभावात्। न द्वितीयः शब्दस्यार्थकार्यत्वे मानाभावात्। नापि तृतीयः अभा
वेप्यनुपलभ्यमानीयते अर्थस्य स्वभावनिरूपत्वात्। शब्दार्थयोरनुपलब्धिसंबंधानुपपत्तेः नापि चतुर्थः। यस्मिन्नस्निग्धच्छायात्व
स्मिन् धूमोस्तीति वदेकदेशत्वाभावात् नापि पंचमः तिक्तोदयोदिरापासनिवत्कालनियमः। भिन्नकालत्वान्नापि संयोगः शब्दस्य राम०
गुणत्वादमूर्तेपि नार्थेन संयोगः गुणादीनां शब्दस्य तदनुपपत्तेः एवं संबंधांतराभावेपि प्यूह्यः। तस्माच्छब्दार्थयोः संबंधाभा ८०

वान्न संबंध्यंतरज्ञानस्य स्मरणत्वमुचितमित्यर्थः। संबंधांतराभावेपि शक्तिः संबंध इति बौद्धयति। अर्थबुद्धिरिति शब्दबुद्ध्योर्जन्यजनकत्वं
संबंधः। अर्थबुद्ध्योरुक्तविषयविषयीतेति निःशक्तिः संबंधमित्यर्थः। बुद्धिशब्दस्य स्मृत्यनुभवसाधारणतया विकल्पासहत्वान्नैतदित्याह।
किं स्मृतीति भिन्नपरस्य अनुभवजननसामर्थ्यलक्षण इत्यर्थः। बुद्धिस्थत्वात् सिद्धात्वनंगीकृतत्वाच्च प्रथमं द्वितीयं दूषयति नचेति। पदा
र्थानां प्रमाणांतरसिद्धत्वात् सदा तां स्मारकत्वमेवेत्यर्थः। पदमात्रस्य स्मारकत्वं भवतां संमतं चेति च शब्दार्थः। संसृष्टपदार्थविशेषस्य
मानांतरागोचरत्वात् कथं पदानां तत्स्मारकत्वमित्याशंक्याह। पदार्थाशेषितेति। संसृष्टपदार्थेष्वनुभवजनकत्वेपि केवलेषु स्मारकत्वमि
त्यर्थः। आद्यं निरस्यति नचस्मृतीति ज्ञातस्य संबंधस्य स्मृतिजनकत्वं उत अज्ञातस्य नाद्यः कार्यलिंगगम्यं हि सामर्थ्यं ततः स्मृतौ जाता
यां तया सामर्थ्यं ज्ञायते तस्मिन् ज्ञाते स्मृतिजन्मेतीतरेतराश्रयात् स्मृत्यंतरप्रतिपन्नात् सामर्थ्यात् स्मृतिजन्मांगीकारे नवस्थापत्तेर्न

तत्व० ८१

द्वितीयः अनुसंज्ञानामपि शब्दश्रवणेऽर्थप्रतिपत्तिप्रसक्तेः। तस्मात्स्मृतिजननसामर्थ्यलक्षणः संबंधः साधित इत्यर्थः। तत्रैव दूष
णांतरमाहान्यत्रेति। चैत्रमैत्रयोः रन्यतरदर्शनेनान्यतरस्मरणं सादृश्यादिसंबंधे सति दृष्टं इह न सादृश्यादेरभावान्न स्मरणं उपपद्यते
इत्यर्थः। विरोधिकार्यकारणभावादेरादिशब्दार्थः। पूर्वपक्षमुपसंहरति तस्मादिति। संबंधाभावाच्छब्दानामर्थबोधकत्वानुपपत्तेर्वि
वक्षाबोधकत्वं विवक्षितमुतार्थबोधकत्वाभावमात्रं आद्ये स्तावन्नोपपद्यत इत्याहोन्मत्तेति। किं विवक्षामात्रं शब्दार्थः। आहोऽर्थमा
धृता विवक्षा नाद्यः शब्दश्रवणानंतरमर्थव्यवहारानुपपत्तेः। द्वितीये प्रमाणांतरादर्थसिद्धेः। शब्दस्य तत्र प्रामाण्यमास्थेयमित्यभि
संधिः द्वितीयं प्रत्याह संबंधेति। शब्दार्थयोः स्मृतिजननसामर्थ्यसंबंधः स च ज्ञात एवार्थबोधकः न चेतरेतराश्रयत्वादिदोषः संबंधज्ञा राम० ८१
नोद्धस्य संस्कारस्यानवगतस्यैव अर्थबोधकताभ्युपगमादित्यर्थः न च संस्कारस्य सदा भावात्स्मरणप्रसंगः शब्ददर्शनोद्बुद्धसंस्कार

स्य स्मृतिहेतुत्वाऽभ्युपगमादित्याह शब्देति संबंधविशिष्टशब्दज्ञानस्यैव स्मृतिहेतुत्वं किं न स्यादित्यत आह नार्थेनेति। विपक्षे दूषणमाह।
येनेति संबंधविशिष्टशब्दज्ञानस्य स्मृतिजननसामर्थ्यं तदतिरिक्तः संबंध आस्थेयः स च न निरूपयितुं शक्यत इत्यर्थः। न केवलं संबंधा
तरप्रसक्तिरपि तु शब्दवैयर्थ्यं चेत्याह संबंधविशिष्टेनेति। अन्यतरस्यापि इत्यर्थस्येत्यर्थः प्रागेवेति शब्दजन्यस्मरणात्प्रागित्यर्थः। अ
र्थसंबंधविशिष्टज्ञानस्य स्मारकत्वे विशेषणीभूतार्थस्याप्यधिगतत्वाच्छब्दवैयर्थ्यमित्यर्थः। यत्तूक्तं संबंधिदर्शनस्य संबंध्यंतरस्मा
रकत्वे सादृश्यादिसंबंधांतरं दृष्टमिति तत्र वक्तव्यं एकत्र सामर्थ्यसंबंधस्य संबंधांतरनिरपेक्षस्य स्मारकत्वे इतरत्रापि तथात्वं स्यादिति
विवक्षितं उतान्यत्र सामर्थ्यस्य सादृश्यादिसंबंधसापेक्षत्ववत्सादृश्याद्यपेक्षत्वं साध्यते उत मूलसंबंधाभावात्सामर्थ्यातिबुद्ध्यनुत्प
त्तिरिति तत्र प्रथमद्वितीयौ दूषयति। सादृश्येत्यारभ्य बुद्धिसामर्थ्यसंबंधादन्यतः प्राक्तनेन। अत्रैषा योजना सादृश्यादिलक्षणमू

तत्व० ८२ संबंधानांस्मृतिसामर्थ्यसंबंधादर्थांतरत्वंपदस्यंतन्नविरुद्धमतइतिसंबंधः सादृश्यादिलक्षणमूलसंबंधानांस्मारकत्वंतावदन्वयव्यति
रेकसिद्धंनचसामर्थ्यरूपत्वंतेषांव्यतिरेकस्याप्यनुभूयमानत्वात्।तस्मादाद्यपक्षानुपपत्तिरित्यर्थः द्वितीयकल्पासंभवमुपपादयतिबु
द्धिसामर्थ्येति।बुद्धिसामर्थ्यलक्षणत्वाभावात्सादृश्यादिमूलसंबंधानांसामर्थ्यसंबंधादर्थांतरत्वसंबंधः अर्थांतरत्वमसंकीर्णत्वंशब्द
सामर्थ्येनसहानवस्थितत्वं।बुद्धिसामर्थ्यलक्षणंगमकंयेषांतेबुद्धिसामर्थ्यलक्षणाः तेषांभावस्तत्त्वंतदभावादित्यक्षरार्थः।यद्य
पिसादृश्यादिसंबंधेन्यतरास्मरणंदृष्टंतथापिप्रकृतेसंबंधांतरंनोपेयतेतदसंभवात्कल्पनागौरवाच्चेत्यर्थः।तृतीयंप्रत्याहबुद्धिसा
मर्थ्यसंबंधादिति।शब्दादीनांबुद्धिसामर्थ्यानामंगीकृत्यसामर्थ्याद्बुद्ध्यनुपपत्तिंब्रवीषितत्सामर्थ्यमेवनेतीतिमाचेजननीवंध्ये
तिवत्स्ववचनव्याघातः।नद्वितीयंशब्दान्वयव्यतिरेकाभ्यांशब्दस्यबुद्धिजननसामर्थ्योपालंभविरोधादित्यर्थः।शब्दार्थयोःसंबं राम० ८२

धसिद्धौसंबंधिदर्शनात्संबंध्यंतरस्मरणंयदुक्तंतदुक्तमित्युपसंहरतितस्मादिति।पदार्थस्मृतिवदितरस्मृतेरपिनज्ञानसंभिन्नविषय
त्वमित्युक्तंतत्रदृष्टांतासंप्रतिपत्तिंशंकतेकुतःपुनरिति।शब्दस्याक्तिभेदकल्पनाप्रसंगादर्थमात्रविषयत्वंयुक्तमित्याहतत्राहेति।श
ब्दप्रतिपन्नत्वमात्रेणकथंज्ञानस्यशब्दार्थत्वंआनुषंगिकार्थव्यभिचारादित्याशंक्याहशब्दसामर्थ्येतिस्मार्यगतोधर्मः स्मरणेभिमा
नइतिपक्षंनिराकृत्यस्मरणगतोधर्मः स्मरणाभिमानइतिपक्षमुच्यापपति।ननुस्मृतीतिकिंप्रत्यक्षःसविशेषउतानुमेयइतिवि
कल्पमाद्यंनिरस्यतिनेत्याहेति।अन्यद्वेतिवाशब्दएवार्थः नित्यानुमेयत्वंस्वगतरूपविधुरंवेत्यत्रशावरस्वामिवचनमुदाहरतिअत
एवेति।अनाकारामित्युक्तेबुद्धेर्निस्स्वरूपतास्यात्तदर्थमाहनिरूपितेति।ननुघटज्ञानपटज्ञानमित्याकारविशेषोनिरूपित
इत्यत्राहानिर्दिष्टेति।ननिर्दिष्टस्वाभाविकंलक्षणंयस्याः सोतथोक्तानामित्यर्थः।द्वितीयमुच्यापपतिननुक्रियेति।सुरभि

तत्व० ८३ धूमविशेषस्यागनुजदहनानुयकत्वव्याप्यविशेषस्यव्यापकविशेषानुयायकत्वमित्यर्थः।।लिंगविशेषमेवतर्हिनिरूपयेत्याह
कोसाविति किं याह्यविशेषोलिंगउतफलविशेषइतिकिंशब्दार्थः।आद्यंदूषयतिनतावदितिप्रमाणग्राह्यमेवस्मृत्यागृह्यत
इतिकथंनियमः।आभिज्ञायामयमितिप्रतिभानास्मृतौचेदितीतिशंकायामुक्तंटीकाकृता।अविकलेतिदेशकालयोःक्वविसरो
सतयाक्वचिदपरोक्षतयापरप्रतिभासोनप्रमेयभेदइत्यर्थः।द्वितीयमुपपादयतिअस्त्वितिफलविशेषएवासिद्धइत्याहनेत्या
देतिविषयभेदनिमित्तःफलविशेषःनवप्रमाणस्मृतिफलयोर्विषयभेदोस्तीत्यर्थः।स्मरामितिज्ञानस्मरणाभिमानइति
फलमुपपादयतिनन्विति।व्यभिचाराद्यस्यापिविवेचकत्वमित्याहतत्राहेतिमूलंग्रंथस्यैषायोजनायःस्मरामीत्यनुवेधःसक एम०
चिद्विषयविशेषेकालविशेषेवाभवतिनसर्वत्रेत्यर्थः।तत्रैवहेत्वंतरमाह।वाचकेति।स्मरामीत्यनुभवस्यवाचकशब्दसंभिन्नत्वनि ८३

भिन्नत्वमात्रमत्रप्रतिभातिनतुतस्याविवेचकत्वेहेतुरुक्तः।तत्राहयदिस्मृतीतिप्रागेवेत्यत्रस्मरामीत्यनुभवादितिशेषः।असंभवेदे
तुमाहविशिष्टेति।ग्रहणादेर्भेदमनधिगम्यग्रहणादिवाचकशब्दंविहायस्मरणादिवाचकशब्दप्रयोगासंभवात्प्रागेवभेदःप्र
तिपत्तव्यः।तथाचनस्मरणाभिमानस्यविवेकत्वमित्यर्थः।स्मृत्यनुभवभेदप्रसिद्धाग्राह्यविशेषआस्थेयइतिशंकतेननुस्मृतीति
प्रसिद्धिरन्यथोपपन्नेत्याहतत्राहेति।संस्कारसमुत्थत्वकृतभेदकंतस्यस्मृतिप्रमाणेसाधारणत्वादित्याशंक्याह।कारणेति।स्मृ
तेःसंस्कारमात्रंकारणंग्रहणस्यत्वनुसंप्रयोगादीत्यर्थः।स्मृत्यनुभवयोरर्थैक्येपिहेतुभेदाद्भेदइत्युक्तंप्रतिबंधाद्दूषयति।कथंचेति।
स्मृतिज्ञानानुमानयोःकिंविषयभेदाद्भेदआहोकारणभेदात्किंवासदसत्त्वाकारभावाभावाभ्यामितिविकल्पाद्यंदूषयति।अर्थवि
शिष्टेतिद्वितीयमुपपादयतिकारणेतितयोर्भेदेनसमाप्यभेदइहापीति।तृतीयमुपपादयतिसदितिसदसदाकारएवेत्युक्तिर्नृपइत्याह

कोयमितिपरोक्षदेशकालेविशिष्टत्वंस्तदस्याकारा।अहोपूर्वानुभवसंवलितत्वंउतसंस्कारजन्यत्वमितिकिंशब्दार्थः।आद्यमुद्धा
पयतिपरोक्षेति।परोक्षदेशकालविशिष्टविषयत्वस्यानुमानादावपिसंभवात्तत्रापितत्प्रसंगइत्याह।अनुमानादिष्विति।द्वितीयमनु
वदतिपूर्वानुभवेतिकिमनुभवमात्रसंभिन्नविषयत्वंस्मरणाभेदकंउतस्वजनकज्ञानसन्निकृष्टविषयत्वमितिविकल्प्याद्यंप्रसादज्ञाना
नुमानइति।द्वितीयंप्रत्याहपौषरूपेणेति।नद्यास्तीरेप्रसूनानिसंतीत्यादिवाक्यात्नदीतीरप्रसूनविषयज्ञानसत्त्वाबोध्यतेतेनस्व
जनकज्ञानसंनिकृष्टविषयत्वस्यतत्रापिभावान्नभेदकइत्यर्थः।तस्मात्तृतीयःपक्षःपरिशिष्यतइत्याह।तस्मादितिसंस्कारमात्रजन्य
त्वमेवतर्हिस्मृतेर्भेदकमितिनिशंकितोअस्त्वितिहोतिसंस्कारमात्रजन्यत्वमसिद्धमित्याहनेत्यादिनेति।किंचसंप्रेक्ष्यमाणयोरविवेको
भ्रमउतगृह्यमाणस्मर्यमाणयोःअहोस्मर्यमाणयोरितिविकल्प्यप्रथमंद्वितीयोनिरस्यतिनचेति।आत्मव्यतिरिक्तस्यनीलादेर्गृ

ह्यमाणत्वात्तत्रगृह्यमाणयोरविवेकः।नापिद्वितीयः।अहंनीलमितिप्रतिभासप्रसंगात्गृह्यमाणाविवेकात्परोक्षेस्मर्यमाणाविवे
कात्गृह्यमाणस्यपारोक्ष्यंकिंतस्यादित्यर्थः।तृतीयंदूषयतिस्मर्यमाणानामिति।गुरुमतनिराकरणमुपसंहरति।अतोनप्रमाणेति
संस्कारमात्राजन्यत्वेनस्मृतित्वाभावेपिरजतप्रतिभासस्यगतिर्वक्तव्येत्याहनवेदिति।देशांतरस्थस्यरूप्यस्यपुरोवस्थलनाप्रतीति
र्नातिरुतधीरूप्यस्याहोतिवाच्यस्येतिकिंशब्दार्थः।आद्यमवलंबते।नन्वत्रयेति।किंदेशांतरवर्तिरूप्यंलोचनेनालोच्यतेउतत
न्मनसानाद्यइंद्रियस्यव्यवहितसंनिकर्षाभावात्।नांत्यमनसोसहायस्यबाह्यप्रवृत्तेः।तस्मात्कथमन्यथाख्यातिरितिआशंक्याहतथा
हीतिकिंकेवलस्यलोचनस्यव्यवहितग्राहित्वंनिरस्यतेउतदोषस्यसध्रीचीनस्याआद्यस्त्वंगीक्रियतेद्वितीयस्तुनोपपद्यतकेवलस्य
जठरानलस्यबहुतराहारजरणवृत्ताभावेपिभस्मकरोगदूषितस्यापेक्षाहारदग्धत्ववतकेवलस्यलोचनस्यव्यवहिताग्राहित्वेमिदुष्ट

तत्व० ८५

स्यग्राहकत्वंनविरुद्धमित्यर्थः। तर्हिदेशांतरेरूप्यमितिप्रतीयादित्याशंक्याहतच्चेति। दुष्टेंद्रियेणव्यवहितग्रहणेननुभूतस्यापिग्र
हणंस्यादितिशंकते। नचनुभूतमितिसंस्कारस्यापिसहकारित्वात्तादृशग्रहणमित्याशंक्यादृष्टस्यापियेस्यकस्यचिद्ग्रहणंस्यादि
त्याशंक्याहयत्किंचिदितिसादृश्यस्यापिसहकारित्वान्नातिप्रसंगइत्याहसादृश्येतिआदिपदेनसदृशस्याप्यन्यस्यग्रहणंवा
रयतिरागआदिशब्दार्थः पूर्वपक्षमुपसंहरतितस्मादितिग्रहणात्मकंयज्ज्ञानंतदन्यथाज्ञानंनानिर्वचनीयादिख्यातिस्तत्रप्रमा
णाभावादितियोजनाविवादपदंरजतज्ञानगोचरंरजतव्यवहारपदत्वात्संमतवदित्यर्थः। समारोपितस्यान्यत्रसत्वेमानाभावान्ने
तदपिसाधिष्ठस्याहो[illegible]तश्चेति। सितभास्वरद्रव्यस्यरजतधीपदत्वमापाद्यादित्तिरप्यंगीकृतमितिनान्यत्रसत्वसिद्धिरित्यर्थः। अन्य
थाख्यातिशब्दोर्थोपिदुर्निरूपइत्याहकेयमिति। किंशब्दसूचितान्विकल्पानाहान्याकारमितिज्ञानान्यथात्वाभिप्रायेणप्रथमःक तस० ८५

ल्पः द्वितीयस्तुस्फुरणान्यथात्वाभिप्रायेणतृतीयेस्तुज्ञेयान्यथात्वाभिप्रायेणरजतस्यज्ञानमात्रवर्त्तित्वमिदमोविषयत्वंवानुभू
यतेततःकुतोवैपरीत्यमित्याहकुतइतिअन्यथाकारज्ञानस्यान्यथावलंबनतयाअनुभवपराहतत्वाद्वैपरीत्यमित्याहात्तआरोपितेअ
ननुरूपत्वमेवाहसवत्रेतिकिमाकारार्पकत्वमालंबनत्वंउतसंवित्संयुक्तव्यवहारविषयत्वंआहोसंविज्जनितानिशायामयत्वंसअ
यथाभासमानत्वंनाद्यः शुक्तेरजताकारार्थकत्वाभावातशुक्तिर्नरजतज्ञानावलंबनंतदाकारानर्पकत्वात्घटादिवदित्यर्थः द्विती
यमुद्घापयतिननुसंविदितिसंवित्संयुक्तव्यवहारविषयत्वेनालंबनत्वंवोच्यतेरंतदनिराकृतपक्षांतरनिरसनसमगतमित्या
शंक्यातिफलउत्वादेतदपेक्षिमित्याहेदंनावदिकथंफलुत्वमितिचेत् तत्रवक्तव्यंकिंव्यवधानेनसंवित्संयुक्तव्यवहारविषयत्वंउ
ताव्यवधानेनगाद्योव्यभिचारादित्याहनहीतिद्वितीयंप्रत्याहनवेतिद्रव्यार्थिनायदातदादीपतेतदाद्रूमज्ञानप्रयुक्तव्यवहारवि

तत्व० ८६

षयत्वं गुणादेस्तु च गुर्द्रव्यस्य च गुणज्ञानप्रयुक्तव्यवहारविषयत्वं न वेतरेतरज्ञानालंबनत्वं द्व्यादानी मज्ञासिद्धेरित्यर्थः न तृती
यः प्रघस्तादेरविषयत्वप्रसंगात् नापि चतुर्थः भासमानत्वं ज्ञानकर्मत्वं उभयत्वप्रयुक्तव्यवहारविषयत्वं नाद्यः भविष्यदादेरवि
षयतापत्तेर्न द्वितीयः नांतरीयकतया व्यवहारविषयस्य फलधौतमलादेरपि फलधीत्वज्ञानविषयत्वापत्तेः तस्मान्नूतदाकारार्पकस्य
विषयत्वं वक्तव्यं तच्च नास्तीति भक्तेरनालंबनत्वमित्यभिप्रायेणोपसंहरति तस्मान्नदाकारदलिपस्यातरमनुवदत्यस्तु तर्हीति। वि
कल्पासहत्वान्नायमपि पक्षः शोभनतरस्तथाह तत्राहेति पारमार्थिकत्वेनेदमालोचनीयं किं सामान्यविशेषादेरसंतं भेदः उत भेदाभे
दौ नापरत्यनुवदति न तावदिति अनेन भेदवादिनामिति हेतुगर्भविशेषणं अस्तु तर्हि परमार्थत्वमित्याशंक्याह ततश्चेति। त
तश्च संसर्गः शून्य एव प्रकाशेतेति संबंधः शून्य एवेति कथमनिर्वचनीयस्यापि संभवादित्याशंक्याहानिर्वचनीयेति। न च शून्यस्या

राम० ८६

परोक्षप्रमोपपद्यत इति अभिसंधिः। न केवलमिदं रजतमित्यादिप्रत्ययानामेवासत्संसर्गविषयत्वं किंतु खंडो गौरित्यादीनां प्रत्य
यानामपीत्याह। एवमिति। न च खंडो गौरित्यादिप्रत्ययानां न तादात्म्यमालंबनं किंतु समवायः स च सन्निति न विभ्रमत्वप्रसंग इति शं
क्यं समवायस्येह प्रत्ययहेतुत्वात्तादात्म्यप्रथासंभवादित्यर्थः। द्वितीयमनुवदत्यथेति। बाधकप्रत्ययाविरोधान्न तस्य सत्त्वमित्या
ह तत्राहेति। न केवलं तादात्म्यस्याबाध्यत्वप्रसंगः किंतु भ्रांतत्वाभिमतस्याबाधनस्यादिरित्याह खंडो गौरितिभिन्नाभिन्नविषयत्वेन गर्वेप्र
त्ययथार्थ्यादित्यर्थः। भ्रांतिबाधयोः प्रसिद्धत्वान्न शिरसनमशक्यमित्याह सर्वत्रेति नियामकाभावादित्यर्थः। संसर्गस्यासत्वे परोक्ष
प्रथासंभव इति द्वितीयं कल्पमुपेत्य पक्षांतरमुत्थापयति अस्तु तर्हीति। न तावदित्यादेरिघं वा योजना विषयबाधाबाधौ विना न स्वत
सौ। स्तः ज्ञान इति विकल्पानुपपत्तिरित्यात्मतादात्म्यस्यापरमार्थतात्मक्यावृत्तबोधस्यापि तथात्वं तदुपरित्यान्तदुपरित्यमिति विक

तत्व० ८ त्योपपत्तिरित्यभिसंधाय टीकाकृतोपेक्षितं द्वितीयपक्षं प्रतिक्षेप्तुमुपक्षिपति न तावदित्यादि तदिति दध्याकारपरिणामेति विषयसत्त्
वेन ज्ञानसत्यत्वमित्साध्यमनुवदत्यथेति। अथेत्यादेरयमर्थः। सदापरिणामप्रसंगं व्यावर्त्तयति। दोषेति। परिणामत्वेवाध्यत्वं न स्यादिहे
तदिति। दध्याकारपरिणामोदयानंतरं तद्विरुद्धक्षीराकारानुपलंभात्तदध्नो बाधः इह तु रूप्यविरुद्धशुक्त्याकारोपलंभान्न बाध इत्याशंक्यप
रिणामपक्षेपि विरुद्धाकारोपलंभोपि न स्यादिति अह। नाधीति। अपरिणामत्वे हेत्वंतरं समुचिनोति किं चेति कुविंदस्यापायेपि पटस्थिति
वद्दोषनिमित्तत्वे तदभावेपि रूप्योपलंभः स्यादित्यर्थः। निमित्तापाये नैमित्तिकापायस्यापि दृष्टत्वान्नैवमिति शंकतो नन्विति। तत्राप्य
वस्थांतरोत्पत्त्या पूर्वावस्थाविनाश एव निमित्तापायमात्रेणेति वक्ष्यति। अंगीकृत्य दूषणांतरमाह तन्न तथा सतीति। अथ पुनरित्यादिना ज्ञा राम० ८
नाद्रजतोत्पत्तिमाशंक्य निराकारतदनुपपन्नं अन्यथाख्यातिवादिना ज्ञानाद्रजतोत्पत्त्यनभ्युपगमादित्याशंक्याथेति। रूप्याकारेण

शुक्तेः परिणामसंभवेपि दुष्टकारणजाद्रजतसंविदेव रजताकारेण परिणमत इत्यन्यथाख्यात्येकदेशिनो मतं तन्मतनिरसनार्थोयमुप
क्रम इति न विरोधः अथ पुनरित्यादेस्तात्पर्यांतरमाह ख्यात्यंतरेति। अन्यथाख्यात्यतिरिक्तख्यातिवादिभिः पृथक्पृथग्ज्ञानस्य सत्यत्वमिति वादयति क
थमिति बुद्धिरूपस्य रूप्यस्य बहिर्वत्प्रतिभासात्भ्रांतित्वं युक्तमित्याह। नाहेति। आत्मख्यातिवादिनीति आत्मशब्देन बुद्धिरित्यभिधी
यते। तद्रूपस्य रूप्यस्येदंतया ख्यातिरिति योजना तथोक्तः। एवकारस्यायोगव्यवच्छेदकत्वशंकामपि निरस्यति। न बहिरिति बाधविरोधा
दित्यर्थः। प्रमाणाभावात्तद्रूप्यस्य बुद्ध्याकारत्वेति शंकतो कुत इति। मानाभावोसिद्ध इत्याह संप्रयोगेति विमतं धीरूपसंयोगजज्ञाना
विषयत्वे सति अपरोक्षव्यवहारविषयत्वात्संविद्वदित्यनुमानं। नित्यानुमेयत्वात्स्वार्थ अपरोक्षत्वादिति। घटादिव्युदासार्थं संप्रयोगे
ति। विपक्षे बाधकतर्कं प्रत्याहेति शंकतो कथमिति। ज्ञानस्य रजताकारत्वं स्वाभाविकं उतान्यनिमित्तं नाद्यः विज्ञानमात्रवादित्वात्। अत

तत्व० एवनद्वितीयेपीतिकिंशब्दार्थः अन्यनिमित्तोरूप्याकारं इति समाधत्ते संस्कारेति। विज्ञानातिरिक्तसंस्कारस्यानंगीकारात्कथं
८८ तत्परिप्रापितत्वंरजताकारस्येत्याशंक्याह। तथाहीति। नह्यज्ञानजन्मसंस्कारस्यकथंज्ञानत्वमित्याशंक्याह। नवविज्ञानेति। ज्ञाना
तिरिक्तः संस्कारः किंवेद्यः उतन। नाद्यः तयोः संबंधोनिरूपणात्। नद्वितीयव्यवहारगोचरत्वानुपपत्तेः। ततश्चज्ञानमात्रत्वंसंस्का
रस्येत्यर्थः तस्यविभागानेकक्षणव्यवहितस्यकथंकारणत्वमित्याशंक्याह सचेति शालिबीजस्यांकुरपत्रकांडादिव्यवधानेपिसजा
तीयबीजजनकत्ववद्व्यवहितस्यापिज्ञानस्यजनकत्वंयुक्तमित्यर्थः तत्रापिनबीजस्यबीजांतरजनकत्वं किंतुबीजारंभकावयवा
अंकुरादिष्वनुगताः तएवबीजबीजांतरमारंभंतेइतिनव्यवहितस्यकारणत्वमित्याशंक्याहाथवेति। रजतबोधस्तच्छब्दार्थः। प्राक्त राम०
नज्ञानस्यापिकथंरजताकारत्वंतत्स्थापकाभावादित्याशंक्याह सचेति। तच्छब्देनंपूर्वज्ञानगतरजताकारः परामृश्यते धीरूपत्वेपरमा ८८

र्थत्वाद्भ्रांतिबाधासंभवइत्याशंक्यापयाप्रतीतेस्तत्र्रभवइत्याह बहिर्वदिति। एवमात्मख्यातिंप्रदर्श्यतद्दूषणार्थमुपक्रमते। सवक्तव्यइतिप
द्रूप्यंबहिर्भातितत्संप्रतिपत्त्रप्यवबुद्ध्यतेउतविलक्षणत्वमितिविकल्यार्थः अनुपपत्तिपंक्षनिरस्यति। नचेदितिनित्यत्वानित्यत्वलक्ष
णविरुद्धधर्माधिकरणत्वात्तयोरभेदइत्यर्थः। आद्यमनुवदतिजायतेवेदिति। तत्रवक्तव्यंकिंतत्स्वतोजायेतेउतान्यस्मात्। नाद्यः। एक
स्मिन्जन्यजनकतानुपपत्तेः द्वितीयेपिकिमर्थादुतज्ञानात्। नाद्यइत्याहनार्थादिति। ज्ञानव्यतिरिक्तस्यार्थस्याभावादित्यर्थः। द्वितीय
मनुवदत्यथेति। ज्ञानमात्रस्यरजतजनकत्वंनिरस्यति। दुष्टेति। एतदपीत्यादिटीकायाअयमर्थज्ञानादर्थोत्पत्तेः क्वचिदप्यदर्शनात्त्वे
नयुक्तमितिदूषयति। एतदपीतिज्ञानमात्रस्यजनकत्वाभावेपिदुष्टकरणजन्यज्ञानस्यार्थोत्पादकत्वंयुक्तमित्याह कथमिति। ज्ञानादर्थ
संभवेपिततःप्रतीतिः कथमितिविवेचनीयं। यथाप्रतीत्या स्वयमजनितयाकिंविषयीक्रियतेउतान्येतिविकल्प्यप्रथमंप्रत्याह। यस्य

तत्व० ८९ इति। भिन्नबलत्वेन विषयविषयिभावनिरसनमनुपपन्नं भविष्यदादेरपि ज्ञानेन विषयीकरणादित्याशंक्याह जनकेति। जनकज्ञानसमये
ऽजाताभावात्तत्समये च ज्ञानाभावात्तत्रापरोक्षप्रथा नास्यात्तदस्यार्थस्य ज्ञानसमयत्वाभावेपि तद्भास्यत्वं घटते अनुमानज्ञान
स्यावर्त्तमानबोधसमर्थत्वादित्यर्थः। द्वितीयेपि किमदृष्टकरणजन्यप्रतीत्या विषयीक्रियते उत दृष्टकरणजन्यतयेति विकल्प्याद्यं
दूषयति प्रतीत्यंतरस्येति। द्वितीयेपीदं विवेचनीयं किं तां प्रति रजतस्य जनकत्वमुत नेति तत्राद्यं प्रत्याह दृष्टेति पदार्थक्रियाकारित्वादित्य
भ्युपगमाद्रजतस्यापि जनकत्वे सत्वं स्यादित्यर्थः द्वितीयं दूषयति तज्जन्यत्व इति जन्यजनकत्वाभावेपि संबंधांतरात्तत्प्रतीतिमाशंक्या
हैवेति। संबंधांतरानिरूपणान्नैवमित्यर्थः। स्मृतिप्रमोषमेवेत्युपसंहारोनुपपन्नः। स्मृतितत्प्रमोषयोर्मायावादिनानभ्युपगमादि राम० ८९
त्याशंक्याहान्यथेति प्रत्ययांतरसमानयोगक्षेमत्वात्ख्यात्यवसर इत्याशंक्य तद्वैलक्षण्यमाह नन्विति। किंकरणभूतत्वात्सामग्री

ये तेऽउतभावभूता त्याज्ञानं। आलोकमर्मभूतस्याविषय इति विकल्पार्थः। उभयत इत्यादेरयमर्थः। गत्यंतरानिरूपणात्स्मृतित्वं सिसाधयिषितं।
उतप्रश्नमात्रं नाद्य इत्याह नेंद्रियेति द्वितीयमुत्थापयति किं त्विति। प्रश्नस्य किं सामग्रीविषयः उत ज्ञानं। अथवा विषयः नाद्य इत्याह एकमिति
सामग्रीं दर्शयितुमेकमिति विशेषणं। यथार्थज्ञानसामग्रीप्रसूतत्वे भ्रांतित्वं हीयेतेति शंकते न चेंद्रियेति। विमतं यथार्थसम्यग्ज्ञानसा
मग्रीप्रसूतत्वात्। प्रमाणवदित्युक्ते असिद्धो हेतुरित्याह दोषेति लोचनस्य पुरोवर्त्तिसंयोगे शुक्त्याकारादिग्रहित्वं रूपमिति शंकां निराकर्त्तुं कार्यविशेष
इत्युक्तं। बहुविषयसंस्कारसंभवेपि रूप्यसंस्कारस्यैव कथं कार्यकरत्वमिति शंकायां तदुद्बोधकसंभवादित्याह संस्कारविशेषमिति। दोष
स्य ज्ञानसामग्र्यंतर्भावमाक्षिपति। नन्विति। प्रतिबंधकत्वविपरीतकार्यकरत्वं वा किं न स्यादित्याशंक्याह। नाधिकेति। तैलकलुषितशा
लिबीजस्य शाल्यंकुराजनकत्वमेव दृष्टं न यवांकुरजनकत्वमित्यर्थः। विपरीतकार्यदर्शनाद्दोषस्य तद्धेतुत्वमपि कल्प्यं तदित्याह। तत्रारेति।

तत्व० ९० दोषस्यविपरीतकार्यकारितायाः क्वचिदप्यनुपलंभादग्रहणउपयोगः। कार्यदर्शनंतन्यथानुपपत्तेरस्याशंक्याहनवानादेरिति। अग्रहणंग्र
हणप्रागभावः। तस्यचानादित्वान्नदोषसाध्यतेतिअर्थः। किंतर्हिदोषकृत्यमिति पृच्छति। किंत्विति। अन्यथाबोधइत्याह विपर्ययेतिसू
क्तेदोषस्यनविपरीतकार्यकरत्वमितितत्रकिंदोषस्याविपरीतकार्यकारित्वाभावः क्वचित्कः उत सार्वत्रिकइतिविकल्पाद्यमंगीकृत्यद्वितीयं
दूषयतिव्याघ्रादिवदिति। भस्मकलक्षणव्याधेर्बहून्नदाहकत्वं। दावाग्न्युपहतवेत्रबीजस्यकदलांकुरजनकत्वंचोपलब्धंनतत्रक्वचिद्दोषेपि
विपर्ययहेतुत्वंयुज्यतइत्यर्थः। प्रकारांतरेणदोषस्यसामग्र्यंतर्भावमाक्षिपति। ननुदोषइति। दोषान्वयव्यतिरेकयोः संस्कारोद्बोधेविषय कत
वयान्यथासिद्धेर्नदोषस्यविपर्ययहेतुत्वमित्यर्थः। उद्बोधकत्वंबोधजनकत्वंवाकिंनस्यादित्याशंक्याहनतृतीयमीति। उभयहेतुत्वेप्रमाण राम०
माचादित्यर्थः। विपर्ययानुपपत्त्यादोषस्यतद्धेतुत्वंनचसंस्कारत्वेनान्यथासिद्धिः संस्कारोद्बोधस्यदोषावांतरव्यापारतयातत्कारणत्वात्॥ ९०

घातित्वादित्याशयेनाह। तत्राहेति। संवलिता संवलनलक्षणासामग्रीप्रश्नोत्तरमभिधायज्ञानप्रश्नोत्तरंदर्शयितुंप्रश्नमाह। अथेति। किमे
तत्ज्ञानमेकमुतनानेतिप्रश्नार्थः। ज्ञानैक्याभिधानंसिद्धांतविरुद्धमितिबोधयति। नन्वितिविरोधंदर्शयितुंसिद्धांतमाह। इदमेति। संप्रयोग
समुत्थज्ञानस्यरजतत्वसंसर्गविषयत्वात्ज्ञानैक्यमाशंक्यकिंतदिदंमात्रसंप्रयोगजंउतरजतादिसंप्रयोगजमपीतिविकल्पाद्यंप्रत्याह। नत
द्रजतमिति। सकलविषयत्वप्रसंगादित्यर्थः। द्वितीयंप्रत्याहमिथ्येतिमिथ्यावस्तुनः प्रतिभासमात्रशरीरत्वात्प्रतिभासात्प्रागिंद्रियसं
प्रयोगायोगदेशांतरस्थरजतादिसंयोगस्यतुअवहितत्वादित्यर्थः। इंद्रियान्वयव्यतिरेकाभ्यामैंद्रियकत्वंरजतादेरनुभूयतइत्याशंक्याह। वस्तु
नीलेनेति। रूप्यज्ञानहेतुत्वधिष्ठानविषयत्वेनान्यथासिद्धिरित्यर्थः। रजतज्ञानमनैंद्रियकंचेत्कीदृशंतर्हीदमित्याशंक्याविद्यापरिणामत्वं
दर्शयितुकारणांतरंप्रतिषेधति। नापीति। स्मरणस्यनभ्युपगमादिति। स्मृतित्वानभ्युपगमादित्यर्थः। दोषस्यहेतुत्वशंकांनिरस्यति। नापि

तत्व० ति।ज्ञानमात्रजनकत्वेनसंमतेंद्रियादेर्विशेषज्ञानजनकत्वदर्शनाद्दोषस्यवातथात्वाद्भ्रमजनकत्वमित्यर्थः।वस्तुदोषयोःप्रत्येकंभ्रांस
९१ जनकत्वेपिमिलितयोर्जनकत्वंकिंनस्यादित्यतआहतद्विति।दुष्टंवस्तुर्देशांतरवर्त्यपिरूप्यंगृहीयाच्चेत्तर्ह्यंतरालवर्त्तिनासर्वेषाग्रहणप्रसं
गःइत्यर्थः।भ्रांतस्वभावादिदंरजतमितिव्यवहारविलयमियादितिशंकतेनोकिंत्विति।रूप्यतदज्ञानयोरविधानीनोद्भवत्वात्।व्यवहारंस
भवाइत्याह।विद्येति।सदापरिणामप्रसंगंव्यावर्त्तयतिवासेनेति।दुष्टलोचनपुरोवर्तिद्रव्यसंयोगादिदंमात्रविषयंज्ञानमुत्पद्यते।तदा
चेदमाकारावच्छिन्नचैतन्याविद्यास्थाभः संजायतेसावस्तुभ्रत्वासदृशसंदर्शनएगसमुद्बुद्धसंस्कारसध्रीचीनारूप्याकारेणपरिण
मतइत्यर्थः।रूप्यज्ञानाभासमंतरेणरूप्यव्यवहारासमवादेषोद्बुद्धरजतज्ञानसंस्कारसहायेदमाकारवृत्तिप्रतिबिंबितचैतन्यस्था राम०
विद्याज्ञानाभासाकारेणपरिणमतइत्याहसाक्षीतिचैतन्यस्यरजताद्यवच्छेदोरजतसंबंधः तद्धेतुर्योज्ञानाभासस्तदाकारेणेत्यर्थः।। ९१

तस्यवाचेतनत्वेनस्वविषयव्यवहारजनकत्वानुपपत्तेः सविलासाविद्यासाक्षिविषयतांभजतइत्याहस्वकार्येणेति।ज्ञानभेदात्तदवच्छिन्नं
फलमपिभिद्यतइतिकथमेकफलत्वंतत्राहविषयेति।घटस्फुरणंघटस्फुरणमितिविषयव्यावृत्ततयास्फुरणमुपलभ्यतेनज्ञानविशिष्टत
येत्यर्थः।विषयस्यापिसत्यानृतरूपेणभिन्नत्वात्कथंतदवच्छिन्नफलैक्यमित्याशंक्याह।विषयश्चेति।मिथ्याज्ञानरजतंकथमालंबनंतस्मि
न्मिथ्यात्वसिद्धेरितिशंकते।कुतइतिमिथ्यालंबनमित्यत्रमिथ्यावस्तुविषयंज्ञानंमिथ्याज्ञानमित्युक्तमयुक्तंमिथ्यात्वासिद्धेरपरिहार
त्वादित्याशंक्याहभावेति।नसज्ज्ञानंभ्रमः।आत्मज्ञानेव्यभिचारात्।तेनरजतज्ञानमिथ्यात्वप्रसिद्ध्यनुपपत्त्यारजतस्यमिथ्यात्वमुपे
यमित्यर्थः।रजतज्ञानस्यतिपाठस्यायमर्थः।नेदंज्ञानमितिभ्रमबाधानुपलब्धेः।कथंदुष्टकारणजन्यत्वंतस्येत्याशयवानशंकते।कुतइ
ति।अर्थमिथ्यात्वेतदालंबनबोधबाध्यत्वसिद्धिः।तदेवकुतइत्यतआह।भावेतिटीकायांज्ञानेभ्रमंनोपपद्यतइतिउक्तंतदिष्टमेवातः

तत्त्व० करणाविद्यापरिणामलक्षणज्ञानद्वयांगीकारादित्याशंक्य तात्पर्यमाह संयुक्त इति। धूमसंयोगस्य वह्निबोधजननेन निरपेक्षत्वं त
९२ दर्थमाह संप्रयुक्त इति। न संस्कारस्यानुमित्यादिजनने सापेक्षत्वं तदर्थमाह पूर्वेति फलितमाह न तत्रेवेति। ग्रहणस्मरणरूपेणाभिद्य
त इत्यर्थः। ज्ञानभेदे प्रवृत्त्यनुपपत्तिशंकां निरस्यति निरंतरेति निरंतरोत्पन्नज्ञानाभ्यां विशिष्टप्रवृत्तिसिद्धेः किं ज्ञानैक्यकल्पनेत्यर्थः। सं
विद्धेद्वबोधकेः स्येपरिहार इत्याद्यं का विशिष्टप्रवृत्त्यनुपपत्त्यैक्यं ज्ञानमाश्रयणीयमित्याह ज्ञानभेद इति। संसृष्टव्यवहारस्य संसर्ग
ज्ञानपुरःसरत्वदर्शनात्पूर्वज्ञानस्य चोत्तरज्ञानव्यवहितत्वात् प्रवृत्तिजनकत्वासंभवादेकं ज्ञानमास्थेयं। यद्यपि स्वजनज्ञानस्य प्रवृत्तिं
प्रति अव्यवहितत्वं तथापि न तस्य प्रवर्त्तकत्वं संसर्गज्ञानस्य प्रवर्त्तकत्वे नान्यत्रक्लृप्ततया प्रयोजकत्वद्वैविध्यापातादित्यर्थः। निरंतरो राम०
त्पत्तावपि कारणयोगपद्याभावे कार्याभाव इत्यत्र दृष्टांतमाह। तत्र यथेति। एकैकस्माद्वर्णात् नार्थबोधोदृष्टेः। नापि मिलितात् ९२

तदसंभवात् मिलितस्याप्यनुपलब्धस्य बोधकत्वे सदोपलंभापातात् उपलब्धानां बोधकत्वं वक्तव्यं न च तदुपपद्यते क्रमेणोच्चार्यमाण।
नां क्रमेणोपपत्तेः। तस्मादेकैकवर्णानुभवजनितसंस्कारसहितान्त्यवर्णोपलंभस्य हेतुत्वं अन्यथा पदार्थबोधानुपपत्तेरित्यर्थः। कार
णभेदस्य कार्यभेदव्यापकत्वात् कथं ज्ञानैक्यमिति चोदयति। ननु कारणेति। भिन्नकार्यजनकयोरपि संस्कारसंप्रयोगयोर्दैवसंनिधाना
त्कार्यांतरजनकत्वं स्वरूपेणावेत्रांकुरजनकस्यापि वेत्रबीजस्य सहकार्यनुरोधेन कदल्यंकुरजनकत्वदर्शनात्। न च सापेक्षस्य दोषस्य
निरपेक्षसंयोगसंस्काराभ्यां सह एककार्यकरत्वमयुक्तमित्यपि वाच्यं। व्याप्तिसंस्कारसापेक्षलिंगदर्शनस्य स्मृतौ निरपेक्षसंस्कारस्य चै
कलिंगिबोधजनकत्वदर्शनात् इत्याशयवानाह नेत्युदाहरणमिति किंच संयोगयोरन्योन्यनिरपेक्षकार्यजनकं न समर्थयोरप्रत्यभि
ज्ञानजनकत्वदृष्टं तद्वत्तयोः संरूपभ्रमजनकत्वं किं न स्यादित्यभिसंधायोक्तं प्रत्यभिज्ञानोत्पादनं चेति। तत्र दृष्टांतासंप्रतिपत्तिं शंकते।

तत्व० ननुतत्रापीति।अनुमितिप्रत्यभिज्ञयोरित्यर्थः।किमनुमितिप्रत्यभिज्ञाप्रामाण्यवादिनएतच्चोद्यंउततेतरस्यनाद्यइत्याह।नेत्याहेति।
९२ स्मृतिवदनयोरपिपरोक्षविषयत्वात्स्मृतिगर्भत्वमुक्तंतच्चसंस्कारहेतुतोपपादनार्थमितिद्रष्टव्यंलिंगदर्शनमात्रस्यानुमितिहेतु
त्वेऽगृहीतव्याप्तेरप्यनुमितिःस्यान्नचतथात्वस्यतेतस्माद्व्याप्तिसंस्कारसहितलिंगदर्शनमात्रस्यलिंगिज्ञानजनकत्वंवक्तव्यं
तथाप्रत्यभिज्ञानमप्युभाभ्यांजायतेसंस्कारमात्रस्यस्मृतिजनकत्वात्संयोगमात्रस्यचाभिज्ञानजनकत्वात्।नचतत्रज्ञानभेदएव
सपिशंक्यंकिंतद्देशकालसंबंधस्यतद्देशादिसंपृक्तत्वंस्मृत्यागृह्यतेउतग्रहणेननाद्यः।एतद्देशकालसंसर्गस्याननुभूतत्वेनस्म
र्यमाणत्वासंभवात्।नद्वितीयः।प्रत्यक्षस्यवर्त्तमानमात्रग्राहित्वेनपूर्वदेशादिसंसर्गविषयत्वासंभवात्स्मात्पूर्वानुभवसं राम०
स्कारसंप्रयोगाभ्यामेकंज्ञानंजायतइत्युररीकरणीयंनापिद्वितीयकल्पः।अनुमानप्रामाण्यानंगीकर्तावशिष्टस्याद्यनंता ९३

नुमानपुरःसरतोजन्मादौप्रवृत्त्यनुपपत्तेः।प्रत्यभिज्ञाप्रमापराऽपेक्षस्थायित्वासिद्धिःनक्तावानांक्षणिकत्वात्स्थायित्वासिद्धिरिह
त्यपिशंक्यंक्षणिकत्वस्यात्तत्रनिरसिष्यमाणत्वादिति।लिंगदर्शनसंस्कारयोर्लिंगिबोधजनकत्वमुक्तमाक्षिपति।ननुलिं
गेति।संस्कारस्यान्वयव्यतिरेकत्वात्लिंगिबोधकत्वमेष्टव्यमित्याशंक्यव्याप्तिस्मारकत्वेनान्यथासिद्धिमभिप्रेत्याहन
संस्कारइति।उद्बुद्धसंस्काराभावेऽस्यत्वनुदयादुद्बुद्धःसंस्कारस्तावदनुपेयस्तावताचलिंगिधीबोधसंभवात्किमंतर्गडुनास्मरणेनेत्या
हनेत्याहेति।उद्बुद्धसंस्काराभावेस्मृतेरभावादित्येतत्स्यदमितिमत्वार्थांतरमाहज्ञानद्वयेति।लिंगदर्शनस्यसंस्कारोद्बोधक
त्वयान्यथासिद्धत्वात्संस्कारएवलिंगिबोधकःनतउपसंहरणमनुपपन्नमित्याशंक्यसंस्कारस्यानुभूतमात्रविषयत्वेनानधिग
तविषयत्वासंभवात्संस्कारसहितलिंगदर्शनबोधकमित्यभिप्रायेणाह।तस्मादिति।अक्षसंस्कारयोःप्रत्यभिज्ञाजनकत्वमु

तत्व० कमाक्षिपतिनन्वनुप्रत्यभिज्ञायामिति स्मृतेरनुमित्यहेतुत्ववत्प्रत्यभिज्ञाहेतुत्वमपी त्याशंक्यैवं वैधर्म्यमाह ज्ञानद्वयेति। ज्ञानद्वययौगपद्य
९४ प्रसंगाभावात्स्मृतेः कारणत्वमुक्तं। तत्र कथं न्यायसाम्यमित्याशंक्याह। ज्ञानादिति। लिंगज्ञानं लिंगाविनाभूतलिंगिज्ञानजनकं हि शब्द
ज्ञानस्यवार्थज्ञानजननशक्तिसंबंधमात्रमिति बोधकत्वप्रकृते नु स्मृतेः प्रत्यभिज्ञानस्य च न तथाविधसंबंधोस्तीति संस्कारस्यैव का
रणत्वमित्यर्थः टीकायाः एषोर्थः। उद्बुद्धसंस्कारस्यावश्योपेयत्वान्नमध्ये स्मृतिकल्पनं इत्युक्तमापंपरामृशति अत्रमिति एवकारव्या
वर्त्यमाह न पुनरिति संस्कारोद्बोधानंतरं प्रत्यभिज्ञोत्पत्तौ द्वितीयं स्मृतिकल्पकं न पश्याम इत्यर्थः। दृष्टांतो विषम इति चोदयति। ननु प्र
मापांतरेष्विति अभिज्ञाप्रत्यक्षातिरिक्तेष्वित्यर्थः। आभिज्ञा शब्देनैकदेशकालावच्छिन्नार्थविषयं ज्ञानमुच्यते। अभिज्ञायामपि निरपे राम०
क्षहेतोः समाहारोद्भव इत्याह तत्राहेति। विमतं न संस्कारस्य हितप्रमाकरणजन्यं प्रमाणत्वानधिकरणत्वाद्घटादिवदिति शंकते। ननु ९५

यत्रेति दोषासहकृतप्रमाकरणजन्यत्वादनुमानादेः प्रामाण्यं घटते ऽन्यांतेष्वतद्वपरीत्यान्नैवमित्यादि। तत्राहेति। एवं वस्तुनीत्यत्र स्वमते
अनुभवाविरोधमभिदधता मतांतरेष्वनुभवविरोधोध्वनितः तमाह किंचेति। इदं रजतं तादात्म्यविषयमेकं ज्ञानमनुभूयते तत् ज्ञानभेदवा
दिनो विनुध्यत इत्याह। ज्ञानद्वयेति। रूपज्ञानस्य स्मृतित्वेऽपरोक्षत्वयोपि विनुध्येते। पाहापरोक्षेति। अन्यथाख्यातावनुभवे विरोध
माह सर्वत्रेति। प्रतिपन्नस्योपाधिरवच्छेदकोधिष्ठानं तस्मिन्निति यावत्। आरोपितं विषयशब्दार्थः। इदमित्यारोपितस्य रूप्यस्य काल
त्रयेपि सत्त्वाभावे सत्यदिदं रूप्यमित्यनुभवः पीड्येतेत्यर्थः। तादात्म्यासत्वे तदनुभवोपि कुप्येतेत्याह प्रतिपन्नस्येति। देशांतरसत्वशंककल्प
नायामिदंतानुभवविरोधमाह पुरोदेशाद्विनिपि ज्ञानवादिमते नुभवविरोधमाहात्मख्यातावित्विति। बहिरवभासोयस्य स बहिरवभासस्तस्य
त्यर्थः। अनुभवविरोधशंकारत्नं मुक्तिसेवनेत्याशंक्याह अनुभवविरोधशंकामाह ननु तथापीति। रजतस्य सत्वे नानुभवोसिद्ध इत्याह तत्रेति।

तत्व० १९

अनिदमो रजतस्येदंतासंसर्गवत्सद्विलक्षणस्याप्यन्यसत्तासंबंधानुभवो न विरुध्यत इत्यर्थः । ननु रूप्यस्य स्वाभाविकं सत्वं किं न स्यादित्या
शंक्य बाधविरोधान्नैवमित्याह । रजतस्येति । ननु तव सत्तासंसर्गः किं सन् उतासन् किं वोभयविलक्षणः आद्ये बाधविरोधः द्वितीये त्वनुभ
वविरोधः तृतीये सदिदं रजतमित्यनुभवो विरुध्येतेत्याशंक्य पक्षांतरं कक्षीकरोति । अथवेति । त्रैविध्यमेवाह परमार्थेति । परमार्थस
त्वं नाम कालत्रयबाधाभावोपलक्षितं स्वरूपं मायाशब्देन व्यावहारिकसत्वसंपादनपटीयस्यविद्योच्यते अविद्याशब्देन प्रातिभासिक
सहविवर्तहेतुकं ज्ञानं कथ्यते । इत्थं त्रिविधं सत्वमित्यनेन संबंधः भवत्वेवं त्रैविध्यं तथापि कथमनुभवविरोधनिराकृतिरित्याशंक्याह परमा
र्थेति । सद्वैलक्षण्ये कथमनुभव इत्याशंक्याह परमार्थेति पथ्येति । अतः शब्दोपेक्षितं हेतुं दर्शयति । यस्मादिति । ज्ञानद्वयं चापरोक्षं च राम० १९
स्मृतित्वं च स्मरणाभिमानप्रमोषश्च तद्वत्ताविवेक इव तन्निमित्ताप्रवृत्तिश्चेति तथोक्तः । अर्भकस्तनमसिद्धार्थजन्मांतरानुभूतस्मरणं

वकल्प्यमित्याह जन्मांतरेति । अप्रतिपन्नमिति लोकाप्रसिद्धमित्यर्थः अपूर्वमिति । प्रमाणानधिगतमित्यर्थः । अन्यथाख्यातौ कारहुकल्पमि
त्यन्वयः । कल्पनामेवाहान्यत्रेति । केवलेंद्रियस्यास्मद्वहिताग्राहित्वेपि दोषसहकृतस्य तत्स्यादित्याशंक्याह । दोषस्येति । देशादिव्यव
वहितविषयत्वं तथाविधशब्दार्थः । अविद्योपादानत्वमेकात्स्वभाव आश्रयणीय इति । बहुकल्पनं निवारयति । अप्रतिपन्नकल्पनाति
षेपति नास्तीत्यादिना । अत्रायं विभागः नास्तीति रजतस्य सद्वैलक्षण्याभिधानं । मिथ्येति अज्ञाननिवर्त्यत्वं बाध्यत्वात् मिथ्यैवेति ज्ञानमि
थ्यात्वमाह रजतमभादिति । यत्तन्मिथ्यैवेति ज्ञानमिथ्यात्वमनुभूयत इत्यर्थः । अविद्योपादानसमप्रतिपन्नत्वे यातत्कल्पमित्याशंक्या
हाविद्येति । समारोपितानिर्वचनीयतायाः प्रक्रांतत्वान्मायामत्रोपसंहरणमनुपपन्नमित्याशंक्याह । सत्यस्येति । मायामिथ्यादि
शब्दानां पर्यायत्वान्न विरोध इत्यर्थः । रजतस्य मायामयत्वमपश्यन्तटस्थमानएकदेशिनः प्रत्यवतिष्ठते । अवकेविरिति । अविद्या

तत्व०
९६

मयत्वोक्तौहेतुमाह। विभ्रमाणामिति। मायाविद्ययोरभेदादविद्यामयत्वमेवोक्तमित्याशंक्याहमायेति। भेदासिद्धिंमत्वानंप्रत्याह। तथाहीतिमायायाःस्वाश्रयाव्यामोहकत्वंकर्तुरिच्छानुविधायित्वंवाविद्यायास्तद्वैपरीत्यमित्यर्थः। नकेवलंलक्षणभेदाद्भेदः। किंनुप्रसिद्धितोपीत्याह। प्रसिद्धेश्चेति। प्रसिद्धेरसिद्धिंमत्वानंप्रत्याह। नहीति। मायाविद्ययोरभेदान्मायामयत्वाभिधानंयुक्तमित्याहोऽतत्त्वेति। अभेदंसाधयितुंतदुक्तमनुवदतिलक्षणेति। स्वरूपलक्षणंतावदविशिष्टमित्याहानिर्वचनीयतयेति। अनिर्वचनीयतयालक्षणस्याविशेषादितिसंबंधःस्वरूपनयागमकंस्वरूपलक्षणंतदेकंमायाविद्ययोरित्यर्थः। धर्मिसमकालंस्थित्वाधर्मतयागमकंविशेषलक्षणं। तदपितुल्यमित्याहतत्त्वावभासेति। कदाचिद्भावमात्रेपालक्षकमुपलक्षणंतत्तुल्यमित्याहविपर्ययेति। मायायांस्वरूपलक्षणस्याव्याप्तिंशंकतेनतुमंत्रेति। सत्यमेवमायापदवाच्यंकस्मात्तेतरदित्याशंक्याहादानानिर्वचनीयेति। मन्त्रादिसत्त्व

राम०
९६

स्तुयुक्तेमायाविशब्दप्रयोगादित्यर्थः। मायामयाहृश्यतइतिदृश्यमानतुरंगकरिनरादिषुमायाशब्दःप्रयुज्यते। तानिचसद्विलक्षणानीत्वनिर्वचनीयत्वंमायायांविशिष्टमित्याहनपरिदृश्यमंतीति। दृश्यमानत्वंमाय्यादावपितुल्यमित्याशंक्याहपार्श्वस्थस्येति। मंत्रादेःप्रत्यक्षदृश्यत्वाभावेपिकार्येणतदनुमापतत्रमायाशब्दंप्रयुक्तइत्याशंक्याहतत्रमायेति। केवलमाय्यादौमायाशब्दप्रयोगोनोपलभ्यतेकिंतुकार्याकारेणपरिणतोतत्त्वश्चकार्यस्यैवमायाशब्दवाच्यत्वात्तद्योगान्मरापारियुक्तेतत्प्रयोगइत्यर्थःमंत्रादेर्मायाकारणत्वेकथमविर्ययात्वकारणत्वमित्याशंक्यमंत्रादेःकिंनिमित्तत्वमुतोपादानत्वंआद्येनविरोधइत्याहमंत्रादेरिति। द्वितीयंप्रत्याह। ध्यासेति। मायात्मकदृश्यत्रवंदिरनिर्वचनीयत्वादनिर्वचनीयमज्ञानमुपादानं। अन्यस्यापरमार्थत्वात्तदनुपपत्तिरित्यभिप्रायेणोक्तमनिर्वचनीयेति। कार्यत्वाच्चमंत्रादेर्नोपादानत्वं। अपित्वनाद्यज्ञानस्येत्याहोनादिति। अनादेर्मायोपादानत्वेपिकथंमायाशब्दवाच्यत्वंकार्यस्येत्या

याशब्दस्य वाच्यत्वादित्याशंक्याह तत्रेति। जगत्प्रकृतौ शक्त्यां मायाशब्दस्य प्रयुक्तत्वात्स्याएवइजगदीश्वरोपादानत्वसंभवेउपादानां
तरपरिकल्पनमयुक्तं ततश्चाविद्यामायाशब्दत्वमित्यर्थः। पृथिव्यादीनां द्रव्यत्वसाधर्म्येयथावान्तरालिकोभेदस्तद्वन्मायाविद्ययोरपी
तिशंकतेननुस्वाश्रयेति। आश्रयशब्देन किं उच्यते। उत्तकर्तेतिविकल्पाद्यमनूद्यप्रत्याहयदीति। द्वितीयमनुवदत्येथेति। कर्त्तुर्म
ण्यादिनाव्यामोहाभावेनमायावित्वंप्रयोजकंमायाविनोपिदारदर्शयेच्छामोहश्रवणात्इत्याह। नतस्येति। किंतर्हिव्यामोहप्रयो
जकमित्याह किंत्विति। प्रतीयमानस्याभासत्वनिश्चयप्रयोजकइत्याहबाधनिश्चयेति। मनुष्योहंनव्याघ्रइतिनिश्चयेपिव्यामोहसं
दर्शनादाभासत्वज्ञानंनप्रयोजकमित्याशंक्याहप्रतीकारेति। स्वात्मानंप्रतिमारापादेव्यामोहहेतुमायाक्षोभणशक्तिप्रतिबंधज्ञा
नान्नमाया। विनोव्यामोहइतरेषांवत्तद्विपरीत्यव्यामोहइत्यर्थः। उक्तमर्थव्यतिरेकमुखेनाहान्यथेति। मायाविद्ययोर्भेदकांतरंशंक

तेऽन्ययेद्वयेतिविकल्पासहत्वात्रैतदपिनिरूपणपथमवतरतीत्याहननदपीति किंमंत्रादेरिच्छाधीनत्वमुच्यते। आहोतत्कार्यस्येति। वि
कल्पाद्यमंगीकरोति मंत्रेति। द्वितीयंप्रत्याहनमायायामिति। मंत्रादिक्षोभणेसंजातेनमायाप्रसरनिरोधः शक्यइत्यर्थः। मायाया
निमित्तकारिणेस्वातंत्र्यंइत्यतरत्रननिमित्तेपीतिवैषम्यमित्याशंक्यकिंसोपाधिकभ्रमनिमित्तेषांतंत्र्यंउतनिरुपाधिकभ्रमनिमि
त्तइतिविकल्प्याद्यंप्रत्याहविद्यायामपीति। हस्तेनतनयनसंमार्जनंकेशोंडूकभ्रमनिमित्तमादिशब्दार्थः द्वितीयंप्रत्याहमंत्रेति। मा
रापादिकार्यंतत्वज्ञानोत्तरकालमप्यनुवर्त्ततेइतरत्रनतथेत्याशंक्याहतत्वेति प्रतिबिंबादिभ्रमामारतिशेषः। प्रसिद्धस्वमायाविद्याभे
दइतिपक्षंतत्रेदंविवेचनीय। किंप्रसिद्धिशब्देनवैदिकीप्रसिद्धिर्गृह्यतेउतस्मार्त्तप्रसिद्धिराहोभियुक्तप्रसिद्धिरितितत्राद्यस्तावद
युक्तइत्याहनचेति। तस्याभिध्यानादित्यादिरमर्थः। तस्याभिमुख्येनप्रसक्तयाध्यानं। अनात्मप्रत्ययनिरासेनाहब्रह्मेतिप्रत्ययः यु

तत० ९८ ज्यते नेनेति प्रत्यक्‌ब्रह्मैक्यसाक्षात्कारो योजनं। प्रतीचो ब्रह्मत्वेनैव वावस्थानं तत्त्वभावः। अभिध्यानेन परमार्थसत्त्वसंपादिका मायानि
वर्त्यत इति भूयो योजनेनार्थक्रियासामर्थ्यसत्त्वकल्पिकाया मायाया निवृत्तिः। अंते प्रारब्धकर्मणामुपभोगेन क्षपे विदेहकैवल्यं नंतत्स्व
सुखाद्यात्मकप्रपंचप्रतिभाससंपादिकानिवर्त्तन इति विश्वमायानिवृत्तिरिति। ज्ञाननिवर्त्यमज्ञानं प्रसिद्धं। मायापि ज्ञाननिवर्त्ये
ति तयोरैक्यमित्याह। सम्यग्ज्ञानेनेति द्वितीयं प्रत्याह तरतीति। यस्मिन्परमात्मनि नित्यनैमित्तिककर्मप्रक्षालितापापामलेवि
त्ते भिव्यक्ते सति योगी मायां तरति तस्मिन्निति संबंधः। मायायास्तर्त्तव्यत्वे हेतुमाह। अविद्यामिति। विद्याविद्ययोर्निवर्त्यनिवर्त्तक
भावः प्रसिद्ध इत्यर्थः सुषुप्तावविद्याया अपुरुषार्थता दर्शनानंतन्निवृत्तिरपेक्षितेत्याशंक्याह विततामिति। कार्याकारेण परिण
तामिति यावत्। उपादाननिवृत्तौ कार्यस्यासत्तानिवृत्तेरविद्यानिवृत्तिरपि कांक्षितेत्यर्थः। वेद्यत्वं यावर्त्तयत्समेयेति तत्र हेतुर्विश्वात्मन रम० ९८

इति। तृतीयं प्रत्याह मायामात्रमिति। अपरथानर्थ्ययोगानित्यादिवाक्यात्स्वप्नसृष्टेः परमार्थत्वशंकां तु शब्देन निराकरोति। अत्र हे
तुः कात्स्न्येनेति। कात्स्न्येनाभिव्यक्तपरमार्थवस्तूचितदेशादिसंपत्तिः। तेनानभिव्यक्तस्वरूपस्य सत्त्वथोक्तं। परमार्थवस्तूचितदेशाद
द्यभावेपि आभिव्यक्तत्वात्‌ न परमार्थसत्त्वं स्वप्नप्रपंचस्येत्यर्थः कातर्हि स्वप्नगतिरित्याह मायेति। सूत्रभावाभिज्ञो भाष्यकारो
पि मायाविद्ययोर्भेदमभाषतेत्याह भाष्यकारोपीति। भाष्यव्याख्यातारो टीकाकारोप्येवमेवेत्याह टीकाकारेणापीति सिद्धमतं त्वाभि
ज्ञो मंडनमिश्रोपि तथाहेत्याह ब्रह्मसिद्धाविति। मायाविद्ययोर्भेदोतावत्समर्थमुपसंहरति। तस्मादिति। तत्सद्‌ परामृष्टं हेतुं व्यनक्ति
लक्षणेति मायाविद्ययोरैक्ये सह प्रयोगानुपपत्तेस्तयोर्भेदः तयोरैक्ये इंद्रजालादौ मायात्वव्यवहारः इतरत्र तदभावश्च कथमित्याशं
क्याह कस्मिन्नपीति। भेदकांतरमाह व्यापिनेति। अविद्यायाद्यानायित्वमिच्छाधीनत्वनियमाभावादिति इत्यर्थः। प्रत्युक्ते

तत्व० नभ्रांतिविषयस्य परमार्थसत्त्वमेवत्वमिति दिगंबरः शंकते। अस्त्वितर्हीति। उपपत्तितोप्येवमित्याह। कल्पनेति सत्तांत्रैविध्यकल्पनं
९९ कल्पनाशब्दार्थः। निषेधस्य परमार्थरजतविषयत्वकल्पनमादिशब्दार्थः। किमंतन परमार्थपरमार्थत्वे नेकग्राह्यत्वप्रसंगात्सम्प्रति
पन्नवदित्याह। नेत्याहेति। परमार्थत्वेपि न सर्वग्राह्यत्वं दोषलक्षणसहकारिणः सर्वत्राभावादिति चोदयति। ननु कारणेति। प
रमार्थत्वेपि दुष्टकरणग्राह्यत्वनियमएवानुपपन्न इत्याह नेत्येवेति। न तत्रैरत्वनघ्नत्वेन दोषाभावे परमार्थरूप्यज्ञानाभावोपि
धीयत इति शंका स्यात्। तत एवासिद्धसाध्यत्वमित्याशंक्यातच्छब्दार्थमाह संर्येति। मायात्मकत्वेपि सर्वग्राह्यत्वं प्रसंगः समर
ति चोदयति आत्मेति। इदमंशावच्छिन्नचैतन्ये तंत्राविद्यया पुरोवर्तिनी रूप्यस्योत्पन्नत्वात्सर्वग्राह्यत्वप्रसंग इत्यर्थः वेषायेनोत्त राम०
रमाह नेति। दोषोपहतज्ञानकारणत्वेन तत्स्वातमाह मत्राद्युपहतचक्षुष इति। पहतकरणानामेव दर्शनमित्यत्र दृष्टांतमाह प्रसिद्धेति। ९९

उक्तेर्थे युक्तिमाह इदमाकारेति। स्वाश्रितसुखादेरनन्यवेद्यत्ववदिदमाकारावच्छिन्नसाक्ष्याविद्याश्रितत्वादन्यस्याग्रहणप्रसंग इ
तिभावः बाधेकप्रत्ययस्य मायामयत्वे सा चक्रमाया अनुक्तत्वात् किं वेत्युक्तिरयुक्तेत्याशंक्य नासत्यमाह ज्ञानस्येति। कल्पेनालाव
वानुभवानुभवाभ्यामिति। मायावादे मिथ्यात्वमात्रमाश्रयणं। अनुभवाविरोध एव इतरत्र गौरवानुभवविरोधौ स्यातामिति
यावत्। बाधकप्रत्ययोपविभ्रम इति चोदयति। ननु प्रतिपन्नेति। प्रतिपन्नोपाध्यावभावप्रतियोगित्वस्य मिथ्याशब्दार्थत्वेन क
थं मिथ्यासिद्धिरिति आशंक्याह न तस्येति संयोगादेः स्वासंताभावसादेश्यधर्माधिकारागत्वाभ्युपगमात् प्रतिपन्नोपाध्या
वप्रतियोगित्वं तत्रापि विद्यत इति स्याति प्रसिद्धिरित्यर्थः। संयोगादेर्न स्वासंताभावसादेश्यं भावाभावयोरेकत्रैकत्र सत्वाविरो
धात्तस्यैव मिथ्यात्वलक्षणं तावद्यमित्याशयवानाह प्रतिपन्नेति। तत्र किं प्रमाणमिति वीक्षायामाह तत्रेति। तत्र प्रत्यक्षमित्य

तत्व०
१००

न्वयः। प्रत्यक्षत्वमेवाह बाधकेति। नेदं रजतमित्यनेनैव मिथ्यात्वसिद्धेः मिथ्यैवेत्यनर्थकमित्याशंक्य तात्पर्यमाह। बाधकज्ञानेति।
बाधकप्रत्ययोन्यथासिद्ध इति बोदयति। ननु देशेति। सत्वे बाध्यत्वमेव न स्यादित्याह नत्वाहेति। नैयायिकं प्रति शुक्तिकावदिति। ज्ञानव
दिति बोद्धं प्रति दृष्टांत इति द्रष्टव्यः। अन्यत्र सतोपि घटस्य निषिध्यमानत्ववन्निषेध इति शंकां निरस्यति। नेदमिति। इदं रजतयोरविविक्त
तया प्रतिपन्नत्वादविवेकस्यैव मिथ्यात्वात् मिथ्यात्वपरामर्शोपि युक्त इत्याशंक्याह। न मिथ्येवेति। स्मृतिग्रहणयोस्तद्विवेकाभास्य
वस्तुत्वान्न मिथ्याभूतं पश्याम इत्यर्थः। बाध्यत्वं मिथ्यात्वमित्याकर्ण्य वैतण्डिकः प्रत्यवतिष्ठते। ननु कोपमिति। किं मन्यार्थिनोन्यत्र प्रवृत्ति
विरोधो बाधः। उत तद्योग्यताविच्छेदः। आहोस्विद्विवेकज्ञानं किं वेतरेतराभावबोधः। उत प्रतिपन्नोपाधावभावप्रतियोगित्वं बाधनं।
अथवाज्ञाननिवृत्तिरिति किंशब्दार्थः। आद्यमनूद्य व्याप्त्या दूषयति। यद्यन्यार्थिन इत्यादिना। द्वितीयमनुवदति दूषयति। न प्रवृ

राम०
१००

BHAU DAJI

त्तेति। बाधकज्ञानेन योग्यताया उन्मूलितत्वात्समयांतरे पुरोवर्तिनि प्रवृत्तिर्न स्यादिति दूषयति। न पुनरिति। योग्यतांतरस्य पुनस्तत्रो
त्पन्नत्वात्प्रवृत्तिर्घटत इत्याशंक्य तस्या यावद्द्रव्यभावित्वात्। विच्छेद एवानुपपन्न इत्याह योग्यतेति। न च योग्यताप्रतिबंधो बाधः विवेकज्ञा
नसमये हेत्वभावेन फलाभावोपपत्तौ प्रतिबधकत्वकल्पनानवकलनादित्यर्थः। सिंहावलोकनन्यायेन प्रवृत्तिनिरोधो बाध इत्यत्र दूषणा
न्तरं संमुग्धिनोति उदकज्ञानादिति। अन्यत्रेति शेषः। तृतीयमुत्थापयति विविक्ततयेति। विवेकमात्रस्य बाधकत्वं निराकर्तुमवि
विक्तेति विशेषणं किं विवेकेनागृहीतत्वमविविक्तत्वं उत अभेदेन बुद्धत्वं आद्येपि किं पदार्थज्ञानातिरिक्तविवेकग्रहणं उत पदार्थज्ञान
मेवेति विकल्प्य प्रथमं प्रत्याह सवेति। पदार्थज्ञानसमये तयोर्भिदेनागृहीतत्वापत्तेरितरेतराभेदज्ञानं असौ बाध आपद्येत। न च
तथा प्रसिद्धिरस्तीत्यर्थः। पदार्थप्रतिपत्तिरेवाभेदप्रतिपत्तिरिति कल्पं निरस्यति नैवेति। भेद इत्यत्र प्रतिपन्न इति पदमध्याहर्तव्यं। अवि

तत०
७१

विकल्पमभेदेनप्रतिपन्नत्वमितियः कल्पः यद्योत्तरोत्तराभावमत्वयोर्बाधइतितदुभयमुत्थापयत्यन्या। मनेति अतिव्याप्त्यादूषयति। शु
क्तौ इतिदिगंबरमते सर्वस्याभिन्नाभिन्नत्वादभेदप्रतिपत्त्युत्तरकालं यदिदं भेदज्ञानं तदपि बाधकं स्यादिति नन्वाल्यादित्वं वस्थेत्याह समाना
धिति। एवमपीदं विवेचनीयं किं ज्ञानमात्रस्याथावप्रतियोगित्वं बाधः। उतान्येषस्येतितत्राद्यं दूषयति। नैवेति। द्वितीयं दूषयत्यर्थस्येति
किमर्थस्याप्रतिपन्नस्य बाधः उताप्रतिपन्नस्य। प्रतिपन्नत्वे किं तद्विषयेण ज्ञानेन बाधः। उतान्यविषयेण आद्ये पूर्वज्ञानप्रामाण्यमेव
दृढीकृतं स्यात् द्वितीये भिन्नगोचरत्वान्नानयोर्बाध्यबाधकत्वे स्यादित्यभिप्रेत्याह संविद्विषयस्येति अप्रतिपन्नत्वे तस्याप्रसक्तेर्न निषेध इत्या
ह्यानस्येति। बाधा इत्यर्थः। मा भूत्तर्हि बाध इत्याशंक्याह बाधस्येति। अज्ञाननिवृत्तेर्बाधत्वे स्वविषयाज्ञाननिवर्त्तक एवं तु ज्ञाना राम०
नां बाधकत्वप्रसक्तिरित्यभिप्रायेणोपसंहरति। तस्मादिति। अज्ञाननिवृत्तिर्बाध इति मतं आदाय सिद्धांतयत्युच्यत इति घटादिज्ञा ७१

नमपि बाधः स्यादिति प्रयुक्तं न आह स्वकार्येणेति। किं वार्त्तमानिककार्यसहिताज्ञाननिवृत्तिर्बाधः उत प्र। विलीनकार्यसहितज्ञानस्य ना
शः। विपर्ययोत्पत्त्यनंतरकालं मनसो विषयांतरसंचारे समयांतरे वा शुक्तिलोचनसंप्रयोगजाधिष्ठानज्ञानेनाज्ञाननिवृत्तौ वार्त्तमानिक
कार्यस्याभावेनाव्याप्तेः। न द्वितीयः कार्यसहिताज्ञाननिवृत्तेरभावादित्याशंक्य कार्याकारणपरिणताज्ञाननिवृत्तिर्बाध इत्यनु
गतं लक्षणमुभयत्राप्यस्तीत्याह वर्त्तमानेनेति। तत्र प्रमाणमाह तथाविधेति। अतो बाध्यत्वं मिथ्यात्वमित्युक्तं साधूक्तमित्युपसंहरतीति
संप्रयोगाभावेन कथं लक्षणाव्याप्तिः शंक्यते संप्रयोगस्य लक्षणांतर्भावात् इत्याशंक्याह स्मृतिरूपेति। स्मृतेरूपमिव रूपमस्येति। स्मृ
त्यासाम्यं वैषम्यं वा लक्ष्यते। तत्र स्मृत्यासाम्यार्थं संस्कारजन्यत्वं सिध्यति वैषम्यार्थं संप्रयोगजन्यत्वं उभयजनितज्ञानस्य असम्यग्ज्ञान
त्वार्थं दोषेपि कारणकोटौ निविष्ट इति कारणत्रितयजन्यत्वं सिद्धमित्यर्थः कारणत्रितयजन्यत्वं तटस्थलक्षणांतर्भूतार्थः। इतर

तत्व० स्वरूपलक्षणमिदंशब्दार्थः। नचशुक्लः पटइत्यादिप्रत्ययेषु स्वरूपलक्षणातिव्याप्तिः वस्तुत आरोप्यप्रतियोगिकासंताभावतो
७२ न्यस्यान्यात्मनाप्रतियत्तेः स्वरूपलक्षणत्वेनविवक्षितत्वात्। सर्वमेतत्स्वरूपलक्षणमितिकेचित्। याप्रशोकादावित्यत्र शोकश
ब्देनशोकोद्भूतभ्रमनिर्देशः आदिशब्देनसंतोषप्रकर्षजभ्रमस्यलस्यलक्षणयोरविनाभावात्तुस्थ्येसति। लक्षणंनेतिव्याहतमि
तिबोदयति। कथमिति। लक्षणासिद्धएतत्सात्तदेवासिद्धमित्यभिप्रेत्याहतत्राहेति। अथवासंस्कारवत्संप्रयोगस्यकारणांतर्भा
वइत्यथापरोक्षत्वानुपपत्तिरितिनिवार्शंकते। कथमिति। बाह्येंद्रियस्यतद्दोषरमादंतरस्यचकेवलस्यबहिरप्रवृत्तेर्नसंयोगजत्वसिद्धि
रित्याहतत्राहेति। टीकायानत्स्थलक्षणनिरसनेनकथंस्वरूपलक्षणनिरासइत्याशंक्याहसंप्रयोगस्येति। संप्रयोगस्याध्यासंप्रतिका राम०
रणत्वात्तदभावेनतदभावइत्यर्थः। किंचकिंस्वप्नभ्रमस्यात्माधिष्ठानंउतान्यत्राद्यः। विषयित्वतयानात्मनःस्फुरणात्। नद्वितीयोनात्म ७२

न आरोप्यकोटौप्रक्षेपादधिष्ठानत्वानुपपत्तेरित्याहाधिष्ठानेति। कार्यानुपपत्त्याकारणादिकंकिंचित्कल्प्यमितिबोदयति। कस्तर्हीति।
कार्यमन्यथासिद्धमित्याहतदाहेति। अपरोक्षप्रत्ययविरोधाद्रजतज्ञानंनस्मृतिरितिशंकायांमुक्तंनस्मृतिरूपतेति। अपरोक्षात्मावि
वेकात्तथात्वव्यवहारइत्यर्थः। अपरोक्षप्रतिभासमानमात्रिसरजतज्ञानस्यस्मृतित्वनिराकरणमनुपपन्नंप्रतिभासस्यभ्रांत्यापिसंभ
वादित्याशंक्यतन्मतेसौत्वानुपपन्नेत्याहतत्रचासनेतिदोषसहकृतवासनाजन्यत्वात्भ्रांतित्वंपरतइत्याशंक्याहगवयादीति। स्मृति
त्वेदोषजन्यत्वमेवानुपपन्नमित्यभिप्रायः। रजतज्ञानस्मृतित्वपक्षेतद्धिलक्षणत्वमप्यनुपपन्नंसंस्कारमात्रजन्यत्वादित्युक्तंतत्रोपपाद्य
तेदोषस्यसामग्र्यंतर्भावाद्वैलक्षण्यसिद्धेरित्याशंक्याहनतुकारणत्रिनयेतिनतावत्तदासंप्रयोगश्चक्षुषः उपसंहृतत्वात्। देशाद्यंतरितस्य
योगायोग्यत्वाच्च। नापिदोषसंभवः। चक्षुषउपसंहृतत्वात्तद्गतदोषानुपपत्तेः। नापिविषयदोषः सकिंज्ञायमानतयाहेतुउताज्ञायमान

तत्व० ७२ तयातत्रचक्षुषानावृतत्वज्ञायमानत्वं। तस्योपसंहृतत्वात्। नापि मनसा केवलस्य मनसो बहिरप्रसरात्। न द्वितीयः। जाग्रदवस्थाया
मधिगतस्य विषयदोषस्य हेतुत्वदर्शनात् नापि प्रमातृदोषः निद्रादोषोपहतस्वांतनया तां गंधसंभवादित्यर्थः। ज्ञानान्तरे सि
द्धेन तत्र लक्षणसाधनमुचितमित्याशंक्य प्रमाणस्मृतिविलक्षणत्वात् स्वप्नादिज्ञानस्याध्यासत्वं ततस्तदुभयमपि लक्षणं संपादयितुं
शक्यमित्याह कारणचिंतयेति। लक्षणासिद्धिशंकायां तदुपपादनमुचितं न स्मृतिरूपकीर्त्तनमित्याशंक्य तासयमाह संप्रयोगेति। ग्र
हणस्मृतित्वप्रसक्तौ क्रमेण हेतुद्वयं द्रष्टव्यं। जागरणे बाह्येंद्रियसंप्रयोगस्यापरोक्ष्यारोपजनकत्वं स्वप्ने त्वन्यथेति वैषम्यमाशंक्यारो
प्यविपरीताकारबोधजनकं नयनं दुष्टं सदारोपजनकं जागरणे दृष्टं तद्वत् स्वप्नेपि संपादयितुं शक्यमित्याह स्वप्नपवेति प्रसिद्धदोषाभावे
प्यन्यो दोषोस्तीत्याह निद्रेति। वातादिरादिशब्दार्थः। तदिह संस्यापमर्थः। न त्वत्र यथार्थव्यवहारहेतुज्ञानस्य ग्रहणस्मृतिविलक्षण राम० ७२

त्वरस्यर्थः। इहेति जाग्रद्भोगप्रदकर्मोपरमे स्वप्नोपस्थापककर्माभिव्यक्तौ चेत्यर्थः। सकलसंस्कारसद्भावे कथं वित्कस्य विज्ञाहानमित्यत
आहादृष्टेति। नटस्य लक्षणासिद्धावपि नस्तद्रूपलक्षणं सिध्यति आत्मन्यनात्मनि चारोपासंभवादित्युक्तं स्मारयति कथमिति। अना
त्मनोनधिष्ठानत्वे थात्मनोधिष्ठानत्वं घटयितुं शक्यत इत्याह तदारेति। तदवच्छिन्ने सत्त्वतस्य देन ज्ञानं तस्यैतत्तस्य महत्तरता रदिति शंकां नि
राकर्तुमाहांतःकरणेनेति। अंतःकरणसंयोगस्य स्वप्नहेतुत्वे जाग्रदपि तत्त्वं संगः तदर्थमाह निद्रेति। अंतःकरणस्योपादानत्वं माव
र्त्तयति मिथ्येति। नयनसंयुक्ते दर्भशंवन्मनसा संयुक्तं चैतन्यमधिष्ठानमित्याहावच्छिन्नेति। चैतन्यस्यासंगाद्वितीयस्याधिष्ठानत्व
मप्यनुपपन्नमित्याशंक्य न साक्षादधिष्ठानत्वं अपितु अविद्याद्वारेत्याहाविद्येति। अविद्याशक्तेः सदातनत्वेन सदा कार्यजनकत्वं स्यादित्या
शंक्य विशिष्टांतःकरणसंयोगस्याविद्याक्षोभकत्वात् तस्य चागंतुकत्वान्नैवमित्याह। पुष्कलनिमित्तेति। इति शब्दोक्तसरार्थकथन

तत्व० परिसमाप्तिद्योतनार्थः।अविद्याशक्तिर्मिथ्यार्थाकारेणविवर्त्ततेचेत्ससावृत्तेर्मिथुनीकरणरूपत्वमध्यासस्योक्तंकथंतेस्तत्राहचैतन्य
७४ मिति।अन्यथान्यथाविवर्त्तमानाज्ञानस्यसत्तास्फूर्तिप्रदत्वाच्चैतन्यमेवतथातयाविवर्त्ततइत्युक्तंस्यात्।अतश्चोक्ताध्याससिद्धिरि
त्यर्थः।जागरणेबाह्यस्याधिष्ठानत्वमुपलब्धंतद्वत्स्वप्नेपिबाह्यमधिष्ठानंवक्तव्यंनचतन्निरूपयितुंशक्यतइतिकथंपरत्रपरावभासः
तत्राहतथेतियथास्वप्नेचैतन्यमधिष्ठानंतथाजागरणेपिशुक्तिकाद्यवच्छिन्नचैतन्यंरजताद्यालंबनमितिबाह्यालंबनरजतादिकथ्यत
इत्यन्वयः।कथंचैतन्यस्यस्वच्छस्यास्वच्छशुक्तिकाद्यवच्छेदइत्याशंक्याहबाह्याधिष्ठानाश्रयेति।इंद्रियस्यबाह्यसंप्रयोगेतद्द्वारांतःकर
णंबाह्याकारेणविपरिणमते।तस्मिंश्चांतःकरणेस्वच्छेचैतन्यस्यप्रतिबिंबोदयोभवति।ततश्चांतःकरणद्वाराविषयसंसर्गोपीत्य राम०
र्थः।अवच्छिन्नतयेत्येतच्छुक्तिकाद्यवच्छिन्नमित्यनेनसंबध्यतोवचैतन्यस्याधिष्ठानंसंसृष्टत्वंचोपपादयति।बाह्याधिष्ठानसंसृष्टेति। ७४

रजतादिरविद्याविवर्त्तकत्वाभ्युपगमाच्चैतन्यालंबनत्वंकथमित्याशंक्यविवर्त्तमानाविद्याधिष्ठानत्वाच्चैतन्याधिष्ठानत्वंयुक्तमित्याह
चैतन्यस्थाविद्याशक्तिरिति।रजतस्यचिदविद्यापरिणामत्वेपरिणामस्यपरिणामितंत्रतयातेदमितिप्रतिभासोयुक्तइत्याशंक्याह
बाह्याधिष्ठानसंसृष्टरजतेति।तत्रहेतुमाहबाह्याधिष्ठानसंसृष्टेति।क्वचिदवच्छिन्नंक्वचिदनवच्छिन्नमित्यनुगतप्रयोजकाभावमाशं
क्यसर्वत्रचित्त्वमधिष्ठानत्वप्रयोजकमित्याहसर्वत्रत्विति।चैतन्यस्यसकलविभ्रमाधिष्ठानत्वेतरेतरारोपितप्रतिभासःस्यादित्युक्तं।
तदनुपपन्नंचैतन्यस्यसकलविषयव्यापित्वादित्याशंक्यसिद्धांतसभिप्रायमजानानस्येदंचोद्यमित्याहाकाशवदिति।किंशरीरगततया
प्रतिभासआपाद्यतेउतात्मगततयानाद्योप्रसक्तेः।द्वितीयेत्विष्टापत्तिरित्याशंक्याहात्मैवेतिपरिच्छिन्नस्यात्मनोधिष्ठानत्वाद्देहंनी
लमितिप्रतिभासःस्यादित्यर्थः।परिच्छिन्नात्मगततयाप्रतिभासआपादितइष्टापत्त्योत्तरमयुक्तमित्याशंक्याहनिःकृष्टाहंकारइति ६

तत०
७५

निःकृष्टः पृथक्कृतो दृक्कारो यस्मात्तत्तथोक्तं। अनवच्छिन्नात्मगततयापि प्रतिभासाभावमाशंक्याह्वटः स्फुरन्निपाः स्फुरतीति वि
त्समानाधिकृततया प्रतीतिरस्तीत्याहवेत्सस्येति वित्सामानाधिकृततया सर्वप्रतिभासउक्तेविच्छिन्नदेशस्थतया स्फुरणं। अभिधा
नमयुक्तमित्याशंक्याह पुनरपीति। विच्छिन्नश्चासौ देशश्चेति कर्मधारयसमासशंका स्यात्तत्त्वार्थस्यांतरनुभवाश्रयत्वं नोपपद्य
त इति व्यधिकरणमित्याशंक्य विच्छिन्नो देशो यस्येति बहुव्रीहिर्विवक्षित इत्याशयवानाह इमिति। देशो नाम देश इत्यत्रार्थस्यांत
स्थाततया प्रतिभानवद्देशस्यापि तथात्वमुच्यत इति शंका स्यात्तथाच बाह्यदेशसंबंधितयार्थस्यापि बहिष्ठत्वात्सिद्धांतविरोधः
तथाच कुतस्तत्संबंधादित्येतद्विरुध्येतेत्याशंक्याह पृथक्केति। ताहक शब्देन नार्थसादृश्यं विवक्षितं किंत्वतत्स्थत्वमित्यर्थः मे
र्यादिदेशस्य व्यवहितस्य रूपमंतस्थत्वमित्याशंक्याहानवच्छिन्नेति। भेदशब्देन देशो विवक्षितोभिधीयत इति। अनवच्छिन्नवैतत्स

राम०
७५

संसृष्टतयादेशावभासस्याकुलात्कथं दोषाय त्विरित्याशंक्याह पुनरपीति। कोवेत्यादिनानवच्छिन्नचैतन्यात्मतया उक्तत्वात्सो
नरूप्यमित्याशंक्याह निष्ठेति। अनवच्छिन्नवैतन्यमधिष्ठानमिति गृहेभिसंधिः पराक्कित्तस्य वादिनः स्वाशयानवबोधप्रतिप
त्ताविसाहेदानीमिति। आभावपि न निखिलाधिष्ठानत्वं तदनुविद्धतयाप्रतीतेरित्याशंक्याह सवेति। विषयस्यापरोक्षतायाः प्रत्य
नुगभावाद्दृष्टत्वेनुभवविरोधः स्यात्। नवप्रपाज्ञानादिसत्त्ववस्तु सतो भेदस्य निरास इत्याशंक्याह किंतयोः पंचम्योः सामाना
धिकरण्ये उत तैर्यधिकरण्यं आद्ये न तदिष्टसिद्धिः द्वितीये ज्ञानप्रतियोगिको भेदो निषिद्धः स्यादित्याशंक्य प्रामाणिको भेदो निरस्
तेनकालानिकृत्याह प्रातीतासिकेति। आद्यादृढ इति वस्तुं वध्यानिमित्तैर्थत्वात्समाणज्ञाननिमित्तो न भेद इत्युक्तं भवतीत्यर्थः।
अनुभवस्य वाधानावाहसतीयमानो भेदः परमार्थएवेति शंकितानन्वयिमिति। विषयस्यचैतन्येनतत्प्रकाशसंभवात्प्रकाशानु

तत्व० ७६ पपन्नेरित्यत्युक्तमित्याशंक्याह स्वयमिति। तत्र हेतुमाह विषयइति। एकस्य विषयत्वं विषयित्वं च विनुद्धमित्यर्थः। घटादयो विषया:
स्वयं रूपेण चैतन्यहीनाश्चैतन्यासंबंधिनस्तस्य तदुपत्वेन तदधीनव्यवहारभाक्त्वं घटादीनामन्योपनिमित्तव्यवहारादस्वेः इतरथाव
वित्तत्वतत्वं स्वप्रकाशाविदधिगमं विनानत्स्यत्वानधिगतेरित्यर्थः। विषयचैतन्यमंगीकृत्य तस्यात्मव्यतिरेके दोषमाहात्स्येति।
अभेदवत्संबंधानुपपत्तेरपेरत्यर्थः। आत्मावगतिरेव प्रकाशः। आत्मावगतिप्रकाशः तेन नाभिदलक्षणः संबंधो भिन्नत्वात्
न च संबंधांतरं निरूपयितुं शक्यं येन विषयचैतन्यः करणपरिणामं सत्स्वे प्रमातृचैतन्यस्य तच्चैतन्याभेदे नाभिव्यक्तत्वात् तत्प्रथनं स्या
दित्यर्थः। सर्वस्य विदध्यासे घटादीनापरोक्षेनाहंकारादीनां प्रत्यक्षोऽनप्रतिभासः कथं घटनरत्याह सर्वत्रेति। सर्वचैतन्यावगु राम० ७६
ण्ठनेपि वित्तकावित्तिप्रतिभासः कथमिति संबंधः। विभक्तशद्वार्थमाहात्मेति। प्रत्यक्परांचावित्यर्थः प्रतिभाससमभिनयत्यहमिति।

सर्वस्य पूर्णात्मनि कल्पितत्वेप्यहमिति स्फुरणयोग्यभाक्तनदेहादिसंस्कारसहितमायाकार्यत्वादुत्तरोत्तरो देहादिष्वहंप्रत्ययो घट
नेघटादिनां वेदं तथा प्रथोपपत्तिरिदमिति प्रतीतियोग्यपूर्वघटादिसंस्कारसहितमायामाकार्यत्वादुत्तरोत्तरघटादेरिति समाधानग्रं
थार्थः। प्रपंचस्याद्वितीयचैतन्याश्रयत्वमुक्तं न दासिपतिनन्नुचैतन्यमिति। अंतर्भेदो नामात्मधर्मिक आत्मप्रतियोगिक इत्यर्थः। अ
नात्मधर्मिको नात्मप्रतियोगिको भेदो बहिर्भेदः अखंडशब्दः सजातीयभेदाभावपरः अद्वितीयशब्दस्तु विजातीयभेदाभावपरः
सजातीयभेदत्वावद्युक्त इत्याह वेत्येति। संवित्त्वांतर्गणिकत्वरूपस्याउपाधिपरामर्शमंतरेणाविभाव्यमानभेदत्वात् यदि न्वेवं तत्तथा
यथागगनमित्यर्थः। तस्य निरंशस्येत्यस्यायमर्थः तस्य चैतन्यावित्वदेशाद्विरवभावात् तत्र हेतुर्निरंशस्येति स्वव्यतिरिक्तचैतन्यांशस्या
भावान्न तत्प्रतियोगिको भेद इत्यर्थः। कथं तर्हि विच्छेदप्रथेत्याशंक्योपाधिभेदादित्याह प्रपंचेति अंतरिवस्वचैतन्यमिव बहिरिव पर

चैतन्यमित्यर्थः। विजातीयभेदोप्येवंनिराकर्त्तव्यः। आत्मा स्वाभाविकभेदवान् मध्यमपरिणामत्वात् घटादिवदित्याशंक्य किंतस्य सां
शत्वमुतानंशत्वे नाद्य इत्याह निरंशेति। अवयवावयविनोः प्रत्येकं चैतन्ये कदाचिद्वैमत्येन तदधिष्ठितगात्रविदारणं दुर्वारं स्यात्। तस्मा
देकस्य चैतन्यं तदितरेषामचित्त्वमिति न तत्रावयवावयवीत्यर्थः। द्वितीयं दूषयत्यणुत्वमिति। आत्माणुमहत्परिमाणान्यतरप
रिमाणवान् निरंशद्रव्यत्वान्मनोगगनवदित्यर्थः। तदुभयोरन्यतरपरिणामः स्यादित्यत्राह मध्यमेति। महदणुपरिमाणान्य
वद्दिमाणमित्यर्थः। न च तत्परमार्थतो युक्तमित्याह न च निरंशमिति। तस्मादन्यप्रयुक्तमध्यमपरिमाणत्वं इत्याह स्वतीति। स्वप्न
प्रपंचस्य चिदधिष्ठानतासंभवे चोदिते तत्रैव तदुपपादनीयं किमिति जागरणे तदुपपादितमित्याशंक्य कैमुतिकन्यायेन स्वप्ने तदुप
पाद्यत इत्याह जागरणेपीति। सर्वस्य प्रपंचस्य चिदधिष्ठानत्वमभिधायाधिष्ठानांतरं सूचिवान यथैवेत्यत्र तत्रोपपद्यते तस्य बाध्यं

द्रियासंप्रयुक्तत्वान्मनसापि न संप्रयुक्तत्वं तस्य केवलस्य वह्नेः प्रसक्तत्वादित्याशंक्याह केवलस्येति। केवलस्यापि बाह्यस्मृतिजन
कत्वमस्ति तदर्थं मत्तस्येति विशेषणं। सुखादिप्रत्यक्षसाधनत्वमावर्त्तयति वह्निरिति। कथं तर्हीत्यनेनाव्याप्तिराशंक्यते आहोऽ
तिव्याप्तिः नाद्यः। अव्याप्तिशंकायां समाधानसमये लक्षणाव्याप्तिर्वक्तुमा। न वेत्यन्याते। नापि द्वितीयः। अलक्ष्ये लक्षणगम
नमतिव्याप्तिः। तत्र तुल्लक्षणाभाव एवात्र इति कथमिति व्याप्तिशंका न स्यात् कथमित्यादिग्रंथासंगत इत्याशंक्याहाव्याप्तिरि
ति। नाम निष्प्रत्यूहेऽध्यासत्वात्कथमतिव्याप्तिरित्याशंक्याह मिथ्येति। अध्यासत्वात्सद्विलक्षणरूपं मिथ्यात्वं तस्याश्रयापीय
मित्याशंक्य तदेवासिद्धमित्याह अध्यासेति प्रत्यक्षेणेति प्रत्यक्षेपात्तस्याध्यासत्वमित्याशंक्याह भ्रांतीति। अध्यासस्य भ्रांतित्वा
दस्याश्च तद्रूपपरित्यागेनैवमित्यर्थः। ज्ञानानिरूप्यत्वात् भ्रांतित्वमित्याह विषयेति। किमत्र कथमित्यादेरेषोऽर्थः। लक्षणमस्ति वे

तत्व० ७८

ल्लस्यमप्यस्तीति चोदयति किमत्रेति। दुष्टकरणजन्यत्वानाविषयत्वाभावान्नाध्यासत्वमित्याह नतत्रेति। अध्यासत्वाभावे हेत्वंतरमा
ह नापीति मिथ्यार्थज्ञानस्याध्यासत्वं प्रसिद्धं न च नामनिब्रह्मदृश्यमिथ्यार्थगोचरत्वं। नामब्रह्मणोः सत्यत्वादित्यर्थः। लक्षणस्य
तत्राभावान्नातिव्याप्तिरिति दर्शयितुं लक्षणमाहात्म्यस्येति। अथवातिव्याप्तेन दलक्षणमिति शंकामांसस्यमिति तदंगीकरण
मनुपपन्नमित्याशंक्य तात्पर्यमाहात्म्यस्येत्यादिना। अक्षराणि त्वेदं व्याख्येयानि अध्यासत्वाभावमंगीकरोति नित्यसत्यमिति। तर्हि
तिव्याप्तिर्नेत्याह नारदेति। अत: शब्दार्थमाह चोदनावशादिति। ज्ञानत्वं मास्तु तत: किमित्यत आह। येति ज्ञानस्येति। मिथ्या
र्थविषयज्ञानस्याध्यासत्वं नास्ति ब्रह्मदृष्टेश्च ज्ञानत्वात्तत्र लक्षणमस्तीत्यर्थः विहितत्वेपि ज्ञानत्वं किं न स्यादिति शंकते। ननु ज्ञा राम० ७८
नमिति। प्रसिद्धज्ञानवैलक्षण्यात्रेदं ज्ञानमित्याह नेत्याहेति स्वकारणायत्तत्वेन कथमिच्छानुप्रवेशो निरस्यते इच्छायाअपि ज्ञानका

रणं। तन्मूलत्वादित्याशंक्याह विधीति। नन्वित्यादेरयमर्थः। ज्ञानस्येच्छयासाध्यत्वमुक्तमाक्षिपति ननु स्मरतीति। आभोगइच्छासुरसरि
तीरादिस्मरणमिच्छया जायमानं दृश्यते। दुःखदेशस्मरणं निरुध्यमानं चेत्यर्थः स्मृत्युत्पत्तिनिरोधसमये आभोगमनोनिरोधयोः
सद्भावमात्रमंगीकरोति सत्यमिति तर्हि युक्तमन्वयं नेत्याह नस्मृतीति। तयोरित्याभोगमनोनिरोधयोरित्यर्थः। विनिगमनहेत्वभाव
मात्रं स्याह नपुनरिति। अनिच्छतोपि उर्गंधादिबोधदर्शनादित्यर्थः। अत्राप्यणिब्रह्मदृष्टिकरणमनर्थकमित्याशंक्याह। चोदनावशा
दिति। लक्षणकथनानंतरं संभावनोपन्यासउचितो न तु मतांतरोपन्यासस्तत्राशंक्य लक्षणपरिशोधनार्थमित्युक्तं टीकाकृता तदनु
पपन्नं अध्यास्याधिष्ठानाभावेन लक्षणस्याशुद्धत्वादित्याशंक्य लक्षणएवासंभावनानिराकरणाभिप्रायेण मतांतरोपन्यास इति तात्पर्यमा
ह न च ध्यासइति किमध्यासमात्रे विप्रतिपत्तिः उत तदधिष्ठानादाविति विकल्प्य आद्यमंगीकरोति अधिष्ठानेति। अयमर्थः। अधिष्ठान

तत्व० ध्यास्यमानयोः सत्त्वमितिसद्वादिनः असत्वमितिअसद्वादिनः इतिस्वरूपविप्रतिपत्तिः अधिष्ठानस्यसत्वेपिजडत्वमजडत्वंवेति
७९ त्वविप्रतिपत्तिः अध्यस्यमानस्यापिकिंशून्यंतत्वमुतमायाअहोधीरप्यवान्यदितितत्वविप्रतिपत्तिः। आद्यंदूषयसमस्येति। अन्यस्या
न्यात्मनावभासमात्रेविप्रतिपत्त्यभावेपिसत्यानृतमिथुनीकरणरूपत्वंतदिष्टंकथंसिध्यतीत्याशंक्याथर्तिसिध्यतीत्याहतद्वेति।
ज्ञानाकारंस्यवहिष्टस्यवारूप्यादेश्चारसादावध्यासइत्युक्तंअंगीकार्यांतदसंभवविज्ञानाकारत्वबहिष्ठत्वयोरेकेनानभ्युपगतत्वादित्या
शंक्यमतभेदेनाविरोधमाहप्रथमरित्वतिविवेकाग्रहणनिबंधनंतादात्म्यज्ञानमख्यातिवादिनामंगीक्रियते। अन्यथाख्यात्यादिवादि
पक्षीवयुरेरितएवेत्याशंक्याहद्वितीयास्त्विति। एकत्वभ्रमइत्येनैकत्वभ्रमव्यवहारस्यविवक्षितत्वात्ख्यातिमतोपन्यासोयुक्तइ राम०
त्यर्थः। विपरीतधर्मत्वकल्पनाकिमित्यत्रशुक्त्यादेरूप्यादिरूपणख्यातिरूप्यतेसाचपरोक्तेत्याशंक्याहतृतीयस्त्वितिशुक्त्यभावोरूप्यत ७९

द्रूपेणशुक्तिख्यातीत्यन्यथाख्यातेकदेशिनः शुक्त्यात्मनास्थितंतुच्छंरूप्यात्मनाभातीतिशून्यवादिनः विपरीतधर्मत्वकल्पनारूप्यादि
रूपेणानिष्पत्तिः। ननुःकल्पनामवभासमानतामितिकथंसामानाधिकरण्यमित्याशंक्य अन्यस्यान्यात्मनानिष्पत्त्यसंभवात्तथाप्रतिभा
सः कल्पनेत्यभिप्रायेणाहकल्पनामितियच्चरूप्यस्यसन्निहितोत्तरपदार्थपेलक्षणशब्दस्यान्वयः स्यादित्याशंक्याहयदिति। स्वरूपल
क्षणस्यकथमख्यातिमतेनुगतिः संसर्गज्ञानस्यातेनानभ्युपगतत्वादित्याशंक्याहहाख्यातीति। वास्तुपायथार्थज्ञानाभावेपिमानस
मयथार्थज्ञानमख्यातिवादिनांगीक्रियतेइदारावनात्मन्यात्मबुद्धिरविद्येतिसांख्योक्तेरित्यर्थः भ्रान्ताकारेणापिसंसृष्टव्यवहारानुपप
त्त्यासंसर्गज्ञानमंगीकरणीयमित्याहसंसर्गाभिमानइतितटस्थलक्षणेअनुमस्यप्रदर्शनात्तदसंभवइतिशंकतेननुस्मृतीति। भ्रान्तेःसं
स्कारसंप्रयोगादिदोषजन्यत्वस्यसर्वैरभ्युपगतत्वाल्लक्षणानुमस्यप्रदर्शनंनदोषायेत्याहनेत्याहेतिनिरधिष्ठानवादिपक्षेलक्षणव्याप्तिमिति

रासार्थपरत्वेतिपदमयोक्षितमित्युक्तंतत्रनिरधिष्ठानपक्षएवनोपपद्यते।अधिष्ठानज्ञानलक्षणकारणाभावेनभ्रमासंभवादित्याशं
क्यानहनवविद्येति।परावस्थासत्त्वेतावदुक्तेघटादिज्ञानानामपिभ्रमत्वंस्यादित्याशंक्यनदृष्टमित्याहपदार्थेति।अधिष्ठानज्ञानेभ्रमो
त्पत्तेस्तदपिकारणामित्याशंक्येदमाकारस्यापिसमारोपितत्वान्नाधिष्ठानत्वसिद्धिरित्याहनसमिति।अधिष्ठानबोधंविनापिविभ्रा
देभ्रमोत्पत्तिसंभवात्कथंनिरुपपत्तिकत्वमित्याशंक्यकिंपदार्थज्ञानमात्रंभ्रम।उताविद्यादिजनितमितिविकल्पाद्यंप्रत्याहनपदार्थे
तिद्वितीयमुत्थापयति।कथमिति।किमधिष्ठानमात्रंनिरूप्यते।उतसत्यं।नाद्यः।अविद्यादिवदधिष्ठानग्रहणास्याप्यवश्यव्यतिरेकसिद्ध
त्वादित्याहनहीति।नन्विति।करसंमृदितलोचनरश्मिषुयेयंकेशपिंजावस्थासकेशोण्ड्रकः।मायानिर्मितहस्त्यादिभ्रमरत्वादिशब्दा
र्थः।केशोण्ड्रकादावपिनिरधिष्ठानत्वमसिद्धमित्याहतस्यापीति।ननुरजतसत्रभ्रमस्यसाधिष्ठानत्वंनिर्दिष्टंतथाप्यमदिष्टसिद्धिरिति

व्यतिरेकोसिद्धइतिचोदयति २

तस्यासंगतिशंकायांद्वितीयमुत्थापयतीत्याह।ननुसंविदिति।असत्यस्याधिष्ठानात्वानुपपत्तेःसत्यमेवाधिष्ठानमितिशंकतेनन्वध्यस्य
मानेति।अधिष्ठानज्ञानस्यकारणत्वादध्यास्यमानसिद्धेःपूर्वंसिद्धिर्वक्तव्यानतत्राधिष्ठानबोधेध्यस्यमानिसिस्तत्सिद्धौतंत्राधिष्ठा
नसिद्धिरितिनकिमपिपरिशिष्टमित्यर्थः।बीजांकुरयोरितराधीनत्वेपिहेतुहेतुमद्भाववत्संविद्रजतयोरमितदित्याहतत्राहेति।अंकुरांतरस्य
बीजजन्यत्वात्कथंनेतरेतराश्रयत्वमित्याशंक्ययस्याबीजव्यक्तेरंकुरव्यक्तेर्जन्मतस्यांबीजव्यक्तेरंकुरव्यक्तिजन्मनीतरेतराश्रयत्वं।उतत
ज्जातीयायाःनाद्योनभ्युपगमादित्याहनबीजेति।द्वितीयेनैकबीजांकुरव्यक्त्यस्युपगमात्तेनतरेतराश्रयत्वमित्याहकिंत्विति।अस्माभिर
पिसंविद्रजतपरंपराश्रयणान्नेतरेतराश्रयत्वमित्याहनचेहेति।किमत्रकारणपरंपरानुभवसिद्धाआहोस्वित्अन्यतःसिद्धेतिविकल्पाद्यंदू
षयतिनेत्याहेतिइहसंविद्रजतयोरितरेतराध्यासोपदिष्टंवेतुतेहितेयोरेवनसंविदंनरज्जतांनरयोरित्यन्वयः।लघुत्वार्थमाहयस्मामि

तत्व० १११

ति। अनयोः सहोपलंभादितरयोस्तथानुपलंभादित्यर्थः। द्वितीयमनुवदतीनन्विहापीति। किंपूर्वपूर्वस्य उत्तरत्रान्वयित्वेनाधिष्ठा
नत्वं। उतानन्वयित्वेनेति विकल्पाद्यमनूद्य दूषयति यदि तावदिति। संविदोरजताध्यासस्य दधिष्ठानं रजतमये संविदस्य संविद्यन्वितत्वा
द्रजताधिष्ठानस्यापि तत्रान्वयित्वेनोपलंभः एवं पूर्वपूर्वस्यापि तदानीं भावात् क्षणिकत्वक्षतिरित्यर्थः। नद्वेत। दभिसंधायोक्तं तदर
ति। विषयविषयिणोरितरेतराध्यासस्यौचित्यं रमात्तस्मात्संविद्रजतपरंपराकल्पनं दुर्घटं। वीजादेर्वैषम्यं वात्रोपसंह्रियते। संविद्रजत
योरन्वयित्वेनाधिष्ठानत्वेपि न युगपद्वस्थानवीजांकुरवदिति चोदयति नपि न्विति। दृष्टांतासंमत्यादूषयति। तत्राहेति। अभिमतवस्तु
सिद्धिरित्यत्र कार्यकारणभावस्य प्रसाध्यानमितिशंका स्यात् ततश्चान्वयव्यतिरेकविरोधइत्याशंक्याहाभिमतेति। मा भूतत्र्यन्वयिका
रणमिति शंकानिवृत्त्यर्थं प्रतीतिनरसाध्यक्तं तदनुपपन्नं वीजादिभिराकांक्षोपशमादित्याशंक्याह। नन्विलेष्विति। घटशरावादीनां च राम० १११

स्तिकरुचकादीनां च मृत्कनकान्वितत्वोपलंभानुसारेण वीजादिष्वनुगतं किंचिदाश्रयणीयं तदिदमुक्तं प्रतीतिनलइति। पूर्वक्षणवर्तुत्तरक्षण
स्य कारणं नानुगतमित्यस्मिन्पक्षे पूर्वस्यापि कार्यत्वेन कारणांतराकांक्षानुपरमादनाद्यनुगतं किंचित्कारणमास्थेयं तदिदमुक्तं वस्तुत इति
वीजादीनामनन्वितत्वात्स्वोपादानत्वं चेत्तत्र्यरूपाकारानांतरानिरूपणादंकुरादि निरुपादानं प्राप्तमित्याशंक्याह। तद्गति। अन्वयिनीवश्यं
भावित्वमतः शब्दार्थः वीजाद्यारंभकत्वेन तत्रानुगताय्यैव्यवस्तु उपादानमित्यर्थः। नच वीजादिर्वैयर्थ्यं निमित्तत्वेनार्थवत्वादित्याह।
वीजादेरिति। अनन्वयित्वेनाधिष्ठानत्वपक्षस्तु आपपातीत्याहेहापीति। प्रमाणाभावान्नैवमित्याह नेत्याहेति। अत्र तथा चेतिनोक्तं
स्याशंकानुवादरूपत्वादित्यर्थः। वीजांकुरयोर्जन्यजनकभावादृष्टत्वादाश्रीयते न तथा संविद्रजतयोरदृष्टत्वादित्युक्तं तत्रेदं विवेचनीयं किंम'
कलवीजांकुरव्यक्तिषु जन्यजनकतादृष्टेत्युच्यते उत कतिपयव्यक्तिषु आद्ये दृष्टत्वादित्यस्य भागासिद्धिः। द्वितीये अदृष्टस्थलेपि वीजांकुरयो

तत्व० ११२ जन्यजनकतावस्यकत्वेपितत्संभवइत्याशंक्याहायंभावइतिवीजांकुरयोर्जन्यजनकभावस्यैकविषत्वस्यप्रमितत्वादन्यत्रापितत्कल्पनंत
थादिविमतं वीजमंकुरजातीयत्वात्संमतवदितिनानवस्थादोषायप्रसक्तेतुसंविद्जत्वयोरधिष्ठानाधिष्ठेयभावस्यैकविदप्यप्रमित
त्वान्निमित्तनैमित्तिककल्पनानाद्यपरंपरेत्यर्थः। दृष्टांतेकार्यकारण्यपरंपरादृष्टपरंपरेतिकथमुच्यतेदृष्टत्वादेवेसन्निधानादित्याशंक्यतत्रा
प्येषोप्यविवृत्तिनइत्याहदृष्टेतिअन्यथेतिटीकायामनेकहेतुत्वभ्युपगतोदोषत्वेनोक्तास्तनोपपद्यतेअनेकहेतुत्वभ्युपगमस्यान्यत्रदृष्टत्वा
दित्याशंक्याहनानतस्येति।अपिवेत्यनेननिरवधिदाद्याभावेहेतुत्वंतरमुपन्यस्यतअन्नइतिप्रतिभातितत्रसंगच्छतेपूर्वत्रकस्यचिदपिहे
तोनरनुपन्यासादित्याशंक्यवृत्तानुद्रवणपुरःसरंतात्पर्यमाहव्याकारेति। इदंरजतमयंसर्प्पइतिव्याकारत्वयाभ्रमस्फुरणादधिष्ठान
मुपपन्नमित्युक्तंसंप्रतिवाद्यकत्वानपर्यांतोचनयापिसाधिष्ठानत्वंसाध्यतइत्यविरोधइत्यर्थः। अंशांतराभाववविशिष्टांशांतरज्ञानस्याप राम० ११२

धकत्वंननियतमितिवोदयतिनन्वनुमानेतिअनुमीयतेनेनेत्यनुमानंपाद्याप्पपक्षेपेप्यवलंबनत्वादिलक्षणंलिंगं।मात्रवोव्यावर्त्यमाहन
नद्भावेति।वस्तुमात्रलक्षणावधेःसंभवेपिनतद्रूपस्यवाचकत्वमित्याशंक्याहतत्रापीति।अंशांतरज्ञानंवाधकमित्येतदनियतमि
तिशंकतेननुप्रधानमिति।परमाणवेनसंतीत्यादिनिषेधआदिशब्दार्थः।जगत्कारणेत्रिगुणत्वादिविप्रतिपत्तौतत्रनत्रिषेधात्वाभि
चारइत्याहतत्राहेति।अथवेत्यत्रार्थानुषंगोवाध्यतेनवोधइतिप्रकारांतरेणप्रतिपाद्यतइतिप्रतिभातिनइत्युक्तंपूर्वंतदप्रतिपादनादि
त्याशंक्यतात्पर्यमाहाप्येवेति।सर्वलोकस्येत्यादिसर्वलोकसाक्षिचैतन्यंतदविद्यानमवाधेश्वयस्यभ्रांत्यादे४तत्तथोक्तंचैतन्यस्याधि
ष्ठानत्वाभ्युपगमफलमाहकेशेति।केशोंडुकादावपिसाधिष्ठानत्वादिसिध्यतीतिशेषः।साक्षिणोवाध्यत्वादधिष्ठानत्वायुक्तमितिवो
दयतिनन्वर्थेतिअर्थज्ञानलक्षणस्यवाधेतदपेक्षसाक्षिणोपिवाधइत्यर्थः।किंविशिष्टाकारस्यवाधःउतकेवलस्येतिविकल्प्याद्योगीक्रि

तत्व० यत इत्याह न बाहेति एवकारो बाध्यत इत्यनेनानुषज्यते। द्वितीयं प्रत्याह न बोध इति। बोधाबाधे हेतुमाह अधिष्ठानत्वेनेति। बाधसाक्षित्वात्पुनर्भ्रमां
११३ तरहेतुत्वाच्चनैतन्यबाध इत्यर्थः तेनेत्यादिना ग्रंथेन चिदधिष्ठानतायाः प्रोच्यमानत्वात्पुनरुक्तिरित्याशंक्याह तदेवेति। ननु तत्प्रपंचनं व्यर्थ
मितिशंक्यं शंकांतरनिरसनद्वारा तत्प्रपंचनसंभवात्। तथाहि विमतं बाध्यं बाध्यसंबंधसंबंधित्वात् संप्रतिपन्नवदित्यनुमानाद्बोधबाधसिद्धे
नैतस्याबाधित्वमित्याशंकायां संबंधविशिष्टाकारस्य बाध्यत्वेपि न केवलस्य बाध्यत्वमित्यर्थः। तेनेत्यत्र तत्पदेन बोधो गृह्यते बोधोपलक्षितो न बाध्यते
तथा च प्रयोगः विमतं बाध्यबोधत्वाघनेवं नैवं। यथारूप्यादीति। विमतं बाध्यं परिच्छिन्नत्वाद्रूप्यवदित्याशंक्य किं स्वाभाविकं परिच्छिन्नत्वं हेतुः।
उतोपाधिकं नाद्योऽसिद्धेरित्याह स्वत इति। द्वितीयपक्षव्यावृत्त्यर्थश्च शब्दः। गगनस्यौपाधिकपरिच्छेदवत्त्वेऽप्यबाध्यत्वान्न व्यभिचार इत्यर्थः। वि राम०
ज्ञानवाच्याभिमताधिष्ठानाद्विशेषमाह कूटस्थेति। उत्पत्त्यादिधर्मरहितमित्यर्थः। तत्र हेतुमाह परोक्षैकरसेति। बोधैकरस इत्यर्थः। एकधैवा ११३

नुद्रष्टव्यं। प्रज्ञानघन इत्यादिवाक्याद्बोधैकरसमित्यर्थः। अथवा स्वाभावीको विशेषो नोपलभ्यत इति कथं। उत्पत्त्यादिविशेषोपलब्धेरित्याशं
क्याह कूटस्थेति। आरोप्यासत्त्वनिराकरणस्याधिष्ठानासत्त्वनिरसनोपक्रमविरोधमाशंक्याह सत्साक्षिकेनेति। असत्त्वे प्रतिभासायोगादि
त्यसंगतं। किमसदधिगम्यत्वं त्रिविध्यत्वे उतानधिगम्यं आद्ये स्ववचनविरोधः। द्वितीये त्वसदनधिगतौ तन्निषेधस्यैवासंभव इत्याशंक्याह प्रत्य
क्षत इति। अध्याहारेण व्याख्याने हेतुमाह प्रतिभासेति। असदनवभासे तदनुवादेनासत्त्वभासत इति शब्दप्रयोगानुपपत्तेरित्यर्थः। अधि
ष्ठानसत्त्वोपगमादिदं सर्वमसदिति कथमुक्तमित्याशंक्याह नन्वध्यस्तमिति किमविद्यावस्थायां वेद्यासत्त्वमभिमतमित्युच्यते उत विद्यावस्था
यामिति विकल्प्याद्यं प्रत्याह शून्यादिति। प्रपंचस्यासद्वैलक्षण्ये शास्त्रीयोऽसत्त्वव्यपदेशः कथमित्याशंक्य सद्वैलक्षण्याभिप्रायेणेत्याह सव्या
पृतीति। किमत्र विनिगमनकारणमित्याशंक्याह। निषेध्यप्रतियोगित्वादिति। शून्यस्याप्रसक्तस्य निषेधासंभवादित्यर्थः। द्वितीयं प्रत्याह मुक्ता

पपतिनन्विति। विद्योदयानंतरमारोपितासत्वमंग्यकारि। तदसंगतं। उत्तरत्रासत्वेपूर्वमप्यसत्वापातात्। प्राक्तत्वेकदाचिदप्यसंभवादि
त्याद्दशंकासन्नेवादिनामिति। नस्वाध्ययोर्विशेषंशंकतेननुभवत्विति निरूपाख्यत्वेप्रतिसासासंभवादितिद्रष्टव्यं। मुद्गरप्रहरणादिनाव
टादेश्चर्णीकृतत्वान्नोत्तरकालंकृविदपिसत्वमित्यर्थः तत्तोवैषम्यमाह। नविघ्नमेति। इतरेतराभावज्ञानस्यबाधकत्वात्रेतरेतरभावोबाध्यप्य
तेनरूप्यंउभयनिषेधेकल्पनागौरवस्यादित्यर्थः। पुरोवर्त्तिनिसत्वसंभवान्नुप्लवमितिशंकतेकिंत्विति। अन्यत्रसत्वात्रशून्यत्वमित्याहदेशां
तरेति। प्रमाणाभावान्नान्यत्रापिसत्वमित्याहतत्रेत्यादिना। विद्योदयानंतरंयथानिरूपाख्यतातथाबाधकज्ञानंप्रवृत्तमितितथात्रा
त्रार्थः। बाधकबोधेनदेशांतरसत्वाधिगम्यतइतिब्रुवाणंप्रतितथानवगमादितिहेत्वभिधानमयुक्तमित्याशंक्यकिमपरोक्षबाधकबोधा
द्देशांतरसत्वमधिगम्यतइतिब्रवीषिउतत्रान्यादितिविकल्पाद्यंदूषयति। नेदमिति। रजतंनपुरोवर्त्तिनिसत्किंतुदेशांतरादाविसाक्ष

रवुद्धिवृत्त्यदर्शनादित्यर्थः द्वितीयंनिराकर्त्तुंतथावेत्युक्तंटीकायांतस्यायमर्थः। इत्वाःसर्प्पात्मनाग्रहणोविशेषाग्रहणेहेतुरित्याहदूरेति।
रज्जुंसर्प्पात्मतयागृहीत्वाहाहेतिक्रंदमानंनरमालोक्यकृपयाकश्चित्ब्रवीतिमैवीर्नायंसर्प्पइतिनदानहन्त्वनात्सर्प्पोनास्तितांप्रतिपद्येस
स्याभवतीतिसर्पाभावाधिकरणत्वेनपुरोवर्तिप्रतिपत्तिरपिजायते अतःकथममावमात्रंप्रतिपद्यतइत्याशंक्यमात्रबोर्थमाहनतस्येति।दे
शांतरवर्त्तित्वंकिंपदार्थः उतवाक्यार्थः नाद्यः यस्तद्वाचकपदाभावादितिचेतसिनिधायद्वितीयंकल्पंनिरावष्टेनत्वप्रतिपत्ताविति। तत्रासा
मर्थ्यादितिकथंविषंभुंक्ष्वेत्यादिवाक्याद्विषभक्षणबोधकादपिभोजननिवृत्तिप्रतिपत्तिवद्देशांतरसत्वप्रतिपत्त्युपपत्तेरित्याशंक्याह्या
वरिति। यत्रवाक्यंमुख्यवृत्त्यार्थप्रतिपादकंतत्रपदसामर्थ्यमनतिक्रम्यार्थंबोधयत्वस्येतिसमिधमाहेत्यादौ। यत्रत्वमुख्यवृत्त्याबोधकत्वंतत्र
पदसामर्थ्यातिक्रमेणापीतिव्यवस्था। नत्वत्रापदसामर्थ्यातिक्रमणनिमित्ताभावात्सामर्थ्यानुरोधेनबोधकत्वंवक्तव्यं। नवतस्यदेशांतरस

तत्व० त्वबोधनसमर्थता। तस्मादनभिहितत्वादभिहितपदार्थसंसर्गबोधनसमर्थत्वाद्वाक्यस्येत्यर्थः। वाच्यानुपपत्तिरस्त्र सत्वकालिकेतिमतमु
११५ च्छापयत्येवंसतीति। प्रत्यक्षपरोक्षवाचकधियोः साक्षाद्व्यवधानवर्तित्वबोधकत्वासंभवे सतीत्यर्थः। वाक्यमिति प्रत्यक्षस्याप्युपलक्षणं। किमेत
द्वारिद्रष्ट्योच्यते उत लौकिकदृष्ट्येति विकल्प्य क्रमेण दूषयत्यन्यथाख्यातावित्यादिना। अख्यातावपीत्यस्यायमर्थः। षष्ठे निरूपितं एतदध्व
र्युनिष्क्रामन्तं प्रस्तोता संततनुपात्तमुद्गातारं प्रतिहर्ता तं ब्रह्मा तं यजमान इति ज्योतिष्टोमे ऋत्विजामन्योन्यं कच्छोपादानेन यज्ञशालातो निष्क्रम
णं श्रूयते तत्र प्रतिहर्तृविच्छेदे सर्वस्वदक्षिणया यागपरिसमाप्तिः। श्रूयते सर्ववेदसं दद्यादिति। उद्गातृविच्छेदे दक्षिणां विनैव यागः समाप
नीय इति। तत्रोभयोर्युगपद्विच्छेदे विकल्पः तुल्यबलत्वादिति निर्णयः क्रमेण निमित्ते जाते परीक्ष्यते। किमाद्यं निमित्तं स्वकार्यं प्रयोजयतु राम०
त चरमं निमित्तमिति। तत्रासंजातविरोधितया पूर्वस्य बलीयस्त्वात्तदेव प्रयोजकं उत्तरस्य तद्विरोधे प्रयोजकत्वासंभवादिति प्राप्ते राद्धं ११५

तं। पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवदिति। तस्यायमर्थः निमित्तयोः पूर्वापरभावे जाते पूर्वस्य दौर्बल्यं पूर्वोपमंतरेणोत्तरोत्पत्तेरनुपपत्तेः। प्र
दुक्तं पूर्वापरबलीयस्त्वं तत्र नाम प्रतीयतां। अन्योन्यनिरपेक्षाणां यत्र जन्म धियां भवेदिति। तत्र दृष्टान्तः प्रकृतिवदिति। यथा प्रकृतौ श्रुतानां कु
शाममपबर्हिषां विकृतावतिदेशप्राप्तानां शरमयबर्हिर्भिर्बाधः। तेषां प्रकृतौ सावकाशत्वादितरेषां निरवकाशत्वात्सावकाशनिरवकाशयो
र्निरवकाशं बलवदिति न्यायेन। तथा च प्रथमप्राप्तप्रतिहर्तृविच्छेदपरिप्रापितसर्वस्वदानकर्तव्यतावरमप्राप्तोद्गातृविच्छेदनिमित्तादक्षिण
यागसमाप्तिविज्ञानबाधितान्यत्र सत्वेत नाश्रीयते तद्वदत्रापीति। दृष्टांतो संप्रतिपन्न इति शंकने प्रवृत्तिरिति। अप्राप्त्या परिहरति न प्रवृत्तीति
किं च किं प्रवृत्तिमात्रस्य निरोधो बाधः उत यथार्थप्रवृत्तेः तत्राद्यं इति माग्निमाहृत्य यागादिष्विति। न चरमः अख्यातिमते अन्यथाप्रवृत्तेरयोगादित्य
र्थः। किं कतिपयप्रसिद्ध्यभावो हेतुः उत सकलप्रसिद्ध्यभावः। तत्राद्ये कतिपयप्रसिद्ध्यभावस्य सर्वत्र सुलभत्वान्न किमपि सिद्ध्यति। द्वितीये स

तत्व० ११६ द्धिः निखिलप्रसिद्ध्यभावस्य दुस्त्यजत्वादित्याशंक्याह । सत्यामिति । राजादिप्रतिबंधप्रध्वंसे योगादिषु पुनः प्रवृत्त्यनुपपत्त्या तद्धेतुत्वबाधितत
त्कर्तव्यतांबुद्धिरवसीयते । अन्यथा कर्तव्यताबुद्धेर्बाधिते प्रवृत्तिर्न स्यादित्यर्थः । लौकिक इष्टेति विकल्पं निरस्यति किंचेति । निषेधोपाधीति
निषेधस्योपाधिर्योदेशादिः तस्य सजातीये देशादाविति । यदिह निषिध्यते तदन्यत्र सदिति न व्याप्तिरिति हन इत्यत्र व्यभिचारादिति व
क्तुमेतदभाववदिति किमुक्तमित्याशंक्याह यथेति । इह घटस्यान्यत्र सत्त्वाभाववद्बाधितस्य नान्यत्र सत्त्वमिति टीकार्थः । प्रतियोगित्वेनेति ।
प्रतियोगिव्यावर्तकत्वेनेत्यर्थः । विधिप्रत्ययानुपपत्त्या समारोपितस्यान्यत्र सत्त्वमिति शंकते नन्विति । बाधविरोधाभ्यां न सत्त्वं अन्यत्रापि
तत्रेष्यते चेत्कथं प्रतिभास इत्यर्थः तन्मात्रेण सत्त्वं किं देशांतरसत्त्वलब्धार्थः उताज्ञसत्त्वं नाद्यो नांगीकृतेः नापि चरमः बाधविरोधादिति रामः
शंकायामाह अत्रैवेति सद्विलक्षणत्वमनिर्वचनीयत्वं बाधयोग्यत्वं मिथ्यात्वमिति विभागः निरुपाधिकनिषेधानुपपत्त्या न पुरोवर्तिनि सत्त्वमिति ११६

बोधयति । ननु तर्हीति पुरोवर्तिनि सत्त्वे प्रागरजतमिदानीं नेत्येव प्रतिषेधः स्यात् न तु नेदं रजतमिति न च तथा लक्ष्यत इत्यर्थः निषेधस्य पुरोव
र्तिनि रूप्यविषयत्वमसिद्धमित्याह न लौकिके इति परमार्थरजतस्यात्राप्रसक्तत्वान्न निषेध इति न शंकास्पदं । रूप्याभासप्रसक्त्या तत्प्रसक्तेरावे
दितत्वादित्याशयः । विधिप्रत्ययस्य रूप्याभासविषयत्वं निषेधप्रत्ययस्य परमार्थविषयत्वमिति कल्पनाद्दूरे कालभेदेन सत्त्वासत्त्वकल्पनं
ततश्च विधिनिषेधप्रत्ययोपपत्तिरित्याशंक्याह निरुपाधिकेति चशब्दः शंकाभावार्थः । रजतस्य प्राक्तनत्वेन नेदं रजतमिति निरुपाधिकनि
षेधो न घटत इत्यनुभूयते । तस्मान्निरुपाधिकनिषेधबलात्प्रतिपन्नं मिथ्येति निश्चिनुम इत्यर्थः । इतीत्यन्नानिश्चिनुम इति शेषः तत्रैव हेत्वंत
रमाह बाधानंतरमिति । उपलभ्यमानस्य सत्त्वे मिथ्यात्वपरामर्शो न स्यादित्यर्थः प्रतीयमानस्वरूपस्य पुरोवर्तिनि सत्त्वे तस्य भ्रांतित्वप्रसि
द्धिरपि न स्यादित्याहान्यथेति । प्रत्यक्षपरोक्षबाधकप्रत्ययोर्देशांतरसत्त्वगमकत्वस्य निरस्तत्वाद्यत्रापीत्यादेर्वैयर्थ्यमित्याशंक्य तात्पर्यमा

रत्न० ११७ हनायं सर्प इति। आरोप्यासत्वस्य निरस्तत्वात्तदेवोपसंहरणीयमित्याशंक्य तस्य साधिष्ठानभ्रमसाधनप्रसंगागतत्वादितरस्योपसंहरणं
युक्तमित्याह नन्वेवमिति। आद्यउपसंहार इति आद्यः प्रधानस्योपसंहार इति यावत्। यद्येवमित्यादेरयमर्थः भ्रमस्य साधिष्ठानत्वनियमादधि
ष्ठानवाचकं पदमाद्रियतां किं स्मृतिरूपः परत्र इत्यनेनेति शंकते। यदिति। संस्कारशब्दजन्यत्वासिध्यर्थं तदर्थवदित्याशंक्यार्थसिद्धं तदित्याह तथापि
धस्येति। पूर्वदृष्टपदेन संस्कारजन्यत्वं सिद्धमित्येतदंगीकरोति सत्यमिति। तर्हि इतरस्य वैयर्थ्यं नेत्याह अर्थेति। सम्प्रयोगदोषजन्यत्वसिद्ध्य
र्थं स्मृतिरूपविशेषणमित्यर्थः। स्मृतित्वं किं न स्यादित्यत आह नचेति पूर्वदृष्टपदवैयर्थ्यं शंकते यद्येवमिति। एतावदुक्ते साकांक्ष
त्वेनानर्थकं तत्राह तत्र परत्रेति। पूर्वदृष्टत्वमंतरेणास्मृतिरूपत्वमनुपपन्नमित्याशंक्यार्थसिद्धत्वेन तदुपादेयमित्याह नहीति। पूर्वदृष्टार्थ
सिद्धत्वेपि स्पष्टीकरणार्थं पूर्वदृष्टपदमित्युक्तं तत्र स्पष्टीकरणस्यान्यतः सिद्धत्वात् व्यर्थं तदवस्थमित्याशंक्याह सत्यमिति। प्रसिद्धस्म राम० ११

मोसंस्कारजन्यत्वस्य पूर्वानुभवसंभिन्नविषयत्वस्य च सद्भावात्तथा चांते कीदृश्य सादृश्यस्मृतिरूपशब्देन विवक्षितमिति न ज्ञायत इति
पूर्वदृष्टग्रहणमित्यर्थः। तेन वा कथं संशयआवृत्तिरित्याशंक्याह पूर्वदृष्टस्येति। अपूर्वत्वस्योक्तत्वे कथं पूर्वदृष्टस्यावभासनमित्याशंक्याह
पूर्वेति। तत्र हेतुमाह अनिर्वचनीयेति लक्षणसमर्थनानंतरं संभावनायुच्यते। किमनुभवोपन्यासेनेत्याशंक्योक्तं तथा चेत्यादि। नन्वाकासौ
युक्तिस्तत्राह। भ्रांतिश्चेदिति शुक्तौ गौरित्यादिप्रत्ययानां भ्रांतित्वप्रसंगात्तिप्रसंगशब्दार्थः। शुक्तिकारजतवदिति प्रतिभासमानत्वान्व
यतिभासनइति कथ। मित्याशंक्य शुक्तिकारजतवदिति भ्रांतिमधिकृत्योच्यते। उत भ्रांतमिति विकल्पक्रमेण दूषयति ननु शुक्तिकेत्या
दिना। उत्तरपक्षांगीकारेण समाधत्ते बाधकेति। वतिग्रहणवैयर्थ्यं परिहरति बाधकज्ञानविषयत्वेनेति। नेदं रजतमिति ज्ञानं बाधकज्ञान
शब्दार्थः। न त्सामर्थ्येनाभिधानत्वानानुपपत्तेरर्थः। अध्यस्तत्वइत्यत्र आसआरोप्यमिथ्यारजतसंभेदइत्यत्र मिथ्येति विशेषणं नोपपद्यते।

व्यावर्त्यसत्यरूप्याभावात् व्यतरइत्याशंकते ननुमिथ्येति विशेषणमन्यथापि घटत इत्याह। नेत्यादिति। नीलमुत्पलमित्यादौ व्यावर्त्यै रक्तोत्प
लसद्भावे नीलमिति विशेषणमर्थवद्दृष्टमित्याशंक्य गंधवती पृथिवीत्यादौ स्वरूपपरत्वेनापि विशेषणोपादानान्नैतदित्याह स्वरूपेति। इ
दंतायाः परमार्थत्वात्तद्धर्मिरजतमपि सदित्याशयेनाह। ननु रजतस्येति इदमस्तद्धर्मत्वमसिद्धमित्याह। नेत्याहेति। अपरोक्षत्वानुपप
त्त्या रजतस्य संप्रयुक्तत्वमेष्टव्यमिति शंकते कथमिति। तदन्यथापि घटत इत्याह। तत आहेति दोषबलादित्यादेरयमर्थः। संस्कारपरिप्रा
पितपारोक्ष्यप्रतिबंधकमाह दोषबलादिति। आपरोक्ष्यसंपादकमाह इंद्रियेति इंद्रियसंप्रयोगजनितं यदधिष्ठानज्ञानं तस्मिन्नंतर्भूयेति
वि। विवर्तचैतन्यं तस्मिन्नध्यासादापरोक्ष्यमेतेति। तत्र शुक्तिकोदाहरणेनेत्यनेन तथा वेत्यादिभाष्याक्षरार्थो व्याख्यातोऽलतात्पर्यार्थः। ना
द्यानुपलंभात्। न द्वितीयस्तात्पर्यस्येरितत्वादित्याशंक्यैकेनैवोदाहरणेन लक्ष्यलक्षणसंगतिसिद्धेः किमुदाहरणांतरेणेति शंकायां

तस्यार्थवत्त्वं दर्शयितुमुत्तरो ग्रंथ इत्याहोदाहरणेति। निरुपाधिका यास्य सोदाहरणमाद्यं द्वितीयं तु सोपाधिकस्येति विभागः। अस्मद
र्थस्यास्मच्छब्देन किं चैतन्यं विवक्षितं उतांतःकरणं। आद्ये तद्विषयवदा एवानिदमंशाभावादनिदमंशस्येत्यनुपपन्नं। द्वितीयेपि तद्विषयेना
त्मन्यनिदमंशाभावादनुपपत्तिरित्याशंक्याह। अस्मदर्थ इति। प्रतिभास्यत इति प्रतीतावस्तस्मिन् एतदुक्तं भवति। अस्मच्छब्दस्य योऽर्थो
हंकार इदमनिदमात्मकः। तस्मिन्नुद्बोधिमताभ्यानं व्यावर्त्तयति चैतन्यस्येति। हेतुं संबंधे परिणामित्वशंकां व्यावर्त्तयति निरंजनस्येति। अ
हंकारस्यानिदमात्मनः प्रतिभानत्वादनिदमंशस्यानात्मेत्ययुक्तमित्याशंक्य युष्मदर्थलक्षणाक्रांतत्वात्तत्रानिदमंशोऽहंकार इत्युक्तं त
दनुपपन्नमिदंतया तथा प्रतिभासाभावे तल्लक्षणाप्रवृत्तेरयुक्तत्वादित्याशंक्याह प्रतिभासत इति। यथा चंद्रादेरूपस्य प्रतिभासाभा
वेपि तेजस्त्वाधिकरणतया तद्रूपमाश्रितं तथात्रापीत्यर्थः। अध्यासलक्षणेति व्याख्यादिविघुरतया निरवधेसिद्धे कथं पुनरित्यादिवाक्यं

माख्यायतां किंनत्वित्यादिना ग्रंथेनानवाप्तलक्षणाव्याप्तिराशंक्य निरस्यतइत्यपि वाच्यं तदिहनिद्वारीत्यत्र कारणत्रितयजन्यलक्षणे
पलक्षणस्य परत्र परावभासलक्षणस्वरूपलक्षणस्य चात्राभावाभिधानादित्यसंगतोयं ग्रंथ इत्याशंक्योभयविधलक्षणाव्याप्तेराशंक्या
मानत्वान्नासंगतिरिति टीकाशयमाविष्करोति अद्वितीयेति। आत्मन्यनात्माध्यासे कारणत्रितयजन्यस्य ज्ञानस्य परत्रेतस्य वा संभ
वान्नाध्यासलक्षणमात्मनि संभवतीति संबंधः उपलक्षणाभावे हेतुमाह तदभावादिति। कारणत्रितयांत। पातिनो दोषस्याभावादि
त्यर्थः दोषाभावं दर्शयितुं तदाश्रयाधिष्ठानादेरात्मव्यतिरेकेणासत्त्वमाहाध्यस्यमानेति। अध्यस्यमानव्यतिरिक्ताधिष्ठानादेरात्मनः पृ
थक्त्वाभावे हेतुमाह इष्टेति अध्यस्तत्वमुपपादयत्यद्वितीयेति। आत्मनोद्वितीयत्वादिरूपत्वात्तद्विपरीतमध्यस्तमित्यर्थः। अथवा स्व
रूपलक्षणाभावं दर्शयितुं द्रष्टारं विशिनष्टि अद्वितीयेति। अधिष्ठानं व्याकारदृष्टांतादेकत्वमात्मनो नित्याद्यविशेषणार्थः। विशेषाग्रहण

सामान्यग्रहणं वाधिष्ठानत्वप्रयोजकं न चात्रेत्याह चैतन्येति चिद्रूपोप्यात्मान्याधीनप्रकाश इति केचित्तन्नाह। प्रकाशात्मनीति अस्त्वधिष्ठान
देरात्ममात्रत्वं ततः किमित्यत आह ततश्चेति। अधिष्ठानदोषः सादृश्यादिः प्रमातृदोषो रागादिः करणदोषः काचादिः न च तद्दोषजात
मात्मनि संपादयितुं शक्यं तदेकरस्य श्रुतिविरोधादित्यर्थः। जन्यत्वमप्यसंभवीत्याह चैतन्यस्येति आध्यासश्च विषयश्चेत्यध्यासविषयौ त
योः साधकं यज्ज्ञानं चैतन्यं तस्य नित्यत्वेनाजन्यत्वादित्यर्थः। अद्वितीयेत्यादिविशेषणफलं स्वरूपलक्षणाभावमाह गृहीतेति। न गृहीत
विशेषो येन सामान्यग्रहणेन तत्रथोक्तं। वशब्दो योगादित्यनेन संबंध्यते। विशेषाग्रहणं प्रसाध्य तद्धेतुत्वेनाविद्यादोषकत्वमनयोस्त्वयविधल
क्षणं संपादयामीत्याशयेनाशंक्य तानवह्नापीति। आत्मनागृहीतविशेषः। अनन्यनिमित्तप्रकाशत्वात् व्यतिरेकेण शुक्त्यादिवदित्याह नेत्या
ति। अनन्यनिमित्तप्रकाशत्वेपि संवेदनवदगृहीतविशेषत्वमित्यप्रयोजकत्वं साध्याभावाव्यावृत्तिं वा शंकते। ननु स्वभावेति। स्वयंप्रकाशत्व

तत्व०
१२०

नित्यत्वादीनांयथासंविद्यग्रहणंतद्वदत्रापीत्यर्थः संवेदनशब्देनचैतन्यंविवक्षितं।ठतवृत्ति।आद्येनदृष्टांतसिद्धिः तस्यपक्षत्वात्।द्वि
तीयेनवभासनिमित्तसद्भावादपृहितविशेषत्वंतत्रसंभवति।नात्रतिवेतसिनिधायविशेषाग्रहणासंभवेदेहत्वंतरमाहनेत्यादिति।आत्मा
नागृहीतविशेषोनिरंशत्वाद्व्यतिरेकेणशुक्तिकावदित्यर्थः।असिद्धिंनिरस्यति।मध्यमेति।अनित्यत्वादिदोषप्रसंगात्रमध्यमपरिमाणा
त्वमित्यर्थः।आत्मागृहीतविशेषोनिरंशत्वात्गगनवदितिप्रत्यनुमानपराहतिप्रयोजकत्वंचाशंकतेननुनिरंशइति।असाधीनप्रका
शत्वमुपाधिरितिदूषयतितत्राहेति।नवाप्रयोजकत्व।स्वयंज्योतिष्ट्वमतगंस्यवाधकत्वात्।ननुस्वयंज्योतिष्ट्वंनामप्रकाशांतरनिरपेक्षस्फु
रणत्वंतच्चकदाचिदनवभासमानपक्षेपिघटेनप्रकाशसमर्थेपिस्वतएवस्फुरणादित्याशंक्याहयावदिति।प्रकाशांतरनिरपेक्षस्फुरण
स्वभावत्वात्कदाचिदनवभासोनघटतइत्यर्थः स्वयंज्योतिष्ट्वमाश्रित्यतिकुलइति।आत्मानस्वयंज्योतिः मवहारपदत्वात्घटादिवदित्यर्थः। रा०म०
१२०

आवाधितविषयत्वस्यानुमितिसामग्र्यतमावाच्छुतिविरोधेनानुमोतिष्ठतीत्याह।त्रायामिति।श्रुत्यनुमानयोर्विरोधोसिद्धइतिचोदयतिनन्वि
ति।किंज्योतिः शब्दस्यस्वप्रकाशगुणवाचकत्वमंगीकृत्यात्मज्योतिःपदयोः सामानाधिकरण्यश्रुतिविरोधउद्भाव्यतेआहोप्रकाशगुण
वद्द्रव्यवाचकत्वमितिविकल्पाद्यंदूषयतिज्योतिरितिनिवज्ञानस्यगुणत्वमसिद्धमित्याशंक्यघटज्ञानयोः संबंधोगुणनिष्ठज्ञाननिष्ठत्वात्त
वावत्।तत्रसंबंधस्यगुणनिष्टत्वंसंबंधिनोरन्यतरस्यगुणतामंतरेणापर्यवस्यदन्यतरस्यगुणतांसाधयति।तत्रनघटस्यगुणत्वंद्रव्यत्वा
त्पारिशेषात्ज्ञानंगुणत्वेनसिध्यतीत्यर्थः द्वितीयंपरिशिनष्टीतइति।तथापि।कथंश्रुतिविरोधइतिशंकायामाहेतीति।आत्मज्योतिःप
दयोः सामानाधिकरण्यादात्मनोवोधरूपत्वप्रतिपत्तेस्तत्पराहतमनुमानमित्याह।नैतदिति।नवज्योतिः शब्दस्यप्रकाशगुणवद्द्रव्यवाध
कत्वात्तत्सामानाधिकरण्याद्बोधरूपत्वमितिशंक्यतमोविरोधिप्रकाशमात्रप्रवृत्तिसंभवेद्द्रव्यवाचकत्वकल्पनायाअयुक्तः।गुणवाचकश

ब्दस्यात्मसामानाधिकरण्यानुपपत्तेरभिव्यंजकत्वंकल्प्यतइतिचेत्नैवंज्ञानस्यगुणत्वासिद्धेः नचानुमानात्तत्सिद्धिः प्रतियोगपराह
तत्वात्।रूपवत्ज्ञानयोःसंबंधोद्वयनिष्ठःज्ञाननिष्ठत्वात्संत्तावत्।उपक्रमादिपर्यालोचनयानवच्छिन्नात्मप्रतिपादकश्रुतिविरोधाद्
आत्मनिगुणिभावकल्पनानुपपत्तेश्च।तस्मात्त्रय्यपुनुषइत्यादिवाक्यंबोधाभेदप्रतिपादनपरमित्यर्थः।इतोपिनात्मान्याधीनप्रकाश
इत्याहसर्वेति।भासमानस्यान्याधीनप्रकाशत्वंघटादौदृष्टं।तद्व्यावर्त्तयितुंस्वयमितिविशेषणंतथात्मनोन्याधीनप्रकाशत्वेनुप
पन्नमित्यर्थः।बोधरूपत्वाभावेविशेषणांतरंवैयर्थ्यंचेत्याह।स्यैवेतिविशेषणमन्यथाघटत्वइतिचोदयति।नन्विति।घटादिज्ञानंस्वा
तिरिक्तकर्त्रादिकारकापेक्षयाजायमानंदृष्टं।तद्वदात्मज्ञानस्यापिकारकांतराधीनत्वंप्राप्तंव्यावर्त्तयितुंविशेषणमुक्तमित्यर्थः
कारकांतरानिवृत्तिर्नविशेषफलंज्योतिषोविशेष्यत्वादित्याह।ज्योतिष्वस्येति।एवकारस्यार्थमाह।तत्रकारकत्वस्येति।ज्योतिष्टस्य

कस्माद्विशेष्यत्वमितिशंकायांवाहतत्रेति।इतिपिनकारकांतरव्यावृत्तिविशेषणफलमित्याह।किंचेति।जन्माभावोसिद्धइतिचोदयति।न
न्विति।विमतंजन्मवत्।ज्ञानत्वात्विषयज्ञानवदित्यर्थः।प्रत्यनुमानविरोधमाह।प्रकाशेति।आत्मनिप्रकाशगुणस्यप्रकाशगुणत्वप्रयुक्त
मकजन्माभाववनिष्क्रयादिनिसंबंधः।तत्रहेतुमाहस्वरूपेति।स्वस्याश्रयभूतंद्रव्यंस्वद्रव्यंतदेवोपाधिस्वद्रव्योपाधिः।तस्मिन्नेवधर्मिणीत्यर्थः
साध्यवैकल्यंनिरस्यति।द्रव्यजन्मेति।असिद्धिंनिवारयतिस्वाश्रयीति।अत्रैवस्यात्मनीत्यनेनसंबंधः।ज्योतिःशब्दादिसत्रप्रतीयमानस्येति
शेषः।तथाचप्रयोगः।विमतंस्वाश्रयोपाधीनजायतेस्वप्रकाशत्वात्प्रदीपप्रकाशवत्।विषयप्रकाशेप्यभिचारमाशंक्याह।नचेति।ज्ञानपरि
णामात्करणेसतिप्रकाशगुणोदयोनभवतिअंतःकरणेपिज्ञानपरिणामःप्रकाशगुणोदयोनतत्रनीतिवासंबंधः।तत्रहेतुमाहस्वभावत
इति।अतःकरणस्यविशेषपरिणामस्यज्ञानत्वाभ्युपगमादितिसंबंधः।सुखादिव्यावृत्त्यर्थंविशेषेतिविशेषणं।परिणामित्वमुपपादयितुमंतः

तत्व० करणविशिष्टनाप्रिद्व्यस्येति। तदुपपादयति। प्रकाशगुणवदिति। अंतःकरणस्य घटादेरिव जडत्वे एकस्य प्रकाशगुणत्वमन्यस्य नेत्येतत्कथमि
१२२ त्याशंक्याह स्वभावत इति। जडेपि प्रदीपे प्रकाशगुणदर्शनादित्यर्थः। न च ज्ञानस्यांतःकरणपरिणामत्वे प्रमाणाभावः कामः संकल्पो विचि
कित्साश्रद्धाश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एवेत्यादिना कामादीनां तत्परिणामत्वप्रतिपत्तेः। तथा च मृदो घटादिरूपेणावस्थान
वदंतःकरणस्य ज्ञानाकारेण व्यवस्थितत्वादस्य न स्वाश्रयोपाध्योर्जन्मेत्यर्थः। किंच विषयज्ञानवदित्यत्र ज्ञानशब्देन स्वरूपज्ञानं विवक्ष्यते
उत वृत्तिः। आद्ये साध्यवैकल्यमित्याह। न वेति। अपिशब्दः कचिदित्यनेन संबध्यते चशब्दोवधारणार्थः। लोके वेदे च स्वरूपज्ञानं जायमानत्वे
नोपलभ्यत इत्यर्थः द्वितीयमुत्थापयति। दृष्टमिति। अंतःकरणे धर्मिणि वृत्तिजन्म दृष्टमिति शेषः। अस्मिन्पक्षे दृष्टांतः साधनविकल इत्याह नत्वा
नुरिति। ततः किमित्यत आह तस्य चेति। यद्यप्यात्माज्ञप्तिः। तथापि कल्पितभेदमंगीकृत्यात्माश्रयत्वादित्युक्तं तत्रापि ज्ञानशब्दप्रयोगाद राम० १२२

दृष्टत्वादंतःकरणेति। चैतन्यस्याध्यासाद्वृत्तौ ज्ञानत्वमुपचर्यते दाहकत्वमिवायःपिंडे न च मुख्यत्वं किं न स्यादिति शंक्या अर्थप्रकाशोर्थस्फुरणं
तच्च स्वयंप्रकाशं दृष्ट्या विषयस्य तदधीनव्यवहारानुपपत्तेः। न च स्वप्रकाशस्य स्फुरणस्य जडांतःकरणधर्मत्वं वक्तुं शक्यत इत्यर्थः। ज्ञान
स्य प्रकाशगुणवत्त्वेन प्रकाशात्मकत्वादित्यसिद्धिमित्याशंक्याह न वेति। ज्ञानस्य प्रकाशगुणवत्त्वे आत्मनः प्रकाशगुणवत्त्वेन स्वयंज्योति
ष्ट्वमुपहीयेतेत्यर्थः। प्रकाशत्वस्य स्वाश्रयोपाधावजायमानत्वेन संबंधे। न जडप्रकाशत्वमुपाधिरिति निवेदयति। जडेति प्रकाशमात्रस्य
प्रयोजकत्वसंभवे जडेति विशेषणं व्यर्थमित्याह न प्रकाशो निर्मणादिप्रकाशो व्यभिचारमाशंक्याह दर्पणादाविति मलावृत्तप्रकाश
स्य निवर्षणक्रियया विरोधिमात्रनिरसनं क्रियत इत्यर्थः। प्रदीपे सति प्रभागुणस्योत्पत्तेर्दर्शनात्साध्यवैकल्यमित्याशंक्याह प्रदीपादि
ष्विति विरलावयवद्रव्यस्य प्रभाशब्दवाच्यस्योत्पत्तिर्न प्रकाशगुणस्येत्यर्थः। उत्पन्नं द्रव्यं क्षणमात्रमगुणं तिष्ठतीत्यभ्युपगमात्साध्यवै

तत्व० १२३

कल्प्यमाशंक्याह नप्रकाशगुण इति क्षणमात्रं गुणस्त्वं भावः कस्मादिति विवेचनीयं। द्रव्योत्पत्तिदोत्पन्नत्वेन जन्यत्वनकत्वानुपपत्तिः
नियतपूर्वक्षणवृत्तित्वात् कारणत्वस्य ततः क्षणमात्रमगुणं स्थित्वोत्तरकाले गुणं जनयतीति वक्तव्यमेवं द्रव्योत्पादकेनैव द्रव्यसमवेतगुणो
त्पत्त्युपपत्तेः। क्षणमात्रमगुणं तिष्ठतीति प्रक्रियामानवत्त्वमनादिस्यर्थः। स्वयंज्योतिष्ट्वप्रतिपादकश्रुतिपर्यालोचनया स्वप्रकाशत्वमुक्तं प्र
त्यगात्मानस्यातिरिक्तसंविदधीनत्वव्यवहारविषयः संविदभिन्नत्वात् संविद्वत् नवासिद्धिः प्रज्ञानघनवाक्यात् प्रतिपत्तेरिति गुरु
मतानुसारिणं प्रत्याह प्रज्ञानघनेति। अहं जानामीति ज्ञानाश्रयतयाभिव्यक्तिमाणत्वात् प्रत्यक्षविरोध इत्याशंक्याह। नजेजति। जा
नामीत्यत्र ज्ञानाश्रयत्वेनाहंकारोनुभूयत इत्यर्थः। अहंकारविषयत्वं कस्मादात्मविषयत्वमेवास्तित्याशंक्य ज्ञानरूपब्रह्माभिन्नत्वात्
ज्ञानाश्रयत्वं युक्तमित्याह विज्ञानमिति। विज्ञानं ब्रह्मेत्यत्र ब्रह्मणो सात् भेदः प्रतीयते न बोधाभेद इति शंकते ज्ञानमिति ज्ञानत्वमुत्पर राम० १२२

ति। ज्ञानशब्दस्य बोधार्थत्वात् कथं ज्ञातृपरत्वमिति नशंकास्यदं करणाधिकरणयोश्चेति सूत्रेण ल्युट्प्रत्ययस्याधिकरणेपि विधानादित्य
र्थः। भावार्थेपि ल्युट्प्रत्ययस्य विधानात् कथं नियम इत्याशंक्याह न भावार्थ इति। भावार्थस्य क्रियात्मकत्वात्तद्रूपत्वं युक्तमित्यर्थः। करणा
धिकरणयोर्धात्वर्थप्रतिपत्तिसापेक्षतया विलंबितप्रतिपत्तिकत्वाद्धात्वर्थस्य च पुरः स्फूर्तिकत्वात्तदाश्रयणं युक्तमित्याह न भाव इति। धा
त्वर्थाभेदानुपपत्तो विलंबितप्रतिपत्तिकस्याप्यधिकरणस्योपादानमिति वक्तव्यमेवमहंत्वश्रुतिविरोधादाधाराधेयकथनायोगप्रयुक्तेः
ज्ञानस्य क्रियात्मकत्वं वासिद्धं। नव धात्वर्थत्वात् क्रियात्मकत्वमक्रियात्मकस्यापि धात्वर्थस्य गडिवदनेकदेशत्वादौ प्रसिद्धत्वादित्यर्थः।
अनन्यनिमित्तप्रकाशत्वलाघवं इतरत्र गौरवं वेत्याह किंच प्रतिक्षणं वेति ज्ञानस्याजन्यत्वे हेतुं तस्मादात्मनीति प्रकाशरणव्यतिरेकोभ्याव
न्तिरभावः नदत्वावादित्यक्षरार्थः। विमतं नामनुकं प्रागभावशून्यत्वात् गगनवन्न वहेत्वसिद्धिः आत्मनि प्रकाशप्रागभावोपगमे जिज्ञासा

तत्व० यां संशयविपर्ययाभावप्रमास्तु नचोपलभ्यते तस्मान्नासिद्धिरित्यर्थः। श्रुतियुक्तिभ्यामात्मस्वप्रकाशत्वसिद्धेरग्रहणाभावादात्मनो
१२४ धिष्ठानत्वेऽप्युक्तेब्रह्मस्वरूपानवभासनादित्यक्तं नयुक्तं वैयधिकरण्यादित्याशंक्यात्मब्रह्मणोरभेदान्नवैयधिकरण्यमित्याह नत्वात्म
नीति। अविद्यायाआच्छादनादिशक्तिमत्वात्कथं मनवभासाद्यभावइत्याशंक्यानवभासाद्यभावं नब्रूमः। किंत्वन्यत्रानवभासादिः स्या
दित्याह तर्हीति। ब्रह्मात्मनोरभेदादात्मन्यपि सस्यादित्याशंक्याह भेदेमानाभावत्वेनतदित्याह नजीवइति। मानाभावादित्यतेदसिद्धं अ
नेनजीवेनेत्यभेदसिद्धिरित्युक्तमप्युक्तं वारेणपरस्यैन्यमनुप्रवेश्य संकलयामीत्यादौ चारगतसंकलनस्य राज्ञिन्यपदेशवज्जीवगतना
मादिव्याकरणब्रह्मस्याप्युच्यते तस्मात्कथमभेद इत्याशंक्येत्रमुख्यार्थासंभवदुपचारः नतथात्रेहत्याननुकार्येति। तत्वमस्यादिवाक्यमाखं
उर्थनिष्टं। अकार्यकारणद्रव्यमात्रवृत्तित्वे सति समानाधिकृतत्वात्सोयं देवदत्त इतिवत्। तत्र समानाधिकृतत्वादित्युक्ते खंडोगौरि राम० १२४

त्यादौ व्यभिचारः तदर्थं द्रव्यमात्रेति पृतावत्युक्ते मृद्घट इत्यादौ व्यभिचारः। तदर्थमकार्यकारणेति। नच साध्यवैकल्यं। तदेतद्देशाद्युपल
क्षितदेवदत्तस्वरूपपर्यवसायित्वादित्यर्थः। अभेदेविद्यात्मकत्वान्नसुतरामविद्येत्युक्तं तत्र संभवति भेदेप्यविद्यात्मकत्वेनाविद्यासंभ
वसाम्यात् अतः कथं सुतरामिति तत्राह तर्हि ज्ञानेति। अभेदे भिन्नाश्रयविषयाभावादविद्याभाव इत्यर्थः। करणविषयप्रमातृदोष
घसंभवात् लक्षणे प्रयुक्ते कारणादिदोष एवदर्शनीयः नाविद्यादोषाः। तस्य प्रथमदर्शने बाकोहेतुरिति तत्राह तत्रेति। अधिष्ठानप्र
माणदोषस्य भ्रमजनकत्वादविद्याया अधिष्ठानयाथात्म्यं प्रमाणदोषत्वाद्भ्रमजनकत्वं युक्तमित्याशयेनोक्तमधिष्ठानेति प्रथम
दर्शने हेतुमाह दृष्टेति। व्याकारत्वादेरविद्याधीनत्वात्प्रथमं तस्य दर्शितमित्यर्थः। अविद्यात्मकमिति विशेषणं काचादिभावृत्त्य
र्थं आच्छादकस्यैवाधिष्ठानत्वमुपपादयति। प्रकाशाच्छादकत्वेतन्निवर्त्यत्वासंभवादनिवृत्तिरित्याशंक्याशं गेनुकमरणानिवर्त्यंतमा

तत० १२५ द॥ग्रहणेति। प्रमाणाभावात्कथमविद्येत्युक्तानुसंधानवतुरः कश्चिच्छंकते कथमिति। अनुसंधानाकौशलमुक्तमेव स्मार्यतां किमिति प्रमा
णांतरमुपन्यस्तं टीकाकृतेत्यशंक्योक्तं स्मारणे ममानुसंधानपाटवाभावादुक्तं स्मारयंतीति वादिनः खिन्नमतित्वं स्यात् तदर्थं तन्मतिम
नुस्मरयन् प्रमाणांतरं कथयतीत्याह प्रत्यक्षेति। अनृतेन हि प्रत्यगात्मस्वरूपप्रतिपत्तेः प्रतिबंधकमज्ञानमनृतमित्युक्तं तत्र संभवति।
प्रत्यक्प्रतिपत्तिप्रसक्त्यभावेन तत्प्रतिबंधकत्वानायोगात्। कल्पनायामपि प्रतिबंधकांतरमेव कल्प्यतामित्याशंक्य प्रतिबंधकांतरानिरूप
णात्तत्कल्पनमिति तावदाह सुषुप्त इति। सुषुप्तेः सकलविशेषज्ञानोपरमत्वात्तत्र मिथ्याज्ञानं प्रतिबंधकमस्तीत्यर्थः। तृष्यत्वमसंस्कारे
रसत्यपि शुक्तिवोपदर्शनान्न संस्कारस्यापि प्रतिबंधकत्वमित्याह तत्संस्कारस्येति। अग्रहणपक्षेऽपि किमागंतुकग्रहणाभावः प्रतिबंधकः
उत स्वरूपग्रहणाभावः। नाद्य इत्याह कादाचित्केति ग्रहणस्य च स्वरूपत्वेन तदभावानुपपत्तेर्न तस्य प्रतिबंधकत्वमित्यर्थः। प्रतिबंधकाकांक्षा राम० १२५

भावान्न तत्कल्पनमित्युक्तं निरस्यति। स्वरूपचैतन्येति। आच्छादकसद्भावे वाक्यांतरमुदाहरति शतरूपमृतेनेति। अनृतमपिधानमेषां तेन तथोक्ताः।
अग्रहणादिनामप्रतिबंधकत्वेऽप्यन्यत्कर्म प्रतिबंधकमिति शंकां निराकुर्वन्नुपहरति। तत्रश्चेति। कर्मणः प्रतिबंधकत्वे तन्निवृत्त्युपायाभावात्क
दाचिदपि न त्वति भास इत्यर्थः। असत्यवदनमनृतमिति शंकां व्यावर्त्तयति मिथ्येति। अनीशयाशो। चनीत्यनैश्वरत्वात्तावस्यवन्तीयस्या
शोकमाह हेतुत्वप्रतिपत्तेः कथमज्ञानसिद्धिरित्याशंक्याह अनीशयेति। मुह्यमानः सन्नीश्वरभावं न प्रतिपद्यते ततः शोकोपलक्षितं संसा
रमनुवर्त्तत इत्यर्थः। पूर्वतमीश्वरेणाविराधनस्मात्प्रतिपत्त्युपायकुतर्कश्वरस्यासत्वादेव प्रतिपत्तिः न मदपराधादित्याशंक्याह इति। इमाः
प्रजाः प्रजानज्जनितवान् कार्यलिंगेनेश्वरासिद्धेन न तदपलाप इति। परमाणुवदयोग्यत्वादग्रहणमिति शंकां निरस्यसंतरमिति। युष्माकं प्रत्य
गात्मांतरं व्यवधानं च मूर्तदेशादि तिलसणे तदित्याहान्यदिति किं तदंतरं किंचित्तनूक्त समित्यत्राहनीहारेणेति। आच्छादकत्वसाम्यान्नी

गत० हारश्चेत्ताज्ञानेप्रयुक्तः आवृतत्वमाच्छिन्नत्वपरिपूर्णस्वरूपता। अतोविक्षेपविषयादस्याहजत्वमाहेति। मनुष्योब्राह्मणइत्याद्यथासविषया
१२६ इत्यर्थः। असूत्राणानिंद्रियाणितर्प्यपतीत्यसुतृपाः। उक्तपशब्देनकर्मीणाभियानद्वाराकर्मोपलक्षितंतस्मिनशास्त्रेनविधिवाक्यैर्पु
मांसः। तेतथोक्ताः। वर्तनिसंसारंबंकेप्रमंतिसर्थः। ननुअनीहारस्यवावरकत्वंप्रतिभातिनाज्ञानस्येत्यत्राहनिहारमिति। ब्रह्मण आत्म
त्वात्प्रसिद्धनीहारस्याच्छादकत्वानुपपत्तेरज्ञानंनीहारमित्यर्थः। वाक्यांतरमुदाहरति। तथाविद्यायामिति। ऐहिकामुष्मिकपुरुषार्थ
व्यतिरिक्तंब्रह्मसारभ्यंश्रेयोनजानंतीत्यर्थः। आवृतंज्ञानमित्यत्रज्ञानशब्देनस्वरूपज्ञानंगृह्यते। ज्ञानस्यमोक्षसाधनत्वानुपपत्त्याविद्यात्म
कोबंधोस्तीत्युक्तंतदप्यनुपपन्नं। अविद्यायाः प्रसक्तत्वात्। अविद्यास्तीतिवक्तव्यांनबंधोस्तीतितथामोक्षस्यब्रह्मात्मभावलक्षणस्य राम०
नित्यत्वात्ज्ञानसाध्यत्वंचानुपपन्नमित्याशंक्याहार्थापत्तिरपीति। अर्थापत्तिरपिद्रष्टव्येतिपूर्वेणानुषंगः। कासावर्थापत्तिरितिविवक्षायां १२६

माहप्रत्यज्ञानादिरिति। बंधस्यपारमार्थिकत्वेज्ञाननिवर्त्यत्वानुपपत्तेस्तस्याविद्यात्मकत्वमाश्रयणीयंततोविद्याश्रयणीयेत्येतदुच्यतेटीका
यामित्यर्थः। दर्शनविध्यनुपपत्त्याविद्याश्रयणीयेतिपक्षांतरमाहाथवेति। दर्शनोद्देशेनश्रवणादिविधीयमानंनिवर्त्याविद्यामंतरेणानुपपद्य
मानविद्यांगमयति। नचब्रह्मस्वरूपबोधनार्थंश्रवणादिविधीयते। ब्रह्मणःस्वप्रकाशत्वेनान्यनिरपेक्षत्वादित्यर्थः। अज्ञानस्यउक्तप्रमाण
गम्यत्वेतदुपन्यासवैयर्थ्यंप्रमाणागम्यत्वेपसिद्धांतापातः सत्यमेवेत्याशंक्याहान्वेति। अस्मिनग्रंथइत्यर्थः। साक्षिवेद्यत्वान्नापसिद्धांतः
नचप्रमाणोपन्यासवैयर्थ्यं। अभावत्वभ्रमव्यावृत्त्यर्थत्वात् व्यावृत्तिप्रतिपादकप्रमाणादज्ञानसिद्धिः। प्रमाणिकत्वमित्यापिनआरोपितसंस
र्गमिथ्यात्वस्याप्रामाणिकत्वेपिनसंसर्गस्याप्रामाणिकत्वंयथातद्वदित्यर्थः। ब्रह्मणिज्ञत्वताजीवस्यताज्ञानत्वमित्युक्तंवाद्यमनुवदतीत्या
त्याहनन्वेति। एकत्वेनप्रतीतेर्वाज्ञानसंबंधप्रतिपत्तिःकथंतेनेत्यहेतुनाज्ञानंसाध्यंतेटीकायामित्याशंक्यविकल्पपूर्वकंप्रत्याकरोतिविमतेति।

तत्व० १२७

अज्ञानस्याश्रयविषयभेदसापेक्षत्वात्स्वरूपत्वाच्चैतदभावादविद्यासंभव इत्याद्यविकल्पार्थः। प्रकाशस्वभावस्यात्मनः संतमसा
वाश्रयत्ववदात्मनः प्रकाशात्मकस्याविद्याश्रयत्वानुपपत्तिरिति द्वितीयविकल्पार्थः। प्रत्यगैक्यात्। ब्रह्मणो ऽस्वत्वं ततः सर्वज्ञत्वनित्यमुक्तत्वादे
र्विरोध इति तृतीयविकल्पार्थः। आद्यं दूषयति। न तावदिति। अज्ञानं नाश्रयविषयभेदापेक्षं तमस्त्वाद्बाह्यतमोवदित्यर्थः। तर्हि किं क्रिया
यपि तद्वदनपेक्षमिति। पश्यति किंत्विति। विमतं आश्रयातिरिक्तविषयसापेक्षं सविषयत्वात्क्रियाशक्त्यादिवदित्यर्थः। अप्रयोजको हेतु
रित्याह कस्मिन्निति। तर्हि किं थादेरप्याश्रयातिरिक्तविषयापेक्षत्वं न स्यादित्याशंक्य तत्तौवैलक्षण्यमाह क्रियेत्यादिना। बाह्यतमसः स्वो
पादानाश्रितस्यान्यत्रावरकत्वात्साध्यवैकल्यमित्याशंक्याह न हीति। मृत्पिण्डस्य घटस्य भूतलनिष्ठत्ववत्तमसः स्वोपादानाश्रितस्याप
न्याश्रयविषयत्वेन विनुद्ध इत्यर्थः। अस्यास्मिन्नज्ञानमित्याश्रयादिभेदप्रतीत्या विरोधमाशंक्य प्रतीतिमन्यथयति ज्ञानमिति। ज्ञानस्य द्वय

राम० १२७

सापेक्षत्वाच्च स्वप्रतियोगिकाज्ञानस्यापि तत्त्वायेत्यत्व यथा घटत इत्यर्थः। तत्र दृष्टांतमाह यथेति। उपसंहरति। तमोवदिति। अथवा ज्ञानं न
स्वाश्रयावरकं आवरकत्वात् शुक्त्यज्ञानवदित्याशंक्य तमसि व्यभिचारमाह तमोवदिति। शुक्त्यज्ञानस्यापि चिन्मात्रतंत्रस्य तदावरकत्वाभ्युपग
मात्साध्यवैकल्यं वेति विवक्षार्थः। आत्मा न तमस आश्रयः प्रकाशत्वात् संप्रतिपन्नवदित्युक्ते न हि नुद्धत्वमुपाधिः न च साधनव्यापकतेत्या
ह नापीति। यत्र प्रकाशत्वं तत्र न हि नुद्धत्वमिति न व्याप्तिः संवेदने व्यभिचारादित्याह स्वावभासकेनेति। आत्माज्ञानविरोधी तद्भासका
न्यत्वे सति चित्त्वात् निवर्तक संविद्वदित्याशंक्यासिद्धिमाह साक्षीति। साधनव्यापकत्वनिरसनमुपसंहरन्नत इति विरोध। प्रयोजकम
पि दुर्निरूपमित्याह। किंचेति। किं भासमानत्वं प्रयोजकं उत भानमात्रं आहो स्वयंभासमानत्वमिति विकल्प्याद्यं प्रत्याह ज्ञान्येति। मुख्यमह
मस्वाप्तमिति यत्रामर्शानुपपत्त्या सुषुप्तावप्यात्मनोऽवभासमानत्वमाश्रयणीयमन्यथा परामर्शानुपपत्तेः। तत्रैव स्वयंभासमानत्वाना

तत्व० श्रयणादन्यतोभासमानत्वमाश्रयणीयंतच्चअनभासमानस्याज्ञानसंबंधविरोधइत्यर्थः।अथवाऽनन्यज्ञानेनभासमानस्याथज्ञानाश्रयं
१२८ त्वंकिंपुनर्नित्यचैतन्यविषयस्येत्याशयेनोक्तं।तन्यज्ञानेनेतिकुतस्तदितिशंकायामाहावस्थेति।अहंममाभिमानरूजतादिभ्रमाणामुत्प
त्तेःप्राक्हेतुत्वेनतत्समयेस्थितिहेतुत्वेनानंतरंभ्रमाजरहेतुत्वेनेतिकालत्रयेपिस्वपरविषयज्ञानाश्रयत्वमेष्टव्यमित्यर्थः।द्वितीयंदूषयतिनवे
ति।स्वज्ञानइति।आत्मज्ञानविषयज्ञानइत्यर्थः।तृतीयंप्राहनचेति।स्वप्रकाशस्याज्ञानसंसर्गविरोधस्यापरिहृतत्वादित्यर्थः।कथमदर्शन
मितिचेत्तत्रकिमनात्मनिव्याप्तिदर्शनमुतसंवेदनइतिविकल्पाद्येव्यभिचारमाहविषयाणामिति।द्वितीयेपिसंवेदनंनकिंवृत्तिरूपंउत
स्वरूपज्ञानंआद्येव्याप्यभावःवृत्तेःस्वप्रकाशत्वान्नद्वितीयः।संदिग्धसाध्यतयातस्यपक्षत्वान्नव्याप्तिस्खलनेत्याहसंवेदनस्येति।तृती राम०
यमुत्थापयत्यथेति।पूर्वाभिसंधिरुत्तरमाहनजीवेति।अभिसंधानमजानानउक्तंबोध्यंस्मारयति।नन्विति।ऐक्यमात्रमंगीकरोतिसत्य १२८

मितिऐक्यस्यप्रमाणिकत्वेब्रह्मणोप्यज्ञत्वंनत्याहसत्यपीतिबिंबप्रतिबिंबयोरैक्येप्युपाधिभेदात्।श्यामत्वादिमत्वस्यावव्यवस्थेत्यर्थः।कल्प
नयनिराकरणमुपसंहरति।तस्मादिति।नकेवलमैक्यस्यविरोधित्वाभावः।कलुंनदुपपादकत्वमपीत्याहकिंतिति।ऐक्यस्याज्ञानंविनानुपप
त्वभावात्कथंतदुपपादकत्वमित्याशंक्यऐक्यइत्यादिना।ऐक्येसत्येवानवभासदर्शनादविद्याकल्पनइत्यन्वयः।ऐक्येपितस्यनाज्ञत्वेनान
वभासःसंभवत्वविद्यांविनापीत्यत्राहस्वयंप्रकाशत्वइति।अहमित्युपलब्धाकाराद्ब्रह्मणोव्यतिरेकाभावात्तदनवभासोसिद्धइत्याशंक्यांस
र्वसर्वज्ञस्यनवेद्मिन्नानंदात्मकब्रह्मानवभासार्थमविद्याअपर्णीयेत्याहसर्वज्ञत्वइति।अन्यथोपपत्तिंपरिहरतिअन्यथेतिअछादकाभावेन
वभासासिद्ध्यर्थंतयोर्भेदउपपन्नइत्याहभेदेति।श्रुतिविरोधाद्भेदानुपपत्तिरेवेत्तद्यात्मनोजाड्यमाश्रयाणीत्यभिसाह।जाड्यइति।स्वयंज्योति
रूपवचनविरोधाज्जाड्यासंभवश्चेत्।तर्हिनसर्वज्ञत्वादिलक्षणब्रह्मेत्याहकिंचिज्ज्ञइति।एवंसत्यग्रहणमेवाविद्यास्यादित्याहग्रहणेति।ततः।

तत्व० किमित्यत आह ततश्चेति । अविद्यावच्छिन्नजीवनिर्भासास्पदं ब्रह्मेति कथमुपसंह्रियते तस्याप्रसक्तत्वादित्याशंक्य तद्भावस्याशंकामाह तन्
४ १२९ न्विति । जीवब्रह्मत्वविभागनिरूपणमकाण्डताण्डवितमित्यत्राह यत इति तत्र मतांतरारोपयन्न्यस्यंतःकरणेति । भेदाभेदव्यवहारसंपाद
नपटियाऽस्य मे विशेषो तिरेकः का अनिकांशांगशिभावव्यावर्त्तनार्थं स्वभावादिति विशेषणं । अविद्यावच्छिन्नतया अनुपपादनात्कथ
मुपसंहरणमित्यत्राहात्मावरणेति । पूर्णात्मावरकत्वात्तदज्ञानमेवाध्यासोपादानत्वयोग्यं यस्मादतस्तदेवावच्छेदोपादानमिति युक्तमुप
संहरणमित्यर्थः । जनकत्वमात्रं निमित्तशब्दार्थः । अवच्छेदस्यासत्यत्वे तदुपादानत्वं तदेव कुतस्त्यमित्याशंक्याहावच्छेदस्येति । प्रातिभा
सिकत्वे हेतुगर्भविशेषणं । अध्यस्यत इत्यध्यासः विमतमारोपितं दृश्यत्वाच्छुक्तिरूप्यवत् । ततो ज्ञानाध्यनिमित्तत्वमित्यर्थः । अप्रयोजकत्वं
निरस्यति सत्यत्व इति । सावयवदार्वादिविदारणदर्शनान्निरवयवे ब्रह्मणि वस्तुतो विदारणासंभवो बाध इत्यर्थः । अंतःकरणस्यागंतुकत्वात् राम० १२९

वच्छेदकत्वं किं त्वज्ञानस्येति भक्तियादयितुमनादिसिद्धत्वमुक्तं तत्र हेतुमाह वार्तेति । न केवलं कर्तृत्वादेरनादित्वात्तदुपादानानादित्वं किंतु
विभागानादित्वादपीत्याह । नादिति । किं वांतःकरणमवच्छेदकमिति वदन्प्रष्टव्यः किं तद्दृस्तवावच्छेदकस्य हेतुरुत तत्कालं निकस्येति तत्राद्यं
प्रत्याह नन्विति । अद्वैतश्रुतिविरोधान्न परमार्थतो विदारणमित्यर्थः । कथं तर्हि प्रतिभासत इत्याशंक्याहावच्छेदस्येति । द्वितीयं दूषयत्यज्ञा
नस्येति किं च किमंतःकरणमपि तात्त्विका उतातात्त्विकमिति विकल्पाद्यं दूषयत्यंतःकरणस्येति । षोडशकलाः पुरुषयाणाः पुरुषं
प्राप्यास्तं यांति भिद्यते हृदयग्रंथिरित्यादिवाक्यादंतःकरणस्य ज्ञाननिरस्यता वसीयते ज्ञाननिरस्यत्वं वाध्यत्वं विनानेति न तात्त्विकत्व
मित्यर्थः । चरमं निरस्यति स्वकारणेति । अंतःकरणस्यावच्छेदत्वमिच्छताज्ञानस्याप्यवच्छेदकत्वमेष्टव्यं एव अंतःकरणस्यारोपितत्वे
नाज्ञानात्मकत्वादतत उभयोरवच्छेदकत्वकल्पनायां गौरवापातादज्ञानमेवावच्छेदकमित्यर्थः । तस्मान्नो कुत इत्यादि श्रुत्यांतःकरण

तत्व० १३० स्यब्रह्मजत्वात्सत्वं लक्ष्यतां अतं सत्यमेवावच्छेदकमित्याशंक्य कूटस्थत्वेन साक्षात्कारणत्वासंभवात्तद्रूपेण विवर्त्तमानाविद्याविशि
ष्टानत्वं कारणत्वमिति न सत्यत्वमंतःकरणस्येत्येतदंगीकृत्य परिहरति। सत्यत्वेपीति। अवच्छेदकं तंतःकरणस्यास्यानादित्वावच्छेदकत्वं यु
क्तमित्याशंक्य किं तत्सुषुप्तिप्रलयादावस्ति उत नेति विकल्प्य परमं निरस्यति सुषुप्त्यादाविति घटत्वगतदुपहितगगनस्य महागगनात्म
कत्ववदवच्छेदकविलये जीवस्य ब्रह्मतास्यादित्यर्थः। आद्यमुत्थापयति न द्वापीति। किं निरवयवत्वापत्तिः सूक्ष्मता। आहोवयवापाय
मात्र उत कारणात्मनावस्थानं किंवा कार्यसंसंस्कारसहितशक्तिमत्कारणावस्थानमिति विकल्प्याद्यं प्रत्याह। न तावदिति। तत्रोपग
मेपरायगमवदवयवाभावेवमध्यंतःकरणमपि न स्यादित्यर्थः। द्वितीयमनूद्य दूषयत्यन्यथावयवेत्यादिना। आरंभकावयवध्वंसेप्यव
यविनो वस्थानेनत्स्यन्तत्कार्यत्वं हीयेतेत्यर्थः। तृतीयमुत्थापयति कारणात्मनेति। असंताभेदमाश्रित्याद्यः कल्पः द्वितीयस्तु भेदाभेद राम० १३०

मनुसृत्येति रहस्यं। चतुर्थः पक्षः परिशिष्यत इत्याह तस्मादिति। अस्त्वेवं ततः किमिति चेन्नत्र वृत्त्यं किं कारणशब्देनं परमार्थवस्त्वपे
क्षितं। उत ज्ञानं। आद्ये न कदाचिन्मोक्षः परमार्थस्य निवृत्त्यसंभवात् द्वितीये त्वज्ञानात्मविवेकेनाज्ञानमवच्छेदकं स्यादित्यभिसंधा
यो संहरस्तत इति। अतिरेकपक्षेपि वक्तव्यं। किमतिरेकः पारमार्थिकभेदं संपादयति उत अपारमार्थिकमिति। नाद्यः श्रुतिस्मृतिन्या
यविरोधादित्यभिप्रेत्य द्वितीये रज्ज्वारोपितसर्पादिहेतुत्वेन क्लृप्तानाद्यविद्याया एव विभागहेतुत्वसंभवे प्रसिद्धमतिरेकं किं कल्पय
सीत्याह क्लृप्तेति। अविद्यायाश्चावच्छेदकत्वानुपपत्तेरतिरेकः कल्प्यत इति शंकते जीवस्येति पूर्वमित्यन्न संबंधादित्यध्याहारः। अवि
द्याया विभागोपजीवित्वेनोपजीव्यत्वानुपपत्तेर्विभागस्याविद्याधीनत्वमनुपपन्नमित्यर्थः। उपजीव्यस्योपजीवकत्वानुपपत्तिरितिरे
केपि तुल्येत्याह जनकस्येति। उपजीव्यस्याप्युपजीवीनां भिन्नकत्वं दृष्टमिति चोदयति। यद्यपीति। भेदे नोपपद्यत इति। भेदनिर्वाहक

तत्त्व० १३१ त्वेनसंबध्यतइत्यर्थः।धर्मिप्रतियोगिभावेनभिन्नवस्तुनिष्ठः किंतुवस्तुमात्रनिष्ठइत्याशंक्याह कस्येति।कस्यकस्माद्भेदइतिवीक्षयांघट
स्यपटादित्यपुनरुक्तशब्दद्वयस्मृतिरिंनुतयातयोरभेदप्रतिपत्तेरधीनत्वंधर्म्यादिभावस्य अन्यथास्वस्मादपिस्वस्यभेदस्यादित्यर्थः
दार्ष्टांतिकमाहैवमिति।तुल्यमुत्तरमित्याहाविद्यायामिति।वस्तुतश्चिन्मात्रमाश्रयतेतदेवविषयीकरोतीति।नविभागापेक्षत्वंभविद्या
यादित्यर्थः।अंशांशिभावेनभेदइतिपक्षांतिरस्यतिनिरंशत्वादितिनचैत्वसिद्धिः।निष्कलंनिष्क्रियंशांतमित्यादिकश्रुतेःसांशत्वे
तित्यत्वापातइत्यादियुक्तेश्चप्रसिद्धत्वादित्यर्थः।भेदकांतरनिरसनफलमाहनस्यादितिभेदकांतरवदविद्याया अपिभेदकत्वंयुक्तमि
त्याहनत्विति।किंसंबंधिन्यविद्याभेदिकाउतासंबंधिनीआद्येपिकिंजीवसंबंधिनीउतब्रह्मसंबंधिनी।नाद्यःअविद्यासिद्ध्युत्तरकालत्वा राम० १३१
जीवभावस्यानापिद्वितीयःसर्वज्ञत्वादिगुणकब्रह्मणोप्यविद्याधीनत्वात्स्वातंत्र्यंनुनोपपद्यते।तस्मादविद्याभेदिकेत्यप्ययुक्तमित्याशयःबिं

MEMORIAL

म्बमात्रंतत्राविद्येतिवक्तुंप्रतिबंदीमाहनन्विति।दर्पणादेर्बिंबसंबंधित्वेनप्रतिबिंबसंबंधित्वेनचभेदकत्वेनसंभवतिविभागोत्तरकालीनत्वा
द्बिंबादेरित्यर्थः।मुखमात्रमाश्रित्यदर्पणादिबिंबादिविभागजनयतीतिचोदयतिमुखेति।तुल्यमेतदित्याहेहापीति।जीवपक्षपातित्वा
द्विभ्रांत्वंतंत्रत्वमयुक्तमित्याहकथंपुनरिति।पक्षपातित्वमन्यथापिघटतइत्याहादर्पणेति।दर्पणादेःप्रतिबिंबादौस्वगतधर्मसंसर्गजन
कत्वंपक्षपातित्वमित्यर्थः प्रकारांतरेणचिन्मात्रंसंबंधित्वमाक्षिपतिनन्विति।कूटस्थासंगाद्वयबोधरूपत्वात्चितोविद्याश्रयत्वमयुक्त
मित्यभिसंधिः।चिन्मात्राश्रयत्वानुपपत्त्याविशिष्टाश्रयात्वंमनुष्येअंशोवित्युपपत्तिमात्रं।किंवास्वांतंत्र्यांउतनस्याअसत्वमितिविक
ल्प्याद्यंप्रत्याहनतावदिति।प्रमाणाभावःकथमितिचेत्तत्रवक्तव्यं।किंप्रत्यक्षंप्रमाणमुतानुपपत्तिरितिविकल्प्याद्यमनुवदतिनन्विति।
किंप्रतिभासमात्रंप्रमाणउतयुक्तिसहकृतानुभवइतिविकल्प्याद्यंदूषयतिनाहमिति।अहमनुभवामीत्यत्रप्रतिपत्तेरित्यध्याहारःद्रष्टाप

त्तिशंकांनिरस्यतिचैतन्येति।अनुभवस्यचित्प्रकाशत्वाद्विशिष्टस्यचतद्विपरीतत्वादाधारादिभावोनयुज्यतइत्यर्थः।अनुभवमिति
प्रत्यभास्यान्यथासिद्धिंशंकतेननुपन्नेति।दग्धृत्वस्यदहनधर्मत्वस्यान्यत्रदृष्टत्वात्तत्संपृक्तायःपिंडेदग्धृत्वव्यपदेशः।तद्वदनुभवधार्य
त्वसंबंधादंतःकरणेनुभवितृत्वप्रथेत्यर्थः।मुख्यार्थबाधकाभावान्मैवमित्याशंक्याहनांतःकरणस्येति।अंतःकरणस्यानुभववेद्य
त्वान्नवादाधारत्वमित्यर्थः।तुल्यमुत्तरमित्याहैवमितिबाधकसद्भावादनुभवामीतिप्रत्ययस्यान्यथासिद्धिःनतथात्रेत्याशंक्याहनांतः
करणस्येति।तत्रहेतुमाहप्रतीतेरिति।अंतःकरणस्याज्ञानकार्य्यत्वान्नतदाश्रयत्वकल्पना।नचप्रतीत्यनुपपत्तिःतस्याअन्यथासि
द्धत्वादित्यर्थः।युक्तिसहितानुभवस्यसाधकत्वमितिविकल्पंनिरस्यत्यात्मनीति।नकिंचिद्वेदिषमितिपरामर्शानुपपत्त्यापुनरुक्ता
नानुपपत्त्यावसुषुप्तादावविद्यासंबंधोधिगम्यते।मनस्यादंत।करणाश्रयत्वेतस्यविलीनत्वादितियुक्तिःशून्योपपत्तइत्यर्थःअर्थापत्तिः

प्रमाणमितिपक्षमुखापपत्तिअर्थेतिविशिष्टंकिंविशेषणविशेष्याभ्यामन्यतउतानन्यत।तत्रोपस्यप्रामाणिकत्वमभिप्रेत्यद्वि
तीयंप्रत्याहनविशिष्टइतिदंडदेवदत्तसंबंधेषुविशिष्टशब्दप्रयोगाभावात्तदर्थान्तरमित्याशंक्याहजडस्यचेति।यस्याज्ञानंभ्रमस्तस्य
ध्वांतःसम्यक्त्वंवेत्तिसइतिन्यायादज्ञानभ्रमसम्यग्ज्ञानानामेकाश्रयत्वंःततश्चतस्याज्ञानाश्रयत्वेसम्यग्ज्ञानाश्रयतयामोक्षान्वयित्वं
वक्तव्यं।नचजडस्यकार्यस्यतत्संभवतीत्यर्थः।जडाश्रयत्ववच्चिदाश्रयत्वमप्यनुपपन्नमितिचोदयतिननुस्वरूपइतिकिंचिन्मात्रेनुपप
त्तिमात्रमुद्भाव्यते।उतविशिष्टाश्रयत्वंसाध्यतेतत्राद्यमंगीकरोति।सत्यमिति।द्वितीयंदूषयतिअनुपपन्नेतिविशिष्टाश्रयत्वेश्रय
त्वकल्पंअस्मत्मतेत्वेकाअनुपपन्नोभयाश्रयत्वमितिलाघवादनुपपन्नमपिचिदाश्रयत्वमाश्रयणीयमित्यर्थः।एतेनचित्यनुपपत्तिमा
त्रमितिकल्पोपिनिरस्तइतिद्रष्टव्यं।विशिष्टाश्रयत्वेदूषणांतरमाहमैवमिति।अज्ञानभ्रांतिमुक्तीनामेकाश्रयत्वअन्यथान्योबद्धो

तत्व० १३२ न्योमुच्यतइतिवैरूप्यप्रसंगः ततउवति। शिवस्यमुक्तावनन्वयात्चिन्मात्रस्यचसर्वत्रानुगमात्तत्रस्यैवाज्ञत्वमित्यर्थः। विधांतरेणज
डाश्रयत्वंनिराकर्तुंपरमेतमनुवदत्यन्तःकरणंविदितिकिमग्रहणादेरप्यंतःकरणाश्रयत्वंउक्तानादिभावरूपाज्ञानस्यैवतत्राश्रयोपादंवि
चार्यमित्याहसचकल्प्यइति। सर्वज्ञत्वस्यानुभवविरुद्धत्वात्किंचिज्ज्ञत्वमाश्रयणीयं। तदावत्वन्मतविहतिरित्याहकिं। विरुद्धत्वइति। द्वि
तीयमुधापपत्तस्येति। किंभावरूपाज्ञानस्यज्ञानादन्यत्वेनाज्ञानत्वंउततद्विरोधित्वेनेतिविकल्पयतिकिंतदिति। आद्यमनूद्यदूषय
तिज्ञानादिति। नविवादइत्सनात्माश्रयत्वइतियावत्। द्वितीयमुधापपतित्यर्थेति। किमंतःकरणगतंज्ञानंतद्विरोधितआत्मगंतेना
धनःतस्यजडत्वेनज्ञातृत्वानुपपत्तेः। नद्वितीयोपिकिंतदेकविषयंउतभिन्नविषयंनोभयमपीत्याहनभिन्नेति। चैत्रमैत्राश्रितयोर्घ
टविषयज्ञानाज्ञानयोर्निवर्त्यनिवर्तकत्वानुपलब्धेस्तथाभिन्नविषययोरपितदेतदभिप्रेत्योक्तमपीति। करणगताज्ञानस्यकर्तृ राम० १३३

गतज्ञाननिवर्त्यत्वात्रातिप्रसंगइतिचोदयति। करणाश्रयमितिकिंयस्ययत्करणंतदाश्रितज्ञानेनतत्करणगतस्याज्ञानस्यनिवृत्तिः
किंवाकरणांतरगतस्यनोतयथापीत्याहनप्रमाणेति। करणांतरगताज्ञाननिवृत्तौदूषणांतरमाह। पुरुषांतरेतिअंतःकरणलयःक
र्मनिमित्तलयत्वात्संमत्तलयवदितिसुखधमानबोधेनपुरुषांतरगतेनसुषुप्तिकरणगताज्ञाननिरासोनोपलभ्यते। अन्यथातस्योत्थि
तस्यतत्परामर्शानुपपत्तिप्रसंगइत्यर्थः। अज्ञानस्यज्ञाननिवर्त्यत्वंतावत्प्रसिद्धं। तत्रचकरणगतत्वेप्रामाणिकेतदज्ञाननिवृत्तिः
सेत्स्यतीत्यभिसंधायाहभ्रांतीति। दोषत्वमुपपादयितुंभ्रांतीतिविशेषणं। अज्ञानंकरणाश्रयं। विषयप्रमातृदोषातिरिक्तत्वेसति
दोषत्वात्। काचादिवदित्यर्थः। अतिप्रसंगत्वस्यबाधकतर्कपराहतत्वान्नायंहेतुःसाधुरित्याहानवस्थादादोषितिविमतंनयनाश्र
यंदोषत्वात्काचवदित्यतिप्रसंगः। प्रलयसमयेप्यज्ञानस्यसद्भावात्तेषांचाभावान्नतदाश्रयत्वमितिचोदयतिसादित्वादिति। २

अंतःकरणस्यापिप्रलयादावनुपरमात्तदज्ञानाश्रयत्वमित्याहांतःकरणइतिअंतःकरणस्याव्यक्तात्मनासत्ताधयत्वंयुक्तमितिशं
कितेसत्कार्यतानुत्पन्नमेतदशापीत्याह।चक्षुरादावितिायुक्तिपर्यालोचनयाजडस्याज्ञानाश्रयत्वंनिरस्यश्रुतिपर्यालोचनयापितन्निरस्
स्यति।अनृतेनेति।शब्देशैत्यस्यनांतःकरणेसत्वेनानुषंगः स्वांताश्रयत्वएवशब्दस्यप्रामाण्यंकिंनस्यादित्याशंक्याहप्रागसज्ञानाना
मितिसुषुप्त्यादौब्रह्मप्रकाशानांतद्बाधाभावःकस्मादितिशंकया।मावरणसद्भावादितिश्रुत्योन्यतोनचतत्त्वोपपद्यतेजडेऽज्ञानप्रस
क्त्यभावादित्यर्थः।अज्ञानंस्वतंत्रमितिकल्पमुद्धापयतिकिंत्विति।स्वांतेप्रसत्तास्फूर्त्तेरसंभवाद्विसध्यस्तत्वमेवम्यमित्याहचेत
न्येति।अज्ञानसत्वपक्षंप्रतिक्षिपतीत्यालमितिविस्तरेणेतिभेदाभेदादिनाजालोभिनूपणात्तस्यानुपपत्तेरहमज्ञइतिव्यवहारा
नुपपत्तेश्चाज्ञानमास्थेयमित्यर्थः।अंतःकरणादीनांभेदकत्वानुपपत्तिन्यायःन्यायस्यस्वांतंप्रेणबाधत्वासंभवादनुग्राह्यमा

नमाहश्रुतिरितिस्वयंज्योतिष्ट्वविद्याप्रामुत्यादित्वादाक्षेपानुपपत्तिरित्याशंक्याहस्वयंप्रकाशस्येति।ब्रह्मानात्मानविषयः।
भासमानत्वात्प्रभासामानघटवदितिप्रयुक्तेदृष्टांतस्यसाध्यवैकल्यंशंकतेनन्विति।व्यावर्त्तकंविशेषणमितिपावत्।ज्ञानस्याज्ञानव्या
वर्त्तकत्वासंभवादनधिगतस्यव्यावर्त्तकत्वंततश्चनसाध्यवैकल्यमित्याहपूर्ववादिनमुत्तरेणेति।विशेषस्याप्यनधिगतोतंनजानामी
तिव्यपदेशानुपपत्तेरधिगतस्यव्यावर्त्तकत्वंततश्चसाध्यवैकल्यमित्याहसिद्धांतीनानवभासमानस्येति।अवभासमानस्याज्ञान
व्यावर्त्तकत्वंव्याहतमित्याहनन्ववभासमानस्येति।अवभासमानस्याज्ञानविषयत्वंकिंयुक्तसहमित्युच्यते।किंवातत्संतिरुभाव
इतिविकल्पाद्यंमंगीकरोतिनाज्ञानेनेति।अलंकारत्वेहेतुःप्रतिभासमात्रेति।द्वितीयंदूषयतिप्रतिभासास्तीति।ग्रंथांतरत्वसूच
काभावादेकग्रंथ्यशंकांपरिहरतिनिरंशस्येति।आनात्मनःसामान्यविशेषवत्त्वात्तत्रधीनामानेनतथात्रस्वयंज्योतिषीतिसमाधे

तत्व० र्थः। भासमानस्यानवभासमानत्वं नेति वक्तुमशक्यं भासमानेऽप्यात्मनि देहादिव्यावृत्तेरनुपलंभेन तत्र व्यभिचारादित्युक्तं तदसंगतं
१२५ यत्र भासते तेन तत्र विभासमानत्वं यद्वा सतेन तत्रानधिगतत्वमिति कथं व्यभिचार इत्याशंक्य व्यभिचारं दर्शयितुमपरोक्षलक्षणमाह
संविदिति। अपि त्विति स्वरूपे भेदमाश्रित्योक्तं धर्मे तु भेदमाश्रित्याह तत्तंत्र इति। भेदस्य धर्मित्वे धर्मिज्ञानमात्रेण कथमपरोक्षत्व
मित्याशंक्याहैवेति। धर्म्यादावपरोक्षेऽपि भेदाप्रतीत्यदर्शनाच्च तस्याप्यपरोक्षत्वमित्यर्थः। आत्मनि प्रतीयमाने व्यावृत्तेरनुपलंभात्र व्यभि
चार इत्युक्तं तन्नोपपद्यते भेदज्ञानसामग्र्यभावात् तृतीयज्ञानस्य च भेदग्राहित्वादित्यत्राह पादार्थेति। तृतीयज्ञानास्याभेदग्रहणानां
वेऽप्यसंकीर्णतया धर्म्यादिबोधाभावाद्देहबोधो न स्यादित्यर्थः। फलितमाह अत इति। एकत्वाज्ञानादेरनवभास इत्युक्तं तदनुपपन्नं
भेदग्राहकसद्भावात्तद्ग्रहणस्याप्युपपत्तेरित्याशंक्य देहव्यतिरिक्तात्मवादिनां देहात्मसंसर्गात्मबुद्धेरध्यासत्वं गौणत्वं वाश्रीयते। राम० १२५

अध्यासस्य भेदाग्रहव्याप्तत्वात् तद्ग्राहकाभावस्तथाप्याश्रयणीय इत्याह संसर्गेति निमित्तं। ज्ञापकमिति यावत्। तत्र हेतुमाहेति
सर्वत्रेति। ननु गौणोऽयमित्यत्र देहात्मबुद्धेर्गौणत्वपक्षोऽनूदितः। स नोपपद्यते गौणत्वव्यापकभेदग्रहाभावादित्याशंक्याह पदार्थेति।
व्यतिरेके प्रमाणाभावान्न तत्सिद्धिरित्युक्तं नन्वहमित्यादिना तन्नोपपद्यते प्रत्यक्षत्वानुपपत्तेरित्यादित्याशंक्य गौणत्वमुपपादयितुं तदि
त्याहाहेति। अयो दहतीति दग्धृत्वस्य तत्रेक्षततया प्रतिभासेऽपि दग्धृत्वस्याग्नेर्धर्मत्वं यथा तद्वदित्याशंक्य किं प्रत्यक्षाद्व्यतिरेकसिद्धिः
उतागमादथवानुमानात्। नाद्योऽनुपलंभादित्याशयेनोक्तं अन्यस्येति। संप्रति द्वितीयतृतीयावुपपादयति। ननु प्रत्यक्षेणेति। तयोरप्र
माणत्वान्न तत्साधकत्वमित्यादनेत्याहेति। प्रत्यक्षस्य मिथ्यात्वात्तद्बाधकत्वमित्युक्तमयुक्तं मिथ्यात्वस्यैवासिद्धेः। न चागमानुमान
विरोधान्मिथ्यात्वमिति वाच्यं प्रत्यक्षस्य ज्येष्ठ्येन तद्बाध्यत्वासंभवादित्याशंक्याह ननु मिथ्यात्वादिति। ज्येष्ठस्य बाध्यत्वे दृष्टांतमा

तत्व०
१३६

इद्विचंद्रेति।कुतस्तर्हीत्यादावनुमानादेर्बाधकत्वंनिरस्तंनत्रसंभवति।एकश्चंद्रोनायंसर्पइत्यादावनुमानादेर्बाधकत्वदर्शनादित्या
शंक्यवैधर्म्यमाह यत्रेति।प्रत्यक्षावभासमिति।प्रत्यक्षवदवभासतइतिप्रत्यक्षावभासंद्विचंद्रादीत्यर्थः।कुतइत्यादेरेषोर्थः।प्रत्य
क्षस्यमिथ्यात्वंनसंभवतिबाधकाभावात्नचागमादेर्बाधकत्व+सर्पादिभ्रमनिवर्त्तनेनबाधकप्रत्यक्षोत्पादात्तत्रतथात्वंअत्रयुक्ति
तोबाध्यबाधकतानिश्चितत्र्यानचनिश्चेतुंशक्यतेपरस्पराश्रयत्वापातादित्यर्थः।मितरेतराश्रयप्रसंगेकेरित्याशयेनोक्तं।कुतइति।
तत्रयूथाश्रुतमादायाहसिद्धांतीआगमादिति।अन्यथावगमादितिभिन्नतयावगमादित्यर्थः।देहःस्वातिरिक्तद्रष्टृको
दृश्यत्वात्घटवदित्याद्यनुमान।अशब्दमस्पर्शमरूपमव्ययंनजायतेनम्रियतेवेत्यादिरागमः।स्वाशयमाविष्करोतिमैवमिति। राम०
तथासतिस्यादित्यर्थः।देहव्यतिरेकेणचेन्मानंतर्ह्यव्यतिरेकएवास्त्वितितत्राहतस्मादिति।तत्रहेतुमाहात्मवादिभिरिति।देहा १३६

त्मवादेनास्तिकतापातात्पुरुषार्थिभिरनतिरिक्तआत्माश्रयणीयइत्यर्थः।अहंप्रत्ययस्यात्मव्यतिरिक्तविषयत्वेअहंमनुष्यइतिइतिप्रत्य
यःकथमितिचेत्।तत्रवक्तव्यंकिमस्यप्रत्ययस्यगतिःपृच्छ्यते।अथवातिरिक्तविषयताभावइतितत्रद्वितीयोसंगतइत्याहान्यथेति।अ
हंप्रत्ययस्यदेहतादात्म्यविषयत्वेआत्मसाधकाभावात्तदसिद्धिरित्यर्थः।आद्यंदूषयतिअतइति।अहंप्रत्ययस्यव्यतिरिक्तत्राहि
त्वमनःशब्दार्थः।अहंप्रत्ययस्यव्यतिरिक्तत्वाहिकेकथंभेदानध्यवसायादित्सविवानेटीकाकृदित्याशंक्यविकल्पोत्तरत्वेनव्याचष्टेकि
मर्थेतइत्यादिना।भेदविशेषिताहंप्रत्ययस्याध्यासविरोधित्वेविशेषणीभूतभेदस्यापिविरोधित्वात्कथमध्यासइत्यत्राहव्यतिरेकेति।
विशिष्टस्यविरोधित्वेविशेषणस्यापिविरोधित्वमुक्तंतत्राहनन्विति।स्रग्सर्पयोर्व्यावृत्तावप्ययंसर्पइत्यध्यासदर्शनान्नभेदमात्रस्य
विरोधित्वमित्यर्थः।अध्यासमापकाभावात्राहंकारलक्षणाधर्मिण्यात्मन्यारोपइतिचोदयति।नन्वितिविशेषरूपेणेतिचित्त्वेनेत्यर्थः।चित्
प्रतिभातिपरंनत्वहंकारव्यावृत्तात्मधर्मतयाततःप्रतीयमानेपिसंभवत्यध्यासइत्याहतत्राहेतिद्वितीयमनुवदत्यथेति।एकमंध्यशंकांति

तत्व०
१३७

रस्यतिपरिहरतीति। किं सर्वदाहंप्रत्ययस्य विविक्तत्वाहितत्वं उत जिज्ञासोत्तरकाले। आद्ये बहुत्वालोकमध्यस्थहरूपादौ विप्रतिपत्त्यभावव
दात्मनोपि मोवृत्ततयाप्रतिभासोत्वविप्रतिपत्तिः स्यात्तत्रश्च जिज्ञासासंभव इतिटीकार्थः। जिज्ञासोत्तरकाले गौणत्वे प्राग्गौणत्वप्रसंग इ
त्याशंक्याह यौक्तिकेति। तत्सामान्यादिति। अहंमनुष्य इति प्रत्ययत्वसामान्यादित्यर्थः। उत्तरकाले गौणत्वव्यवहारेण प्रागिति विशेषः। क
थमित्यादेरयमर्थः। जिज्ञासायामपि न गौणत्वं युक्तं तस्य ज्ञानस्याप्रमाणत्वादहंप्रत्ययस्य चात्ममात्रविषयत्वादिति शंकते कथमिति
जिज्ञासायां अहंप्रत्ययविषयविवेकत्वात्र ह्रिरोधाद्देहात्मबुद्धेर्गौणत्वमिति वक्तुं जिज्ञासास्वरूपमाह इति ज्ञासेति। युक्तेरप्रमाणत
मुक्तमंगीकरोति नहीति। तर्हि विपर्यय इत्यत्राह। किंत्विति। ननु युक्तरत्वत्र भेदं वो भेपि न गौणत्वमित्युक्तं तदयुक्तं। ज्ञानभेदयोरभेदा
भिमानस्य गौणत्वदर्शनादित्याशंक्याह विचारेणेति। अहंप्रत्ययस्य व्यतिरिक्तविषयत्वे। अहव्यंतिरिक्त इत्युक्तेः पौनरुक्त्यप्रसंगान्नेत
दित्यर्थः। तर्ह्यभेदविषयत्वमिति शंकते किंत्विति। अभेदविषयत्वं विप्रतिपत्त्यभावापातात्स्वरूपमात्रविषयत्वमित्याह सर्वदेति। तर्हि व्य

राम०
१३८

तिरेकाभावः प्राप्तः तत्राह यौक्तिकेति। तर्ह्यहंमनुष्य इत्यस्य गौणत्वं तत्राह भ्रान्त इति। युक्त्यायोयदानुसंधीयते तदा पित्तकेज्ञानस्य परोक्षत्वात्
परोक्षभ्रमविरोधित्वमित्यध्यासत्वं युक्तमित्यर्थः। कथमनुभव इत्येकत्रैव पक्षशंकां निरस्यति तत्रापीत्यादिना। टीकाक्षराणामेषोर्थः। द्रष्टा
कार इत्यस्य प्रधानगौणत्वं तद्वदहंमनुष्य इत्यस्यापीत्युक्ते दृष्टान्तासंगतिमाशंक्य लेनन्विति। इदं रजतवदकारस्य द्रष्टत्वतयानुभूयमान
त्वादध्यासत्वमित्याह अनुभव इति अध्यासत्वं गमयतीति विशेषः। यौक्तिकज्ञानेनाकारस्य द्रष्टत्वाद्यावृत्त्यभ्युपगमे अध्यासानुभव इति
कथमुक्तं न वा काराद्द्रष्टत्वस्य व्यावृत्तिप्रतीत्यभावादध्यासानुभव इत्यापि शंक्याः। अकारस्य द्रष्टत्वाद्यावृत्तिप्रतीतौ तस्यादितरस्यापि व्या
वृत्तिप्रतीतिसंभवान्न इत्यत्राह आकारस्येति। इदमः समारोपितरूप्याद्व्यावृत्तावपि न तस्मात्तस्य व्यावृत्तिर्यथा तद्वदत्रापीत्यर्थः। एकस्य
पृथक्त्वमात्रेण कथमितरस्य पृथक्त्वमुक्तं टीकायां न खलु चैत्रपृथक्त्वे मैत्रस्यापि पृथक्त्वमित्याशंक्य पृथक्त्वं किं संयोगवदुभयगतं वत् द्व
त्ववदेकगतमिति विकल्प्याद्यं दूषयत्यन्यतरेति। पृथक्त्वस्य भेदव्यवहारकारणत्वादेकत्वपृथक्त्वज्ञाने तत्रापि तद्धानं स्यात्। एक

गतत्वेप्यकारस्यह्रस्वप्रतियोगिकभेदज्ञानेह्रस्वस्यापितत्प्रतियोगिकोभेदोधिगतः स्यात्। इतरथातत्स्यापिस्यात्। नचतूष्यदृष्टा
तत्व० १३८ तस्यापितत्वयाव्यावृत्त्यंगीकारादित्यर्थः। रचितादेरेणोर्थभेदज्ञानेप्यभेदज्ञानंनगौणमित्येतदयुक्तमितिवोदयति। ननुमहर्देतदि
ति। एकत्वावगमेन गौणोयस्यात्तस्मादहंमनुष्यइतिज्ञानमिंद्रजालमित्युच्यते। किंवानगौणइत्येतत्तदिंद्रजालमिति। तत्राद्यंदू
षयतिबाढमिति। अंगीकृतमंशमाहेंद्रजालमिति। तत्रहेतुमाहाविद्याकृतत्वादिति। भेदबोधादध्यासस्यनिवृत्तत्वात्कथम
ध्यासत्वंततोगौणत्वमितिद्वितीयंकल्पंप्रत्याहकिंचेति। तथाहिसत्यसैषोर्थः। अहंप्रत्ययस्यदेहादिप्रतिष्ठत्वमपिदृष्टमितिसंबं
धः। तर्हिदेहएवात्मास्यादितितत्राहस्वविषयेति। व्यतिरिक्तात्मप्रतिष्ठस्येत्यर्थः। तर्ह्युभयंस्यादितित्वत्राहतदेकेति। अपिशब्दो
वधारणार्थोदृष्टपदेनानुषज्यते। देहादिप्रतिष्ठत्वेहेतुमाह। नादीति। अहंप्रत्ययमात्रस्याध्यासात्मविरोधित्वेपिसहका राम०
र्यनुरोधाद्विरोधितेतिशंकते। ननुपूर्वमिति। सहकारिसन्निधावप्यहंमनुष्यइत्येवोपलंभात्त्वात्तिरेकंव्यतिरेक १३८

ग्राहित्वमित्याह नेत्याह नेति भ्रममात्रस्यवह्निमात्रबोधकत्वेपिसोरम्यदर्शनुसहकृतस्यश्रीखंडेंधनोद्भवदहनबोधकत्वं दृष्टांतद्
सहकारयुक्तस्याधिकग्राहितानाहंमनुष्यइतिदर्शनंतुगौणमित्यत्राह नहीति दृष्टांतेविशिष्टभ्रमस्याविशिष्टवह्निबोधकत्वं नतु
भ्रममात्रजज्ञानस्यसहकारसंनिधानादन्यविषयत्वं अत्रतुप्रत्यक्षस्ययौक्तिकज्ञानसंनिधेपेरन्यविषयत्वमुच्यतेइति वैषम्य
मित्यर्थः द्वितीयंदूषयतिविचारेति संदेहेतिशेषः अविवेकितामिति न अनुसंधानेप्यनिवर्त्यतेध्यासस्तस्मादनुसंधाने
पीति अपरोक्षभ्रमस्यापरोक्षज्ञानंनिवर्तकं नि यमात्तत्रपरोक्षज्ञानेन बाध इत्यर्थः अहंमनुष्यइतिप्रत्ययस्यदेहनात्मत्व
विषयत्वेनव्यतिरेकासिद्धिरित्युक्तमनुवदति ननु प्रत्यक्षेति केवलयोरनुमानागमयोर्व्यतिरेकासाधकत्वेपियुक्तसहकृता
हंप्रत्ययोपोद्बलितागमानुमानयोर्व्यतिरेकसाधकत्वंयुक्तमित्याहोच्यतेइति वाक्यार्थबलस्यासुशरदव्याद्यन्तानन्यहंप्रत्ययोनुव
र्तते अनुवर्तमानस्यव्याहतमात्रास्तंयनत्वायोगात्सकलानत्यानुस्यूतमात्मानत्वमाकंचननमेष्टव्यक्रियाद्याघुकिः इनरद्गत्वं

तत्व°
१३९

अनादित्वाद्येसत्यपूर्वदृष्टत्वेहेतुत्वं नरत्रुपपमस्यनइति प्रतिभाति तदनुपपन्नं प्राक्पूर्वदृष्टत्वानुपपत्तेरनादित्वाच्छांस्यस्तत्संस्क
र्तनपुरःसरमुत्तरग्रंथमवतारयति स्वयंप्रकाशत्वइति लक्षणं शशब्देन परत्रेसंज्ञोविवक्षते अधिष्ठानप्रमाणत
द्दोषसंस्काराणामप्यभ्रमजनकत्वादत्राप्यधिष्ठानप्रमाणं तावत्संसंपादयितुमाह चैतन्येति तस्य प्रमाणत्वमुपपादय
ति आत्मेति आत्मावभातितमात्मव्यवहारहेतुत्वमित्यर्थः व्यवहारस्यस्यान्यजन्यत्वं दृष्टं तद्वदत्रापीति शंकां निरस्य
स्यद्वितीयेति दोषस्त्वविद्येत्याह तत्रेति कारणान्तरस्य संभवेप्यध्यासासंभवइति शंकते नन्विति संसृष्टव्यवहारानुपप
धिष्ठानादिविषयनेकज्ञानंजन्यं वदृष्टमन्यत्रात्रत्वसंबंधमनोविषयत्वाधिष्ठानारोप्यतानस्यैतन्यस्यनियतत्वाद्येत्यर्थः राम
आत्मनोविषयत्वेप्यारोप्यस्फुरणादन्यज्ञानाभावादधिष्ठानत्वमिति टीकार्थः आरोप्यस्फुरणान्यस्फुरणासंबंधित्वेनाधि
ष्ठानत्वं रूपमुक्तं तु छस्याप्यधिष्ठानत्वापातादिति तत्राहात्मेति आरोप्याधिष्ठानयोरेकस्यस्फुरणत्वस्याधिष्ठा १३९

नत्वप्रयोजकत्वान्तुच्छस्य चानादित्वान्नाधिष्ठानत्वमित्यर्थः जन्यत्वघटयति स्वरूपेणेति तदभिसंधायोक्तंभोत्त्व
चैतन्येति आरोप्यस्याधिष्ठानमित्रानुभवफलत्वाद्विषयसंवलितत्वेन जन्यत्वाच्च लक्षणोपपत्तिरिति टीकार्थः आत्मान
मनोर्विरुद्धयोः कथमैक्यं तत्राह भ्रांतित्वादिति प्रमाणतएवक्यनवभासेपि भ्रांत्यात प्रतिभासइत्यर्थः लक्षणासमर्थनमुप
संहरतीति कारणेति किंत्वस्य व्याख्यातत्वात्कुतस्तत्स्वरूपं कस्मादित्याशंक्योत्तरशेषत्वात्तद्वादइत्याह कथमिति प्रत्य
नाक्षेपपोरपिकृतत्वान्नच्छमनेनेति मत्वांक्षिपं समयेति च रूपमुक्तमित्याशंक्याध्याहारेणायोजयति दृष्टमिति अज्ञानावि
षयत्वात्सर्वगतत्वेनपुरःस्थितत्वाच्च अविषयत्वाभिधानभाष्यटीकयोः संगतं तत्राहाध्यस्यमानेनेति वाक्यमित्यादे
र्थः अध्यासस्य आक्षिप्यते वेत्ता कथं पुनरध्यासइत्येवोच्यतां किं प्रापगात्मनीत्याशंक्याध्यासत्राप्यासंभवात्स्वसवि
रोधविषये आक्षेपं द्योतयितुमित्याह वाढमिति अरूप्येरूप्याध्यासवदविषयेपि विषयारोप इति शंकते कथमि

तत्त्व०
१४०

ति विषयत्वस्याधिष्ठानत्वव्यापकत्वात्तदभावे भावं दर्शयितुं तस्याव्यापकत्वमाह यत इति तेंद्रियकारोपे तेंद्रिय
कस्यैवाधिष्ठानत्वमित्याह पुरोवस्थित इति गगने रूपाद्यारूपदर्शनादेर्दिग्मूढत्वमप्रयोजकं विषयत्वं चारोपानु
पपादकं स्यादित्याशंक्य विषयत्वं दर्शयति यात्र भवनस्याशानच नेत्याह प्रत्यगात्मत्वस्येति आत्मनो विषयत्वाभि
धानं सिद्धांतविरुद्धं चेत्याह यद्यपीति अविषयेपि संवदने क्षणिकत्वाद्यारोपो दृष्ट इत्याशंक्य दृष्टांतो संप्रतिपन्नर
यात्राये नाह नहीति न केवलमदर्शनमेव कथमधिष्ठानत्वमपि त्वसंभव इत्याह संभवी वेति अधिष्ठानस्य प्रत्यक्त्वेना
विषयीनेति वदता सुषुप्तिव्यावृत्तिमात्रमात्मनोभ्युपगतं तत्र कर्मत्वाभावे कथमधिष्ठानत्वमित्याशंक्याह तत्रेति अधिष्ठा
नत्वोपयोगि केवलं स्फुरणो सति कर्मत्वाभावापरभिन्नाध्यासाभावादुपलक्षयैः कर्मत्वमप्रयोजकमित्यर्थः अस्मदि राम
ति प्रत्ययो यस्य सोयमस्मत्प्रत्ययोहंकारः अस्मच्चासौ प्रत्ययश्चेति वा तत्र प्रतीतिविषयत्वमस्मत्प्रत्ययविषयत्वं तत्त्व १४०

कर्तृकर्मविरोधेन विषयत्वनिराकरणमनुपपन्नं अंतःकरणविषयस्यास्मत्प्रत्ययविषयशब्दार्थत्वादित्याशंक्याहास्मत्प्रत्ययेति गम
नक्रियाकर्तृकर्मविरोधेन विषयत्वनिराकरणमनुपपन्नं अंतःकरणविषयत्वस्यास्मत्प्रत्ययविषयशब्दार्थत्वादित्याशंक्याहास्मत्प्र
त्ययेति गमनक्रियाकर्तृत्वं दर्शनक्रियाकर्मत्वं वेकरोपलब्धमिति न विरोध इत्याशंक्याहैकस्यामिति देहःस्वातिरिक्त इष्टक्रि
सत्रैकस्यैव कर्तृत्वं कर्मत्वं च तदर्थप्रसक्तेति विशेषणं कर्तृभेदे विरोधाभावं दर्शयति राकृष्येमेवस्येत्युक्तं कालभेदेनाविरोधं निरा
कर्तुमाह तदेति कर्तृस्थानं क्रियाप्रतिगुणभावः कर्मकारकस्थानं क्रियां प्रति प्राधान्यं तत्रैकेनांशेन कर्तृत्वमपरेण
कर्मत्वमित्यंशकृतान्नविरोध इति शंकते अस्त्विति निष्कलादिवचनविरोधान्नैवमित्याह नेत्यादि कर्तृकर्मविरोध
निराकरणार्थमहंकारोस्मत्प्रत्यय इत्युक्तं तथापि न विरोधो निराकर्तुं शक्यः अहंकारशब्दस्याहंप्रत्ययार्थत्वादित्याशंक्या
ह तत्रेति अंतःकरणमस्मत्प्रत्ययप्रतिबिंबसंबंधः प्रतीयमानत्वेन प्रत्ययत्वे आत्मनो दृग्रूपता अंतःकरणवि

यत्वमनुपपन्नमित्याशंक्याहात्मचैतन्यस्येति अंतःकरणेऽप्रतिबिंबिततया स्फुरत्त्वं विषयशब्दार्थः पारिच्छिन्नस्यैवाधिष्ठान
त्वमित्यभिनिविशमानं प्रत्याह सविकल्पकनयेति जडत्वाविशेषे कस्याभिव्यंजकत्वं कस्याभिव्यंग्यत्वं कथं तत्राह भास्वरेति पार्थिव
त्वेऽपि नैर्मल्ये पाषाणादीनामांतरालिकभेदवदिदमित्यर्थः अंतःकरणेन संयोगाद्यसंभवान्न कथं तत्र व्यक्तत्वं तत्राहात्मनीति
आत्मव्यंग्यस्यांतःकरणस्य कथं तद्व्यंजकत्वं तत्राह तत्र सर्वत्रेति स्वाकारावभासत्वाभावान्नांतःकरणमत्यन्तभिन्नं वेदयति
नान्वेति स्वाकारताभावोऽसिद्ध इत्याहात इति इदमानंदरूपे वस्तुनी गर्भे यस्य स तथोक्तः चिद्रूपेणाहंकारतनात्मानि मवा
चास्मिन्नहंकारो गर्भितइवास्ति इदंरूपेण च चैतन्यागतस्य प्रकाशस्यातिरोधानादिति इदंरूपमिदंरूपे गर्भितमेवेत्यर्थः गर्भिता
द्वयपेक्षातः कस्मादित्याशंक्य प्रथमत्वेन धर्मिद्वयप्रतीत्यभावादित्याह योऽदहतीति द्वैरूप्यावभासवदिति अग्नेरनुष्णत्वाद्या
कारताश्रयस्य दग्धृत्वेवेत्यर्थः अहमुपलभ इत्यत्रोपलब्धिविशिष्टोऽहंकारः प्रतीयते नत्वपांतरं दृष्टांतेतु दाघत्वस्य

दहनधर्मतया प्रसिद्धत्वाद्रूपांतरसंश्लेषनिश्चय इत्याशंक्याह साधारणेति उपलब्धेः स्फुरणात्मिकाया जडधर्मताभावादु
पलभमानात्मानुभूतिसंपृक्ततया प्रथनेऽनुभूतिश्च परिणममानाचित्संवलिततयेत्यर्थः सर्वलोकसाक्षिकं इत्यनेदमानंदरूप
त्वमनुभवपदस्फुरितं तन्न संभवत्यनुभवादेवेत्याशंक्याह अनुभवनमिनयस्ति दुःखीति निरतिशयप्रेमास्पदत्वेन सुखरूपत्वप्रतीय
तेऽस्मिंश्च दुःखसंभवानुपपत्तेः दुःखव्याघ्रातिं द्वैरूप्यं एवदभिप्रेत्याकमवहितचेतस्त्वयेति वियांतरेण द्वैरूप्यमाह पुरी
मीति सुखाद्याकारेण परिणामिनी बुद्धिनत्तु साक्षिनाशसाक्षिचैतन्यं चकस्मिंस्तादृशसाक्ष्यभावानुपपत्तेरिति द्वैरूप्यं तु
त्वं निपुणाभिवीक्षेति द्वैरूप्यांतरमाहाहंकारेति बुद्धिवृत्तिविषयसाक्षितया तु स्फुरत्स्फुरणं अहंकारस्य व्यावर्तन
नन्वेकस्मिन्ननुवर्तनत्वं व्यावर्तनं च संभवति नदुक्ते निपुणानरभिनि असंभिन्नेदंरूप इति कथमुक्तमहंकारस्येदमंशतयो
क्तत्वादित्याशंक्यात्मलक्षणलक्षिततादहंकारो नेदमंश इत्याह नन्विति अनात्मत्वेऽपि संविदाश्रयतया स्फुरणं घट

तरति चोदयति नन्विति अयःपिंडस्यादाह्यत्वेपि दहनसंसृष्टतया दग्धत्वस्फुरणवदात्मसंसृष्टतया तथास्फुरणभवत्वि
त्यर्थः उत्तरग्रंथस्य ग्रंथानुरूपत्वमाशंक्य तासंपर्ममाह यः पिंडेति तर्हि येनेन्ग्रंथेनाहर्य आत्मत्वं प्रतिपाद्यते तानन
दितत्वं किंप्रमातृप्रमेयसादिनेसाशंक्यात्मनः संविदाश्रयत्वेनापरोक्ष्यं विषयस्य तु कर्मतयासंविदः स्वप्रकाशतयेति
विभागं तत्कुमापरोक्ष्यविप्रतिपत्तिं तावदाह तत्र सांख्याइति तत्र वादिनां मध्ये सांख्याः स्वात्मानमनुभिमतइत्सन्वयः अनु
मानमाह अविदात्मनीति अंतःकरणस्यचित्वात्तत्रचित्सतिविवंभातइति शंको व्यावर्तयितुमविदात्मेति विशेषणं कर
णत्वादीपादिवत्तचित्वमित्यर्थः विगीतरः सरइत्युक्ते यत्किंचिद्दिवपुरः सारत्वसाधने नार्थांतरत्वं तदर्थमाह महाभूते
तिपृथिव्यादीनि स्वरूपनिर्देशः इत्यमपदमनुनादमात्रं गुणत्वादित्युक्ते गंधादिषु व्यभिचारः तदर्थं तेषु दृष्टत्वेस राम
तीतिविशेषणं एतावत्युक्ते मनस्त्वादौ व्यभिचारः तदर्थं गुणत्वादिति निश्शेषणं विशेषपदं शुद्धिगणादिगुणात्वया १४२

प्यसर्भावि विशेषगुणत्वसाधयसे ब्रैंद्रियग्राह्यतयेति गुणस्विसमें ब्रैंद्रियग्राह्येविशेषणगुणइति इष्टव्यो इदमत्र
विवक्षितं इच्छादिपृथिव्याधष्टद्रव्यातिरिक्ताश्रितं तद्समवेतत्वे सति विशेषगुणत्वात् पत्रैवंनतदेवं यथा गंधादिः न
महेत्वासिद्धिः नतावत्स्पर्शवद्विशेषगुणत्वं अयावद्द्रव्यभाविनत्वात् स्पर्शवद्विशेषगुणानां यावद्द्रव्यभावित्वात्
नापिनभोगुणता इच्छादेर्बहिरिंद्रियग्राह्यत्वात् नचदिक्कालमनोगुणत्वं तेषां विशेषगुणविधुरत्वात् तस्मादाश्रयांतरानि
रूपणदाश्रयस्यवात्मरूपाश्रयणीयत्वात्तदाश्रयत्वेनात्मसिद्धिरिति एवंप्रमातृपारोक्ष्यमभिधायसौत्रांतिकमतमनुसृ
त्यप्रमेयपारोक्ष्यमाह तथेति यथाप्रमातुः पारोक्ष्यं तथा विषयाअनुमेयाइति कल्पयंतीत्यन्वयः अनुमानमाह वेदनेप्विति
घटःस्फुरतीति घटविकल्पयोपलभ्यमानस्फुरणकरणजन्यं कार्यत्वात्संप्रतिपन्नवत् तत्रचकारणांतरानिरूपणादात्मसम
वेतंज्ञानंकरणतयासेत्स्यतीति तानस्वनिसानुमेयत्वं वार्त्तिककारीयामेनिरस्तनि इष्टव्यं एवंमतभेदमभिधाय तदुत्तरत्वेन

१४३ टीकामवतारयति तच्चेतीति किमात्मन आनुमानिकत्वमात्रमुच्यते उत निरनुमेयत्वमिति विकल्प्याद्यं प्रत्याह यदी
ति स्फुटीकरणार्थमिति द्वितीयमङ्गीकृत्य दूषयति यदि निसेति विरसंनिधानपुरःसरस्सच घटसंवेदनेन तत्स्फुरणमङ्गीकृत्य
किमात्माकारतया विषयोऽस्तीत्येतावत्साध्यते आहो घटाकारसंवेदने विषयस्यानवभास इति तत्राद्ये सिद्धसाध्यत्वं
द्वितीये किमनुमानज्ञाने व्याप्तिव्यवधानं विनाप्रतीतार्थः प्रथमे तु तन्नेति विकल्प्याद्यं दूषयति सौत्रान्तिकस्यापी
ति फलितमाहेति अनेकान्त इत्यनियत इत्यर्थः यद्यदाकारं ज्ञानं न तत्तद्विषयं न भवतीति नियमोऽनुमाने व्यभिचारादि
त्यर्थः द्वितीयं दूषयति नचेदिति अनुमानात्तदपि प्रयोजनहीनमनुमानमिति यावत् घटाकारज्ञानस्य घटविष
यत्वाभावे प्रसक्तविरोधोपीत्याह अपरोक्षेति अपरोक्षमिति व्यवहारस्य योग्यो यो विषयः तदवभासः तेन विरुध्येत राम
तियावत् ज्ञानपारोक्ष्यानुमानेप्यनुभवविरोध इति द्रष्टव्यः एवं प्रमेयादीनामपारोक्ष्यं निराकृत्य प्रमेयस्य कर्मतयापि १४३

परोक्षत्वं संविदः स्वप्रकाशत्वेनात्मनस्तदाश्रयत्वेनेति वक्तुं प्रथमं प्रमेयस्य संविदभिन्नतया अपरोक्षत्वमनूद्य दूषय
तीत्याह त्रेति यदपरोक्ष्यं तद्विज्ञानाभिन्नं यथा संविदपरोक्षश्च घटादिरिति बोध्यार्थः कर्मतयापरोक्ष्ये हेतुमाहेदमि
तिद्वितीयया दर्शनक्रियाकर्मत्वेन विषयस्फुरणं तद्धेतुरूपमभेदानुमानमित्यर्थः किंच रजतादेर्बहिष्टं ज्ञानाद्भिन्नं उतानि
त्यं अद्ये सत्र व्यभिचार इत्याह नवेति द्वितीयमनुवदति तदपीति तस्य बाध्यत्वात् ज्ञानाभेदोयुक्त इत्याह नत्ररजतवदि
ति कथं तर्हि विषयापरोक्ष्यमित्यत आह तस्मादिति संविदुपाधित्वं संविद्विशेषणत्वं एतावत्कत्वे बाह्यकं ज्ञानमिति ज्ञान
विशेषणत्व क्षुषोपधापरोक्ष्यस्यात् न तदर्थमाहाव्यवधानेनेति चक्षुषः सत्त्वं चाक्षुषाभिसङ्गति व्यवधानेन चक्षुषो ज्ञा
नविशेषणत्वाभावादित्यर्थः न चानुमेयस्यापि संविद्विशेषणत्वेन परोक्ष्यप्रसंगः संविदव्यवहितेन्द्रियार्थसंप्रयोग
जज्ञानस्य विवक्षितत्वादित्यर्थः विप्रतिपत्यंतरमुत्थापयति तत्रेति मनसा संयुक्त आत्मा तस्मिन्समवायः संयुक्त

तत्व०

१४४ समवायः सन्निमित्तं यस्य तत्संयुक्तसमवायनिमित्तं तच्च तत् ज्ञानं चेति तथोक्तं तस्मादित्यर्थः पक्षान्तरमाह प्रमेयेति
चक्षुषा संयुक्तार्थेन तादात्म्यसंबंधात्प्रमितिविषयं ज्ञानं तत्समुपजायते तेनापरोक्ष्यं घटाभित्यर्थः तदुत्तरत्वेन टीकाम
वतारयति तान्प्रतीति प्रमातृप्रतीतिन कर्मतयापरोक्षे प्रमाणमात्रादिति संबंधः कर्मत्वाभावे तयोः कथमपरोक्ष्य
त्वमिति चेत् तत्र वक्तव्यं किं कर्मत्वाभावेन परोक्षत्वं साधयिषितं उतापरोक्षेण कर्मत्वमिति तत्राद्यमनुभवविरोधे
न दूषयति चेति नापि द्वितीयः अननुभवत्वादनात्मत्वप्रसंगादित्याह केवलमिति कर्मतया आत्मन आपरोक्ष्याभावहे
तुमाह न तावदिति प्रमाणाभावे सिध्यतीति शंकते सतीति मनसीति व्याप्तेन मनस्यात्मदृष्टेरितरत्र चादृष्टेर्मानसत्व राम
मात्मन इत्यर्थः आत्मव्यवहारहेतुर्विषयानुभवविषयतया न प्रभासिद्धिमाह न विषयेति आत्मानुभवविषयत्वमेवनत
योः किं न स्यादित्यत्राह विषयेति विषयज्ञानाश्रयत्वेनात्मनव्यवहारसंभवे ज्ञानान्तरादात्मसिद्धिकल्पना गौरवं १४४

स्यादित्यर्थः कर्मतयाप्रमितिरपरोक्षेति यदुक्तं तन्निरस्यति नचेति आत्मसमवेतानुभवस्य संयुक्तसमवायादप
रोक्षता विषयसमवेतानुभवस्य संयुक्ततादात्म्यादिति न च व्यक्तव्यमित्यन्वय ग्राह्यज्ञानं येन मनःसंयोगेनानाति तेनैव
तस्याहि ज्ञानान्तरं जायते उत न संयोगान्तरेणाद्यः असमवायिकारणभेदस्य ज्ञानभेदकत्वप्रयोजकत्वाद्द्वितीयेपि
ग्राह्यं कृतानसमये ग्राह्यं ज्ञानमस्ति उत न न चेत्तत्राह प्रत्यक्षस्येति प्रत्यक्षस्य वर्तमानग्राहित्वनियमात्पूर्वज्ञानस्य च त
दा नष्टत्वान्न प्रत्यक्षत्वमित्यर्थः आद्ये दूषणमाह युगपदिति उत्तरज्ञानसमये पूर्वज्ञानास्तित्वांगीकारे फलद्वयस्य युग
पद्व्यवस्थानमापतितं न च तदस्ति तथापि घटज्ञानसमये मनसि क्रियातनोविभागः ततउत्तरसंयोगात्तज्ज्ञानं जनिष्यत
नेक्षुण चिलंबेनोत्पन्नज्ञानान्तरसमये मास्तु तर विनाशिनः पूर्वज्ञानस्यावस्थानमसमंजसः नच विनश्यदविन
श्यतोः सहावस्थानमिष्यत इति शंक्यं पूर्वोत्तरवेदनयोर्निवर्त्यनिवर्तकभावेन विरोधाद्यौगपद्यस्यानुपपत्तेरि

तत्त्व०

१४५ सर्थः तादात्म्यसंबंधाद्विषयगतत्वाकदप्रसक्षमत्र दूषणांतरमाह संयुक्तेति संयुक्तसंबंधादिति संयुक्ततादात्म्य
संबंधादित्यर्थः अथवा संयुक्तसमवायसंबंधी त्संयुक्तात्तादात्म्यसंबंधात्तथानुभवावभासे आत्मावभासे आत्मगतस्यप
रिमाणस्याविषयगतरसादेरवतेन ज्ञानेनापरोक्षत्वं स्यादित्यर्थः परिमाणादीनामयोग्यत्वादनुभवग्राह्यत्वे नाग्रहण
मित्याशंक्याह योग्यत्वमत्रापि तुल्यमित्याह अनुभवस्येति अनुभवो ज्ञानांतरगम्यः स्वसत्तायां प्रकाशव्यतिरेकवि
धुरत्वाद्यदैवं न तदेवं यथा घटादिरसर्थः आद्येन चकारेण हेत्वसिद्धिमुक्ताहिति स्वसत्तायां प्रकाशव्यतिरेकित्वे जिज्ञा
सायां संदेहास्यादित्यर्थः द्वितीयेन चकारेण सुखादिषु साधनावृत्तिशंकां निरस्यति सुखादीनामपि ज्ञानात्मकत्वेन
प्रक्षांतर्भावादित्यर्थः विषयनिष्ठं प्राकट्यं स्वप्रकाशमितिमतेन स्याजन्मैव दुर्निरूपमित्याह न वात्मेति किं परिस्पंदल राम
क्षणो व्यापार उत परिणामलक्षण इति विकल्प्याद्यं प्रत्याह सर्वगतस्येति द्वितीयं दूषयति परिणामेति मत्परिण १४५

फलस्य परस्य मतन्निष्ठत्ववदनुभवस्यापि परिणामसमानाधिकरणत्वमाश्रयणीयमित्यर्थः अकर्मकपरिणामफलस्य
परिमाणासमानाधिकरणत्वेपि सकर्मकक्रियाफलसविषयनिष्ठत्वं क्रियायाः कर्मैरापतिशयजननस्याभाव्यादित्या
शंक्याह संविदाश्रयत्वं चेतनत्वप्रयोजकं उत तत्तयनं व्यापारवत्वं आद्ये विषयस्यैव चेतनतापत्तिरित्याह संविदाश्रयइति
द्वितीये किं संविज्जननव्यापारवत्वमात्रं विवक्षितं उत संविज्जनकज्ञानव्यापारवत्वमिति विकल्प्याद्यं दूषयति नवेति द्वितीयं
प्रत्याह विषयेति मयागतो ग्रामः इत्यत्र स्वगतगमनक्रियाकर्मत्वं ग्रामस्योपलब्धं न त्वमयावेदितमित्यपि स्वगतनविदिक्रि
याकर्मत्वं विषयस्यानभ्युपतेन तस्याद्विषयनिष्ठत्वरसर्थः आत्मसमवेतज्ञानक्रियाजन्यानुभवव्याप्यत्वाशयेमयावि
दितरस्त्यनुभवेविरुध्यइत्याशंक्य परिणामक्रियातत्फलयोरिकाधिकरणत्वनियमान्नज्ञानानुमितिरित्याह स्यात्मनीति
उपसंहरति तस्मादिति संविदात्मनः कर्मत्वाभावेपि उभयोरपि स्वप्रकाशेनापरोक्षत्वं उतान्यतरस्येति विकल्प्ये

तत्व० १४८

ध्यं दूषयति नन्विति गौरवप्रसंगादित्यर्थः द्वितीयेपि किमात्मानः स्वप्रकाशत्वं उत संविदं इति विकल्प्याद्यं मंगीकरोति
अन्यतरस्येति द्वितीयस्त्वनुपपन्न इत्याह चेति आत्मस्वप्रकाशत्वमात्रेणोत्तरव्यवहारसंभवे तत्समवेतज्ञान
तत्संविस्वप्रकाशत्वकल्पने गौरवमापतेदिति भावः अनुभवस्य जडत्वे ननुभवत्वप्रसंगान्नैवमित्याह नेत्याहेति प्र
मितिः स्वप्रकाअनुभवव्यतिरेकेण घटवदित्यर्थः अथाप्रकाशत्वेप्यनुभवत्वं किं न स्यादित्याशंक्य प्रमाणफलत्वभं
गो बाधकं इत्ययेनाह प्रमाणफलमिति ननु कल्पनागौरवं प्रामाणिके थे गौरवस्यादोषत्वादित्यर्थः आत्मस्वप्रकाशत्वा
त्मताव्यतिरेकेण घटवदित्यनुमानात्सिद्धं तत्स्वप्रकाशत्वमपीत्याशंक्याह द्वकेनेति आत्मनोस्वप्रकाशत्वेपि भा
नात्मत्वसंविदाश्रयत्वेनात्मतोपपत्तेः इतरस्यानुवेद्यत्वे घटादिवदननुभवत्वं दुर्वारमित्यर्थः संवित्फलत्वमसि
द्धमित्याशंक्य तत्परिहारत्वेन प्रमितिरनुभव इत्येतद्व्याकरोति अथवेति इच्छयायोजनेति शेषः कथमसि १४९

MEMORIA

द्धिरिति शंकायामाह हानेति चतुष्टयासन्निकर्षानंतरं हानाद्युपलंभनस्य फलत्वमित्यर्थः प्रमितिः प्रमाणफलं तहाना
दिः हेतुमाह भवतीति चतुष्टयसंनिकर्षेप्यर्थानुभवाभावे तद्विषयहानाद्ययोगाद्यनुभवः फलमित्यर्थः हनाद्यतिरिक्त
फलकल्पनाया मनवस्थेत्याशंक्याह स्वप्रकाश इति संनिकर्षे सत्यर्थानुभवाभावेन हानाद्यभावादर्शनाच्चानुभवस्याप्र
योजकत्वमित्याह न हीति संवेदनस्यैव प्रमाणत्वात् प्रमाणफलं दित्युक्तं तदयुक्तमिति चोदयति नन्विति कथं तर्हि प्रमाण
फलविभाग इत्याशंक्याह संवेदनमिति अर्थाकारविशिष्टयोर्न संवेदनस्य प्रमाणत्वं तत्स्फुरणरूपेण फलत्वमित्यर्थः
लोके करणफलभावस्यासंतभेदव्याप्तत्वात्तत्रापि स आश्रयणीयः इतरथा करणफलभावो न स्यात्तत्रश्च संनि
हितं रिक्तं करणमास्थेयमित्यभिप्रेत्याह तद्व्यावर्तयतीति प्रमातृव्यापारः किं परिस्पंदउत परिणामः उभयथाप्य
नुपपत्तिः सर्वगतत्वान्निरवयवत्वाच्चेत्याशंक्याप्रमातृव्यापार इति अर्थेन्द्रियात्ममनः संयोगाच्चतुष्टयसन्निक

र्षइत्यर्थः चतुष्टयसंनिकर्षः किंप्रत्यक्षः उतानुमेयः बाधोनानुभवादेवनेतरः भ्रमाग्नोः क्वचित्प्रत्यक्षतायासत्तां व्याप्ति दर्शनेनव्यापकज्ञानमुदेति नचतथात्रसंनिकर्षस्यप्रत्यक्षतेति वैषम्यादित्याशंकायामनुकंपकलिंगोनिसानुमेयइति रूपाद्युपकविकरणत्वेनानिंद्रियकेंद्रियकल्पनावदनुभवकरणत्वेनसपरोक्षसंनिकर्षकल्पनंवरतरइत्यर्थः प्रमात्रप्रमित्योः कर्मतयापरोक्षत्वाभावेनुभवविरोधः स्यादितिबोधितिनन्विति अहंमित्यात्मविषयेनुभवःइदमित्यनात्मविषयः जानामीतिज्ञानानुभवइतिविभागः अनात्मकर्मकर्मकानुभवाश्रयत्वेनात्मव्यवहारसंभवेपृथक्ज्ञानकल्पनानुपपत्त्याहनेत्याहेति प्रतीचःकर्मत्वेमानभावेनदूषितेकथंबोधसमुत्थितिरित्याशंक्यमानविरहोसिद्धइत्याहनन्विति आत्मात्मसंविकर्मत्वाभासनेसंविदन्यत्वेसत्यपक्षेणाशावरदित्यर्थः संविदनाश्रयत्वमुपाधिरित्याशंक्याहनेश्रयनयेति विषमव्याप्तिमतेसंविदाश्रयत्वस्याकर्मत्वाव्याप्तेर्व्यतिरेकव्याप्तिः समव्याप्तौतुनवसंविद्व्याप्त्यभाव

विंवयो भिन्नत्वं भिन्नदेशत्वं च सिसाधयिषितं उत प्रातिभासस्य गतिः पथ्यतइति विकल्पाद्यं निरस्यते कमिति यद्यपि प्रस
मितानादित्यर्थः द्वितीयं दूषयति भ्रमादिति विच्छेदइत्यनेन व्यावर्त्यं टीकामाहाप्येकं पुरनयति भेदशब्दस्य धर्मपर
त्वं इष्टव्यं न च भ्रमाद्भिन्नमित्यत्र गतेउक्तत्वात् चोद्यानवसर इति शंक्यतस्यार्थस्य टीकान्नूठतां कर्तुं चोद्यानुवादा
दित्यर्थः मायाविरुद्धमर्थं च घटयितुं न क्षमते अन्यथानुपपत्या न बध्नीयादिति शंकते नन्विति मुक्तावविद्याभावा
न्नाविद्यानिमित्तबंधसंभवः संसारे विद्यायामसंभावितमपि संभाव्यते यातरणी मरीचिषु फेनवीच्यादिकं तद्वदित्य
भिप्रेत्याहानआहेति विच्छेदाव भासस्य नाविद्यानामित्तत्वं नदाभावादिति शंकेते ननु विच्छेदेति विकल्प्यान्यासहत्वा
न्नैतदित्याहो यतइति क्लिविषयावरकाज्ञानस्याभावोवि वक्षितः उताज्ञानस्यैवेति विकल्प्याद्यं दूषयति न वेति
स्वतएवाचतरूपत्वात्रान्नात्मावारकमतानमित्युक्तं प्रमाणैकत्वादित्यत्रेत्यर्थः द्वितीयं द्विषयति तत्रेसा

१७८ दिनाअज्ञानस्यैवाभावेनसंभवत्यात्माविद्यायाःसद्भावादित्याहात्माविद्येतितस्याःसदापरिणामयसंगं वारयतिसोप
धिकेति अन्वयव्यतिरेकाभ्यामुपाधेरविद्यात्सोभकत्वंदोषत्वविनकोचमसंप्रत्येदमंशावभिसमर्थः अधिष्ठा
नयाथात्म्यज्ञानस्याध्यासंविरोधित्वात्तस्मिन्सत्यध्यासइतिकथमितिवेदन्तत्रयत्कव्यंसर्वत्रतत्वज्ञानस्याध्यासवि
रोधित्वंउतकविदनाद्यः तत्वज्ञानेसत्यपिसोपाधिभ्रमदर्शनादित्याहनवेतिकुत्रतर्हिज्ञानस्याध्यासविरो
धित्वमितिपृच्छयाद्वितीयांगीकारेणोत्तरमाह किंचिति इदमत्राभिप्रेतंउपाधिव्यञ्जनाज्ञानस्यभ्रमहेतु
त्वंनात्मीयतेकिंत्वध्यासस्यजन्मप्रतिबिंबितवस्तुस्यवैस्याविच्छिन्नात्ममोहस्यभ्रमहेतुत्वंनतश्चदेश
विच्छिन्नात्मापरोक्षज्ञानाभावादज्ञाननिवृत्तिस्तदभावश्चजलकलक्षणोपाधिवृत्तिबंधात्कानिवृत्तापरोक्षज्ञानेना राम
ज्ञानादिनिवृत्तिरितितत्वज्ञानेसत्यध्यासोननिवर्ततेनहंसेनबोधंनावनरतिसक्लिकाएकोदृष्टतस्मात्तत्स १७८

बंभमवदित्यादेोतत्वज्ञानेपूर्णताश्रवणादित्याशंक्याहनुनसोपाधिकेतितत्वज्ञानेसत्यध्यासानुवृत्तिदर्शनाद
निदृष्टव्यंकथंतर्हितन्निवृत्तिरितिपृच्छति किंत्विति उपाधिनिवृत्त्यैसोपाधिकनिवृत्तिःउपाधिनिवृत्तेरवकर्मा
यत्तत्वात्तत्वज्ञानेवैयर्थ्यमित्याशयेनाहोणधीति तत्वज्ञानवैयर्थ्येशंकितेकौकाकप्रतिरिबस्याज्ञानत्वंजीवस्य
ज्ञानत्वंप्रातुप्रयुक्तमेवोच्यतइत्याशंक्याहावादिति आशंकांतराधिगतोतंनिवृत्त्याधिगमः तदेवकथमित्या
हकथमिति आशंकांतरमाहंजीवइति जीवस्यतत्वज्ञानानुपपत्तेःकथंतेनाविद्यानिवृत्तिशंकेसमर्थः तंप्रतिबिं
बचनमतत्वप्रयोजकमित्याहतेदितितत्रावेतनत्वप्रतिबिंबत्वयोःसद्भावेऽचेतनत्वस्यप्रयोजकत्वंकथंनिर्धारितत्राह
चेतनत्वेतिशरीरस्यचेतनत्वेनतस्मिन्प्रतिबिंबस्यापिचेतनत्वात्कथमचेतनत्वस्यप्रयोजकत्वमित्याहनुशरीरमिति
शरीरस्यचेतनत्वंमंगात्कृत्सदूषणमाह नत्राहेतिचेतनप्रतिबिंबाभ्युपगमेकपंजाख्येनास्कंदित्वादिसमिदधौर्टी

तत्व० १५८

काकारः तत्राह दर्पणेति यथावेदातस्यापि प्रतिबिंबस्योपाधिदोषादन्यथात्वं एवं चेतनत्वेपि बिंबस्योपाधिजाड्यज
डत्वमित्यर्थः प्रतिबिंबस्य चेतनत्वं चासिद्धमित्याशंक्याह स्वभावेति चिद्रूपादिमत्वेन शरीरस्याचेतनत्वात् प्रतिबिंबस्या
प्यचेतनत्वमित्यर्थः प्रतिबिंबस्य बिंबानुगताज्ञानाभावेनु भवीयन्यायसदृशप्रतिनातिन न नानुपपद्यते अनुभवस्यतद
साधकत्वादित्याशंक्य तात्पर्यमाह देवदत्तेति प्रतिबिंबस्य बिंबाधीनचेष्टत्वमात्रेण कथमचेतनत्वं तस्याप्यन्याधी
नव्यापारदर्शनादित्यत्राह कदाचिदिति नियमेनान्याधीनचेष्टात्वमेवेन न त्वप्रयोजकं चैतन्यत्वे तु कदाचित्स्व
यमेवचेष्टेत्यर्थः कौकिकप्रतिबिंबस्याज्ञत्वसमर्थनस्य प्रस्कृतत्वाद्यस्य भ्रांतिरित्यनेन परगतज्ञानेन पर्णा
न भ्रांतेरनिरासाभिधानमसंगतमित्याशंक्य टीकायावतार्य शंकामाह ननु देवदत्तस्येति टीकायां बिंबस्य न तज्ज्ञा राम
नाश्रयत्वाभावेन हेतूयन्यासरिति तत्राह नाबिंबत्वेति भ्रांततत्वज्ञानाश्रयत्वप्रयोजकं चेतनत्वपि न त्रैव १७०

साधयिष्यामृस्य त्राह तदपीति यस्मात्तत्वं तस्यैव भ्रांतत्वं चेनार्हेनत्वेत्वज्ञानाश्रयत्वमपि न त्र कल्प्यतइति तत्राह
तदपीति सर्वज्ञादिरूपे अज्ञानाश्रयत्वस्यविरुद्धत्वात्तद्विपरीतजीवस्याज्ञत्वमित्यर्थः ननु बागीरूसोल्कवस्तु वस्तु
बिम्बानंतमित्याज्ञामित्याशयः ब्रह्म सर्वज्ञं जीवस्त्वन्त विपरीतदुत्तं गीकारेणाज्ञत्वं निहेतुन शंक्यते ब्रह्मणोपिसर्व
ज्ञासंभवान्नति शंकतेनन्विति चरमेकल्पे ब्रह्मणः सर्वज्ञत्वासंभवात अततत्रापियद्यपि तु शक्यते आद्येस्व
स्यसंसारित्वदर्शनेनेन भ्रांतनया ब्रह्मणस्तत्त्वज्ञानित्वं न स्यादित्याशयः आद्यंयमाश्रित्य तत्रयुक्तेदोषाभावमाह
नेत्याहेति बिंबस्य बिंबालत्वाज्ञानेपि तद्दोषसंस्पर्शोस्त्यन्यत्र पश्यत्सु जानीतीस त्र तदनुपपत्रं प्रतिबिंबालताजाना
ति न तत्र दोषेण लिप्यते चेति यावाना त्तत्राह देवदत्तोतेति ब्रह्मणस्तत्त्वज्ञानित्वमार्संसारित्वं चेनेदमेदा जीव
स्यापितत्वज्ञानितया संसरणाभावप्रसंगः यिपक्षे ब्रह्मणोपिसंसरणंस्यादित्याशंक्याह तत्वज्ञानेनेति निषप्राते
ह

तत्व

१८० बिंबयोरभेदेप्यवदातत्वादेर्घ्योपाधिभेदान्नसंस्कारः एवं संसरणादेरपीत्यर्थः जीवस्य प्रतिबिंबत्वेपि तत्व
ज्ञानाश्रयत्वसंभवाद्बिंबस्येव तदसंभवाज्जीवस्य ब्रह्मत्वज्ञानेन संसारनिवृत्तिः श्रूयमाणा यस्य तदुक्तं तत्र श्रु
तिन्यायविरोधमाशंक्य तेनेति बिंबमतत्वं भेदभ्रमनिवर्तकं ऐक्यज्ञानं बिंबप्रतिबिंबैक्यज्ञानवदित्यर्थः
लोके तत्त्वज्ञानेन विच्छेदभ्रमनिवृत्तिमंगीकरोति सत्यमिति न वेत्तेन दृष्टांतेन कस्यापि भेदानिवृत्तिरितिवाम
मित्याह नाव्येति एकत्वेन ज्ञानमात्रेण बिंबप्रतिबिंबनिमित्तं न भवति भेदभ्रमनिवर्तनमित्यस्यार्थः
तत्र हेतुं पृच्छति किमितीति किं कारणं तत्रेत्यर्थः बिंबप्रतिबिंबभेदभ्रमस्य दर्पणाद्युपाधिजनितत्वात् लौ
कोपाधेश्च ज्ञानमात्रेण निरस्यतेति त्वं तत्र भेदभ्रमस्य निवर्तकत्वायोग्यत्वमुपाधिरित्यभिमा राम
नानाहोपाधिरिति न च साधनव्यापकत्वं आत्मव्यतिरिक्तस्याहंकारादेरज्ञानमूलत्वात् ज्ञानेनाज्ञानति १८०

निवृत्तौ सोपाधिकभ्रमनिवृत्तिसंभवादित्यभिप्रायः जीवेष्वंशादेरसंभवात्तत्र वृत्तिचर्चा हृ रापास्तेति चोदयति
जीवस्येति विपक्षे बाधकमाह प्रतिबिंबतेति उभयमपि प्रमाणविरुद्धमित्याह नेतीति जीवस्य प्रतिबिंबत्वे प्रमा
णमाह रूपं रूपमिति रूपत इति रूपं शरीरादि तत्प्रतिरूपो बभूव तत्प्रतिबिंबो बभूवेत्यर्थः तत्र श्रुतिमूलस्मृ
तिरप्यस्तीत्याह एकधेति स्वतएकरूपत्वेन यद्यपि स्थितोप्युपाधिभेदाज्ञानेवेदृश्यते जलभाजनभेदेनेतीतो
गुरेवेत्यर्थः श्रुतिस्मृतितात्पर्याभिज्ञः सूत्रकृत्तदपीष्टमवसूत्रयांचकारेत्याह नित्याह अतएवेति आत्मनि
र्विशेषोपमानादतएव सूर्यकादिवदित्युपमोपादीयते शास्त्रीयपाधितत्वं ज्योतिरात्माविवस्वानित्यादीत्येव सूत्रा
र्थः मूर्तस्यैवदर्पणादेः प्रतिबिंबदर्शनात् ब्रह्मणश्चामूर्तत्वात्प्रतिबिंबभावः ततश्च श्रुत्यादीनामन्यथा
र्थत्वमित्याशंक्याह अम्बुवदिति जलसूर्यकाकाशस्त्वरूपातीत्याशंक्याह साम्येति सामान्यतत्वे त्वगगनस्यान

तत०

१८

न्हे भावान्मलिविंबत्वेनेत्यर्थः नन्वाभ्रादेः प्रतिबिंबो न गगनस्येत्यत्राह जानुमात्रेति एवं प्रतिबिंबत्वं प्रसाध्यापि रू
पत्वेन भासाद्याश्रयत्वं समर्थयते चिद्रूपत्वमिति अनाद्यपुरुषः स्वयंज्योतिरित्यादिरागमः शास्त्रशब्दार्थः गंधश्रु
त्राणीति गंधश्रवणविषयोऽनुभवः प्रमा स्त्रशब्दार्थः प्रतिबिंबकल्प इति विशेषणान्निरीश्वरो जीवस्यावच्छेदत्वमा
रूषत् कस्मादिति शंकते नन्विति सर्वगतस्य घटावच्छेदे यथा घटाकाशत्वव्यपदेशस्तद्वदुपाध्यवच्छिन्ने ब्रह्मणि
जीवत्वव्यपदेश इत्यर्थः दृष्टांतदार्ष्टांतिकयोर्वैषम्येणोत्तरमाह न सामान्येति सामान्यविशेषाभ्यामिति तत्तीयत्
स्वभावेऽनुवृत्त्यावृत्तरूपेण यथासंख्यं तैभ्यते द्विय लक्षणोऽनुपाधिभिन्नदेवभावेन ब्रह्मणः सर्वगत्वनानाघ
ऽनत्वादिति योजना बहिः सद्भावांगीकृतौ दोषमाह नत्रेति न च सर्वगतत्वाद्यनुपपत्त्यांऽतरव्यवस्थामाश्रित्य
ऽस्ति वाच्यमित्याह वच्छिन्नेति सर्वगतस्य ब्रह्मण उपाध्यवच्छेदे प्रथमे आवृत्तिः पुनरवच्छिन्नेऽपि नपत्ते

दित्यर्थः मनवच्छिन्नेस्य वृत्त्यंतरमाश्रयणीयं न वैनद्रूपत्व परमिति द्विगुणीकृत्य सदन्नुपपत्तिः गगनस्यानव
च्छिन्नेत्यनंगीकाराद्वैषम्यमिति भावः गगनवदेवावच्छिन्ने नवच्छिन्नस्य वृत्तिर्नोपपद्यते न च सर्वगतत्वाद्यनुपप
त्तिः चिन्मात्रविषयत्वात्तस्येति शंकते नेत्यरूपेति जगज्जन्मादिकारण ब्रह्मत्वस्य चानियतत्वादिश्रवणान्नैवमित्याह
नयदिति अंतःकरणप्रतिबिंबितजीवनियंतृत्वेन ब्रह्मणस्तत्रावस्थानाद्द्विगुणीकृत्य वृत्त्यनुपपत्तिस्तत्रापि स
मेत्याशंक्याह प्रतिबिंबेति जीवस्य चिद्रूपत्वे श्रवणविधिवैयर्थ्यं ब्रह्मणश्चिन्मात्रतया सदा स्फुरणादित्या
शंक्य विपर्ययतदेतुनिवर्तकत्वात्सार्थं श्रवणादिविधानमित्याह मिथ्येति रूपं मन्यत इति तत्पदा
द्रव्ययोगात्कर्तृत्वादित्वानं सम्यक् ज्ञानमिति शंक्येत नत्राहोपाधीति असंगोदासीनस्वभावेन तत्वतः कर्त्तृ
त्वाद्यसंभवात् अंशांतरमननमित्यर्थः उपाधिनिवृत्त्याभिध्याभ्यां स्यापगम इति न कृत्यं किमिदमुक्ते

१८ तदुपागमइत्याशंक्य तत्वज्ञाने नोपाधिनिवृत्तिःसिध्यिवत्कुत्वो त्कवानित्याह तइति अहंकारस्योपाधित्वे पूर्वापरविरो-
धःस्यादिति बोदयति नन्विति अज्ञानोपहितस्यैवोपाध्यंतरवर्त्मनात्राविरोधमित्याह नैषइति एकेनोपाधिना
क्षितसिध्येः किमुपाध्यंतरेणेत्याशंक्याह विनन्यस्येति नारतम्यं व्यनक्ति तथाहीति आत्मनः कथंनिर्विशे-
षत्वं चैतन्यलक्षणासंबंधेविशेषसद्भावादित्याशंक्य संबंधोसिध्यइत्याह चैतन्यमात्रेति चैतन्यस्वभावेपि ध-
र्मांतरसंबंधशंकानिरस्यते कूर समिति अनंतरोवाह्यः कृत्स्नः प्रज्ञानघन इति श्रुतेरुक्तधर्मासिध्यिरित्यर्थः ची-
तन्यमात्रं च तदेकरसं वेति तथोक्तं ततइति स्वप्नोपस्थाप कु कर्माभिव्यक्ता वित्यर्थः वासनानि बंधे नोय्यवहा-
रः स्थूलतर इत्यर्थः जागरभोगोपस्थापक कर्माभिव्यक्ताउपाध्यंतरोपरागाव्यवहारांतरं भवतीत्याह पुन- राम
कारणेति उपाधिभेदे नोपहीतजीवभेदात्तत्प्राप्त्यभाव कृतस्य जागरणे नुसंधानं स्यादित्याशंक्याह नवेति १८

उपाध्यंतरेणप्राप्तभेदस्योपाध्यंतरकल्पनया जीवभेदमभ्युपेत्य तत्प्राप्तभेदस्येति विकल्प्याद्यं दूषयति पूर्वेति अज्ञा-
नावच्छिन्नस्यैवांतःकरणाद्युपाध्यंतरवर्णनाज्जीवभेदप्रसक्तिरित्यर्थः द्वितीयं प्रत्याह निरपेक्षेति उपाध्यंतरे-
णाप्राप्तभेदानपेक्षेपोपाधितो भेदे जीवभेदापत्तिः न च तथोपपन्नइत्यर्थः अज्ञानस्यावच्छेदकत्वमाक्षिपति नन्वि-
ति स्थूलशरीरस्योपादानं च तदुक्तं चेति स्थूलशरीरोपादान भूतं तस्यापस्तत्त्वं रूपमपंचीकृतभूतलक्षणं तेन
सहितेनेत्यर्थः माभूदज्ञानपरित्यागः तत्राह तच्छन्नत्वादिति विभागस्य भ्रांत्यधीनत्वाद्भ्रांतेश्चसुषुप्तावभावाच्च
जीवत्वस्यादित्यर्थः भ्रांतिलक्षणत्वमसिध्यमित्याह अथेति अर्थगतएवेत्येवकारस्यावर्तमाह भ्रांतीति भेदस्या-
नादिमायाकार्यत्वात् नृत्पन्नत्वं अतभ्रांत्यभावेपि भेदोपपत्तिरिति गूढोभिसंधिः अभिसंधिमजानान
आह पूर्वेवादीतत्रेति विभागस्य किं कार्यत्वं उताकार्यत्व आद्ये सुषुप्तौ दैतदभावाज्जीवाभाव इति श्लिष्ट

तत्त्व॰
१०

ण्यविद्यादिस्यात् अन्यथा तदभावात् ननु आनादिस्यादित्यर्थः द्वितीयं त्वयाह कार्यत्व इति अनादित्वं प्रागभावध्वंस्यत्वंतेनो
विभागस्य यदिदमविद्यानिमित्तत्वमभिहितमविद्यावच्छिन्नेत्यत्र तत्र भवेदित्यर्थः विकल्प्यासहत्वान्नैतदित्याहो यत इति
अज्ञानमवच्छेदकं नेति वदतः कोभिप्रायः किं सुप्तावच्छेदकं नास्त्युतार्थतः तत्राद्यं प्रत्याह ब्रह्मणीति द्वितीयमनुवदति न
न्वर्थेति अर्थगत इति प्रत्यय ब्रह्मगत इति शंकास्यात् तदर्थमाह न विभ्रगत इति भ्रांत्यात्मको न भवतीत्यर्थः विभ्रमग
ताभावमंगीकरोति सत्यमित्यतितर्ह्यविद्याकार्यत्वं कथमुत्पमित्याशंक्याह सुषुप्त्यादाविति जीवब्रह्मणोर्विभागशब्देनाहमी
श्वरात् भिन्न इत्यादिरूपेस्फुटं व्यवह्रियमाणो भेदः कथ्यते नहि सुषुप्त्यादिगतभेदस्याविद्योपादानत्वाभावात् त्रिषयत्वा
नप्यवस्थानं स्यादिति शंकते नन्वर्थगत इति अविद्यानुपादानत्वमंगीकरोति सत्यमिति तर्ह्यविद्याभावे अवस्थानं स्या राम
दित्याशंक्याविद्यातत्त्वं नास्तिनिवृत्तो न निवर्त्तिर्भुक्तेत्याह तथापीति तदकार्यत्वे कथं तत्राचइत्याशंक्याह यथीहि १०

तिदृष्टांतासमतिभाशंक्याह संबंधेति संबंधस्याज्ञानकार्यत्वे ततः प्राग्ज्ञानस्यस्यानंतं संस्यात् न च तदुपपद्यते
तद्व्यादित्यर्थः इतोपि न संबंधस्याविद्याकार्यत्वमित्याह तादित्वादिति भावः ततः कार्यत्वं दृष्टं न तावत्प्रागभाववत्
ज्ञानस्यादि अनादित्वेन संबंधस्याप्यनादित्वादित्वादित्यर्थः प्रकारांतरेणाविद्यातत्त्वमाक्षिपति ननु जीवेति
भेदस्य धर्मिप्रतियोगितं तत्त्वानाविद्यातंत्रत्वमित्यर्थः विकल्प्यासहत्वान्नैतदित्याहो यत इति जीवब्रह्मशब्दाभ्यां
विवक्षितं चैतन्यं विवक्षितं तत्किं चिन्मात्रमिति विकल्प्याद्यमनुवदति नादीति चैतन्यं जीवभावेन भेदस्याश्रय इति संबं
धजीवभावस्यागंतुकत्वात् कथमनाद्यविद्याश्रयत्वं तत्राह नदीति अकृताभ्यागमादिप्रसंगान्नागंतुकत्वमित्यर्थः
चैतन्यस्यासंगादिरूपस्य कथं जीवभावस्तत्राहाविद्याविशिष्टमिति मिथ्याज्ञानं यावत्संयमनादीनाभेदस्य
परमार्थत्वात्तदाश्रयत्वमित्याशंक्य हेत्वसिद्धिमाह कात्स्न्येनेति अंतःकरणाविशिष्टाश्रयत्वशंकां निरस्यति

अनादिभेदस्येतिसादित्वे कृताभ्यागमादिप्रसंगइत्यर्थः द्वितीयं निरस्यति स्वरूपेणेति तस्मादाद्यः पक्षो विशि
ष्यत इत्याह अत इति चिन्मात्रं तत्र त्वाभावाद्विभागो विशिष्टाश्रय इति संबंधः विशिष्टनिष्ठभेदस्य वित्त्व त्वया
युष्मदर्थं कथं मविद्यानिवृत्तौ निवृत्तिः तत्राह स्वरूप इति स्वरूपे उपरज्यमानोपि विभागो विद्याकृत उच्यत इति
संबंधः अविद्याकृतशब्देन तत्तत्त्वं विवक्षितं तत्र हेतुमाह विशेषणाविद्यातंत्र इति इति शब्दो हेत्वर्थः विभा
गस्याविद्यातंत्रत्वात् घटादिवत्कार्यत्वं अकार्यत्वे ज्ञाननिवर्त्यत्वं न स्यात् अविद्यातिरिक्तत्वे सत्यनादित्वादात्मवदि
त्याशंक्योभयत्रापि व्यभिचारमाह अविद्येति अविद्यातंत्राणामप्यनादित्वमविद्यासंबंधवत्तद्वदविद्यवन्नी
यत्वं व नविरुध्यत इति योजना ज्ञाननिवर्त्यत्वमनिर्वचनीयशब्दार्थः उपाधिनसंबंधिनः स्वरूपमात्रेण संबं राम
धे दृष्टांतमाह कोट इति एकोपाध्यवच्छिन्नस्योपाध्यंतरसंबंधसमर्थनमुपसंहरति तस्माद्विभागस्कारमत १८४

ननु नद्दस्तत्रेति जीवस्याप्यवस्तुत्वे बंधमोक्षयोरननुगम आपद्येत तस्माद्वस्तुत्वमेषव्यमिति तत्तीवस्य प्रतिबिंब
त्वमित्यर्थः किं स्वरूपमात्रस्यावस्तुत्वमुतोपाधिविशिष्टस्यावेवस्तुत्वमिति हि इत्याह तत्रेति द्वितीयमंगीक
करोति भेदेतिस्वरूपमात्रस्य सत्वे हेतुमाह मुखेति मदीयमिदं मुखमिति प्रसमितयामुखस्याविद्याकृतत्वं अयम
भाव्रमेति वाक्याद्वितोक्तमस्यत्वमित्यर्थः विरोधादेकत्वावगमोमुक्त इत्याशंक्याह मिथ्यात्वेति वस्तुरूपे बंधासंभ
वाद्विशिष्टे बंधान्वयो वक्तव्यः तथा च मोक्षावस्थेत्यमपिस्यात् न च तदुपपद्यते मिथ्यात्वास्य तत्र निवृत्तेः तस्माद्बं
धमोक्षयोर्वैयधिकरण्यमित्याशंक्याह नवेति जडत्वानुक्तेऽपन्न च यित्वावेत्यर्थः मिथ्यात्वेऽपि बंधमो
क्षानुपपन्नाविति शंकते किंत्विति एकरूपस्यसंबंधसंबंधासिद्धावपि पाधिद्वारा बंधान्वयानुपपत्त्युपप
त्तिरित्याह स्वरूपेति स्वरूपगतत्वेन सांकर्यं प्रत्याख्योपाध्यंतं इत्याह स्वरूपगतस्येति परमतनिराकरणमुप

तत्व.

१८५ संहरति तस्मात्स्फटिकादिदृष्टान्तेनापेक्षितसिद्धौ रज्जुसर्पोदाहरणं व्यर्थेत्याशंक्य शंकान्तरानिराकरणपरत
या वत्समवोचत् तत्र रज्जुसर्पोदाहरणस्य वैयर्थ्यमेवास्तित्याशंक्य तत्संकीर्तनपुरःसरं तात्पर्यमाह अहंकारे
ति दर्पणदृष्टान्तेन जीवब्रह्मणोः सोपाधिकत्वं सिद्धं स्फटिकदृष्टान्तेन कर्तृत्वादेर्मिथ्यात्वमिति विभागः वेदान्तविहिते
नेति विशेषणवैयर्थ्यशंकां निरस्यति न च वेदान्तविहितोदाहरणसमर्थनप्रसक्तमित्यपि शंक्यं स्फटिकलौहि
त्यादिप्रतिभासे उपाधिवदत्रोपाधेरभावान्न भ्रमसंभव इति शंकायां निरुपाधिकरज्जुसर्पोदाहरणसम
र्थनं युक्तमित्यर्थः अन्यत्राप्युपाधिनिमित्तलौहित्यवत्कर्तृत्वादिकमप्युपाधेर्निमित्तमित्युक्तं अत्र रज्जुस
र्पदृष्टान्तेन निरुपाधिकत्वमुच्यत इति विशेषमाशंक्य तात्पर्यमाह निरुपाधिकेति अहंकारस्य निरुपाधिका राम
ध्यासपरा निष्पन्नमत्रोक्तं पूर्वत्र कर्तृत्वादेः सोपाधिकत्वमिति सविरोध इत्यर्थः सर्पभ्रमे संस्कारोपाधिरस्ति अ १८५

ननु नैतन्निमित्तवैषम्यमुक्तं ननु तत्रापीयत्र तदनुपपन्नं बाधकेनापि संस्कारो बाध्येत संभवादित्याशंक्य तात्पर्यमाह न
नु सर्वत्रेति आत्मव्यतिरिक्तस्य सर्वस्याध्यस्यमानकोपाधिनिभीवादधिष्ठानाध्यस्यमानयोः सत्तोपाधिनिमित्तत्वमहं
कारस्यानुपपन्नमित्यर्थः अधिष्ठानस्यापि निमित्तत्वादवधारणानुपपत्तेरित्याशंक्याह न निरुपाधिकइति निरु
पाधिकाध्यासे रज्जुसर्पादिदर्शनमिति सन्निधापितस्य सोपाधिकत्वं तु वक्तुमशक्यं व्याहतव्याहारः स्यादित्याशंक्य तात्पर्य
माह पूर्वानुभवेति उपाधिमात्रमित्यत्र मात्रचोऽर्थमाह स्वतन्त्रेति अध्यस्यमानधर्मसमानधर्मो हि तत्राध्यस्य संस्कार
स्यापि तिरिक्तस्योपाधेर्नाभावं वदन्त्रोपाधिः तेन व्याघात इत्यर्थः तथापि तत्र प्रमाणानुभवसंस्कारस्योपाधित्व
मत्र तु न तादृशोपाधिरिति वैषम्यशंकां निराकरु पूर्वानुभवसंस्कारमात्रेति विशेषणं दृष्टान्तदर्शितियोः सर्व
स्याप्यध्यस्यानपेक्षितत्वात् संस्कारमात्रं विवक्षितमित्यर्थः न च संस्कारमात्रस्याप्यध्यस्तत्वात्राध्यासनिमित्तत्व

तत्व०

१८६ मितरेतराश्रयत्वप्रसंगादित्यपि वाच्यं प्राक्तनाहंकारानुभवसंस्काराधीनतद्भ्रमोद्भवसंभवात्तस्य च तत्संस्कारांतरा
दित्यनिरोधइत्याशयेनोक्तं पूर्वेति प्रमाणानुभवसंस्कारस्य भ्रमहेतुत्वप्रसिद्धेस्तादृशः संस्कार एव ध्यः इतरभ्रमा
नुभवपानादित्याशंक्याह नपूर्वेति प्रमितिरनुभव शब्दार्थः प्रमाणसंस्कारस्यैव कल्पयितरेकविधुनत्वादपु
येऽत्र तत्त्वमित्यर्थः । द्विविधस्याध्यासस्योक्तन्यायेन सिद्धत्वमुत्तरभाष्यं व्याकुर्वन्तं किमत्रासंगत्वप्रतिपादकेन तन्त्रे
त्यादिनाग्रंथेनेत्याशंक्य तत्सर्वमाह तत्रात्मनीति सोपाधिकाध्यासस्य दर्पणस्फटिकोदाहरणद्वयेन सिद्धिर्निरुपाधि
कस्य रज्जुसर्पोदाहरणेनेति विभागः यथाकाशोदाहरणस्य वेदांतविहितत्वेऽपि रात्रार्थवत्त्वसाधनमुपपत्तं तस्यात्र
उपक्रमादित्याशंक्याह बोधांतरेति असंगित्वमात्मनः सिद्धेकत्वात्स्याध्यस्तत्वं न घनत्वसिद्धिः प्रमाणाभावात्तत्रासं
संगादित्यादिवाक्यं प्रमाणं असंगत्वसंभावनाहेतुः दृष्टांताभावात्रापि स्फटिकादेर्दृष्टांतस्यापि संगित्वादित्येवंविधे

बोधनिरासद्वाराधयाकाशोदाहरणेन श्रुतिसमर्पितासंगतायाः संभावनायां कर्तृत्वादेरध्यस्तत्वासिद्धिरपि सभिसंधिः
अनिर्वचनीयत्वपासंभेदयोग्यस्यापीत्यनुपशंकास्यात्तदर्थमाहागुणादिवेति रक्तस्फटिक इति प्रतिभासस्फटि
कस्यानुणिम्नसंभेदोभासनइत्येनत्तदासंगी चेति टीकयोच्यते सा च पवत्त्वं च धर्मवत्त्वं मात्रं तत्र यं टीकाशदृष्टांतेन
पिनासंगित्वसिद्धिः तस्य भेदनपाधनुषंगादित्याशंक्य नेकथमिति उपाधिपरामर्शं विना तत्रस्वतो न भेदादिः प्र
भनइत्याह तदाहेति भेदरूपकार्यसमाख्याइत्यस्यायमर्थः यथाकाशस्य कूपाकाशान्तभेदोत्पाद्यपरिमाणविरो
धोऽस्त्ययमत्रघटइत्यंतादिकूपदार्थनिष्ठसवकाशादिः कार्यं घटाकाशइत्यादिसंज्ञासाससमाख्या चेति किमेतानु
दाहरणान्यसंगत्वादिसाधयितुमीश्यते उत नेति विकल्प्याद्यं दूषयति तत्रेति स्फटिकरज्जुसर्पदृष्टांतेनाविक्रा
रित्वसिद्धिः दर्पणदृष्टांतेनैकत्वस्य घटाकाशदृष्टांतेनासंगित्वस्येति विभागः द्वितीयेतद्दृष्ट्यर्थप्रसक्तिरित्य

तत
१८

र्थः असंभावनानुच्छिन्नवर्तनोपयोगान्नवैयर्थ्यमित्याह नेत्याहेति असंभावनानिवर्तकत्वं तस्मात्तत्साधकत्वमेवास्ति
स्यादित्याशंक्याह प्रमाणमिति निरपेक्षाणमः प्रमाणशब्दार्थः सदेवमित्यतेनैव विषयत्वमुपपाद्यते तस्मात्वे तस्म
कृतस्य घटकतासंगतेरित्याशंक्याह स्यादिति ननु व्यवहारयोग्यत्वं व्यवहारयोग्यतया विषयत्वसिद्ध्या वध्यास
सिद्धिस्तत्सिद्धिश्चाध्यासादित्याह प्रसज्यव्यवहारयोग्यत्वमितीतरेतराश्रयत्वमुक्तं तदसंभविनिर्विकल्पचैतन्येऽज्ञान
ध्यासदर्शनादित्याशंक्याह ननु सविकल्पेतिपरिच्छिन्नस्य योध्यासस्तस्येत्यर्थः तर्ह्यहंकाराध्यासेन सविकल्प
चैतन्येहंकाराध्यासस्य तानिमित्ताशंकेतरेतराश्रयान्नैवमित्याह तत्रेति अव्यवहारयोग्यताध्यासयोरागन्तुकत्वा
नादित्वेनेत्युक्तमसंगतमित्याशंक्य प्रथमं टीकातो वहिःसमाधानमाह निर्विकल्पइति अपरिच्छिन्नेपि गगनादौ स राम
विकल्पकाध्यासंदर्शनादित्यर्थः संविकल्पकस्यैवाधिष्ठानत्वमित्यभिनिवेशश्चेत्तर्हि तदपि तत्संपादमित्य १८

हस्तज्ञानेति अज्ञानाध्यासेन सविकल्पकेहंकाराध्यासः अज्ञानाध्यासस्य चानादित्वान्नेतरेतराश्रयत्वं प्रकारां
तरेणेतरेतराश्रयनिरासमाह पूर्वेति आत्मनोधिष्ठानतोपदर्शनानन्तराध्यासभाष्यव्याख्यानं विहाय प्रतिकर्मव्यवस्था
सपादनस्य प्रसंगानपश्यामइत्याशंक्य सिद्धांतिमते प्रमातृत्वादिव्यवस्थासंभवाद्विकारित्वादिकमाश्रयणीयं त
थाध्यासानुपपत्तिरित्युत्तरग्रंथव्यावर्त्याशंकामाह नं त्वित्यादिना चमते किमात्मनः प्रमातृत्वमुताहंकारस्या
द्येपि विद्यमानं प्रति कर्तृत्वमात्रत्वमुतनित्यप्रमाश्रयत्वं नाद्यइत्याह अविकारीति बोधस्य स्वरूपत्वादपि न साध्यत
मित्याह वैतात्मेति प्रयोजकत्वाभावादपि न पारणम तथाहि किंदुःखपरिहारात्फलनसुखनो द्योतिदुःखस्वभा
वत्वादित्याह नित्यकलंकस्वभावेति द्वितीयं प्रत्याह आनंदस्येति हेतुसंबंधाभावादपि न परिमाणइत्याह संगस्येति
अविकारिपदसूचितं हेतुयन्नित्यप्रमाणेति प्रपितिः प्रमाणशब्दार्थः प्रमातृत्वाभावे कर्तृत्वाद्यसंभवात्तमा

नल

१८ नत्वमेवेत्यभिसाशंक्याकर्तृत्वाद्यसंभवोपीत्याह नवेति माभूत्कर्तृत्वादिकमित्याशंक्याहेतीति अहंकारस्याप्रमातृत्व
मितिविकल्प्यान्तरं निरस्यसहंकारस्येत्यपरिणामित्वे चात्मनः स्वरूपत्वेनान्यवत्साप्रमातृत्वमिति शंकते जडेति
प्रसंगोनद्रुषयति तदहेति विशेषाविशेषेपि संभवंधाभावान्नसर्वप्रकाशत्वमित्यपि वाच्यमित्याह सर्वगतत्वादिति
पूर्वपक्षमुपसंहरति तस्मादिति न कस्यापि समतेयमनारोपपत्तिरिति वैतण्डिकः प्रत्यवतिष्ठते वापरइति प्र
मातृत्वादिव्यवस्थानसंभवतीति किं सर्वगतात्मवादिनां चोद्यं उताणुपरिमाणात्मवादि। नामाहोदेहपरिमाण
त्मवादनामिति विकल्प्याद्यं दूषयति नतावदिति तत्रापि व्यवस्थानुपपत्तिसाम्यादित्यर्थः द्वैतिमते आत्मनः
सर्वगतत्वेपि विकारित्वात्सममवेतज्ञानेन प्रमातृत्वं संभवतीति शंकते कथमिति ज्ञानस्य क्रियात्वमु राम
गुणत्वं उपपद्यथापि क्रियावदात्मसमवायुतप्रदेशसमवायीति विकल्पाद्यं अनुवदति यदि नावदिति पक्ष १८

तरनिरसनेनोक्तेर्थेहेतुमाहतिरवयवइति। तनः किमित्यत्राहं तदेतिसर्वस्यात्मसंयुक्तत्वेहेतुमाह युगपदिति
क्रमेण सकलसंसर्गस्यात्मास्वप्पसंभवः तदर्थ युगपदिति सर्वस्याश्रयसंयुक्तत्वेपि ज्ञानं कृत्तिपपावभासि
किं न स्यादिति तत्राह प्रदीपादितिगुणदिशा दार्थः प्रदीपगतप्रकाशगुणस्येषु गतक्रियापात्स्वश्चाश्रयसंयुक्त
वस्तुप्रकाशनभेदनलक्षणातिशयहेतुत्वादितिहेत्वर्थः संबंधाविशेषेष्वदृष्टनियमइति शंकते दृष्टेनेति
अदृष्टव्यतिरिक्तं पुष्पलकारणेसत्यदृष्टाभावेन कार्याभावादर्शनान्नैतदित्याह न प्रदीपादिष्विति सप्रयुक्तं बोधक
त्वं वस्तुसामर्थ्यं शादार्थः इतोपि नादृष्टस्य नियामकत्वमित्याह सुखेति हर्षादिशादिशार्थः रागपुण्यल
क्षणादृष्टस्य सुखदुःखसाधनसम्बन्धकारादिति नियामकत्वे प्युपेक्षणीयज्ञानहेतुत्वं तस्यानुपपत्तेरित्यम
नियमइत्यर्थः यद्यञ्जनं कृतं त्रेनभास्यतइति नियमात्राति प्रसंग इति शंकते जनकइति तथापि कथमिति

तत्व०

१८० प्रसंगनिरासइत्याशंक्यसर्वस्याजनकत्वादित्याहनंसर्वमिति किं ज्ञानस्यजनकमात्रभासकत्वंस्वभावः उतविषय
जनकभासकत्वमिति विकल्प्याद्यमितिचेत्तस्यत्वपाद्दूषयति नंचक्षुरादिष्विति द्वितीयंदूषयति विषयस्येति अजनक
स्यापिविषयत्वदर्शनाज्जनकमेवभासयतीति नियमानुपपत्तिरित्याह प्रदीपादिष्विति ज्ञानस्यगुणत्वपक्षेजन
कभासकत्वनिराकरणक्रियापक्षेतिदिशाहक्रियान्तरपइति ज्ञानस्येदिषुविषयातिशयाधायकत्वात्सर्वस्यवानुवि
ष्टत्वात्सर्वग्रहणमित्याशंक्यव्यभिचारेणदूषयति इष्टदीति आत्मनः सर्वसंयोगानुपपत्तेर्नतद्वारेणतत्समवेतज्ञानस्य
सर्वभासकत्वमितिशंकते निरवयवत्वादिति अव्याप्यवृत्तिसंबंधस्यसंयोगत्वादात्मनश्चनिरवयत्वात्प्रेतत्संभव
इत्यर्थः नाहेणनमात्रंभायात्संयोगासंभवाविशेषादित्याह नाकिंचिदिति आत्मनः संयोगासंभवेपिज्ञानस्यस्व राम
संसृष्टविषयोधित्वमित्याशंक्याहकिंयागुणयोरितिसंसर्गाभावेपिबोधकत्वनिरस्यत्यसंसृष्टइतिअतिप्रस १८०

गादित्यर्थः ज्ञातस्यात्मैकदेशसमवायित्वात्रसकलभासकत्वमिति शंकते योतिनिरवयवात्मनि प्रदेशासंभवउक्त
इत्याशंक्योपाधिकृतप्रदेशमाह शरीरेति सक्रियैकदेशः संसर्गे सतोवा तत्राद्यंदूषयति तर्हीति प्रदेशस्यकल्पितत्वे
तत्समवेतज्ञानस्यापिकल्पितत्वादित्यस्यदृष्टरताधिकृत्यस्यादित्यर्थः एकदेशसमवायेपि दूषणांतरमाह नव्यवहि
तेतिप्रकाशस्याश्रयद्वाराविषयसंबोधोवक्तव्यः नवाश्रयस्यव्यवहितविषयसंसर्गइत्यर्थः प्रदीपस्याविषयासं
सर्गेपितत्प्रभायामथाभासकत्वं तथा ज्ञापीत्याशंक्य तत्रभायाद्रव्यत्वाभ्युपगमतथाघटतेनतथान्नज्ञानस्यद्रव्यत्वा
दित्याशयेनाहनवेति आश्रयेकदेशस्याविषयासंसर्गेपीतरप्रदेशस्यविषयेणसंबंधात्तत्रथमयुक्तमित्या
शंक्याहनचानाश्रयेति आश्रयात्मनोविषयासंबंधित्वेनितस्याज्ञानस्यविषयेतिशयाधायकत्वंस्यादितिशं
कतेनन्वभिचारेति दृष्टांतासंप्रतिपत्तोत्तरमाहनेतत्सारमिति छेद्यायाः सामर्थ्यंक्रियासामर्थ्यंदृष्टंवतक्रिया

तत्त्व०

१०० सामर्थ्यं चेति तथोक्तं इत्यादिक्रियापाकस्वान्तसंयुक्तेति शमाधायकत्वं दृष्टं तथा चाभिचारकर्मणोऽदृष्टपुरुषान्त
रावसंयुक्तस्य देवतात्मनोऽनर्थाधायकत्वं कल्प्यत इत्यर्थः अभिचारक्रियया समाराधितः परमेश्वरोऽन्यत्रान
र्थहेतुरित्याह ईश्वरेति अभिचारक्रियया चिकित्सयोऽन्याघ्नते सा वान्यत्रानर्थजननयतीत्याह हेत्वंतरस्येति चक्षुष
संनिकर्षयज्ञानस्येन्द्रियसंयुक्तेति शपथायकत्वा त्वातिप्रसंग इत्याशंक्याह न चात्मेति आत्मभासा साक्षात्संबं
धाभावेऽपि परंपरासंबंधमाश्रित्य विषयभावोपपादनेति प्रशान्तिरित्याह विषयसंयुक्तरतिसं चक्षुष्यसन्निकर्ष
स्य ज्ञानोत्पत्तेरूर्ध्वं सत्वकल्पकाभावादुत्तरस्य च ज्ञानस्य विषयसंबंधाभावान्न तत्साधकत्वमित्याह पूर्वेति स
र्गितात्मवादे विषयप्रकाशव्यवस्थामभिधाय संमातारप्यव्यवस्थामाहैवमिति आत्मनोऽनुयेनत्समवतज्ञात राम
णुमात्रं मायांतदेहपरिमाणत्वे मामनो दूरवर्त्तिकस्तु सन्निकर्षाभावाद्व्यवहितविषयभानसंभव इत्यर्थः १००

तदुक्तमतमुपसंहरति तस्मादिति द्वैतिमते व्यवहारासंभवमंगीकरोति सत्यमिति अद्वैतिमतेपि व्यवहारासंभव उक्त
तयाशंक्य किं परमार्थतोऽसंभवः उत कल्पनयापीति विकल्प्याद्यमंगीकृत्य द्वितीयं दूषयत्यस्मत्पक्षे इति इदमंशांश
संभवाभिमतद्व्याशोऽपत्यत इति शंकानिरस्यतीदंमं सस्येति व्यापारशब्दस्य परिस्पंदपरिणामयोः साधारणत्वा
द्विवक्षितमर्थमाह व्यापार इति अंतःकरणस्य क्षणमात्रेण व्यवहितप्रदेशव्याप्त्याकारेण परिणामः कथमिति शंक
मामाह प्रकाशस्वभावमित्यादिना अंतःकरणं चक्षुरादिपर्यंतमविच्छिन्नदीर्घप्रभाकारेण परिणमत इति संबंधः तत्र
तमाह बलवत्सर इति आखंडलाधिष्ठितकाष्ठायां सहस्राश्रसपमात्रे तत्किरणानां मंदिरव्याप्तिदर्शनादित्यर्थः
तेजसोऽतिदूरगमनेप्यंतःकरणस्य क्रिमायातमित्यत आह प्रकाशकभावेति प्रकाशकभावेत्वे चात्मनः परिण
मोन दृष्ट इति त्राह सावयवरति कदाचित्कविद्विषये तःकरणस्य परिणामि को हेतुरिति तत्राहादृष्टेति आत्मी

तत्व०१

१०१ कआदिशब्दार्थः प्रतिपादनफलमाह परिणामेति परिणामद्वारेण योग्यमवस्थाविशेषः सकर्तृकर्मसंबंध इति सं
धः अवस्थाविशेषमावधानीस्यक्तं तत्राकाशावस्थाविशेष इति शंकायां वा परिणमे तितत्रैव मित्यादिटीकायाम
यमर्थः तत्रास्मत्स्वस्यविषयेसत्येवं भूतस्य चैतन्यैकरस्यासहंकर्तुरकार्यौध्यासमुपगतस्य विशेषः सत्वप्रधान
तः करणपरिणामव्यापारविशेषस्य प्रयोजनमाह सकर्मकत्वादिति हर्षादिविशेषदर्शयति कर्मकारकेति कर्मप्र
रकाभिमुखत्वे हेतुमाह संकर्मकत्वादि आश्रयगतातिशयाधाने हेतुमाह स्वाश्रयेति स्वाश्रयगतस्वोत्कहेतुत्वादि
र्थः गर्भिकयाया: कर्तरिगमंप्राप्तातिशयजनकत्वं दृष्टं तद्बुतज्ञानस्यापि क्रियात्वात्स्वाश्रयएवातिशयजनकत्व
मित्याशंक्याह स्वेपि प्राप्नोति क्रियाहितस्य कर्तृसमवेतत्वात्मसंबंधस्य यथा गामवपंतथाहानस्यापि सक
र्मकत्वात्तदाहितः संबंधोऽस्ता तद्विशेषतालक्षण इति आत्मनो विषयविशेषसंबंधाभावान्ननभानमिति शं

राम ०२

+ स्यात:करणव्यक्तनपातदाकारत्वेप्यस्वछविषयानभियक्तनपातदाकारयत्ताभावात्क पंघटा +६ शोध

नेस्यादंतःकरणस्येति आत्मनोपि परिणामद्वारा तत्संबंध इत्याहं तदाहेति अंतःकरणस्य विशेषेण संबंधो य
स्मात्तस्माद्विषविशेषसंबद्धमंतःकरणं वैतन्यस्यावच्छेदकं स्वगतविषयविशेषसंबंधचैतन्यआपादयतीति टीका
र्थः आत्मनोविषयसंबंधसंभवो ~~ऽस्ति परिणामेनेत्याशंक्याह सर्वत्रेति~~ नैमित्यकत्वात्क पंयवहारहेतुत्वं तत्राह सर्व
चेति अविद्यवा सर्वगतत्वेन स्वत एव विषयसंबंधसंभवात्किं परिणामेनेत्याशंक्याह सर्वत्रेति सर्वत्र विद्यमानम
पिं विद्यावृतत्वयानभिव्यक्तस्वभावमपि चैतन्यस्यांतेन तेनाकारेण व्यज्यत इत्यन्वय येणाकारेणेति वीक्षायामा
हांतःकरणमितिपरिणामोवस्थाविशेषशब्दार्थः इत्थंभावे तृतीया तदाकामिति घटमात्राकारमित्यर्थः चैतन्या
दि साधकत्वमितिशंकते ननु प्रमातृरूपेति विषयावच्छेदेति विषयेणावच्छेदस्तद्व्यक्तेनेत्यर्थः अंतःक
रणवदविषयस्यापि तत्संबंधस्य चैतन्यकं जकत्वाविरोध इत्याह तदोहेति कर्मकारकमित्यादि टीकाया

MEMORIA

१०२ एवोऽर्थः कर्मकारकमपरोक्षतामभिव्यनक्तीत्यन्वयः विषयेऽपरोक्षतास्त्वनावेति यत्किः सैव कुत इत्यत्राह चैत
न्येति विषयस्यैचैतन्याविवर्तत्वात् तत्रापि तदस्तीत्यर्थः व्यंजकत्वे हेतुमाह स्वव्यापारेति स्वव्यापाराविष्टत्वस्यांगं तु
कत्वे हेतुमाह प्रधानक्रियोक्तिवृत्तिः प्रधानक्रियाशब्दार्थः स्वव्यापाराविष्टमित्यत्र कर्मकारकस्य चैतन्यव्यंजक
त्वमुक्तं तदसंभाव्यं प्रकाशत्वाभावात् व्यापारस्त्वकीदृश इति न ज्ञायत इत्याशंक्याह स्वव्यापाराविष्टमित्यापवत
द्रुतजाड्याभिभवलक्षणचैतन्याभिव्यंजकत्वरूपयोग्यत्वरूपेण ततो योक्तं अतः करणस्याविद्यंजकत्वस्याभवद्वि
षयस्य तत्कथं स्यात्तत्राहांतःकरणमितिर्यथा प्रदीपः स्वस्मिन्नंधकारसंसर्गविरोधी संसृजि निविषयेऽपि
यकारसंसर्गः न द्व्यंजकभेदाद्व्यंग्यापि भेद इति न परस्परसंसर्ग इत्यर्थः प्रमातृरूपस्यावभासो येन चैतन्येन तत्प्रमा राम
तृरूपावभासं जेन संसर्गः अथ वा प्रमातृतयः प्रसाशंकारः सचासावबभासश्चेति प्रमातृरूपावभासइत्य १०२

र्थः संसर्गाभावे को दोष इति तत्राह संसर्ग इति तत्र हेतुमाह अनुभवेति व्यंग्यत्वेनान्यभेदादित्यर्थः मयेदमवग
तमिति संबंधावबोधः संबंधावगमशब्दार्थः पदार्थयोरिति प्रमातृप्रमेययोरित्यर्थः अनुभवभेदोऽस्त्वित्यस्या
ह तत्राहेति प्रधानक्रियया हितोपः प्रमातृप्रविष्ठाविशेषः तेन हेतुना वच्छिन्नो तिव्यक्त्याया अपरोक्षता तयाऽस्य
प्राप्तिमिति विग्रहः विषयविशेषसंबंधोऽवस्थाविशेषशब्दार्थः विद्यंजकत्वयोग्यताऽऽकरूपाभिसत्त्वे समानरूपत्वा
निर्दिश्यतरमिति शंका स्यात्तदर्थनामाहैकमिति अवच्छेदकभेदेनानुभवभेदन उच्यत इत्याशंक्याह परिणामस्येति
व्यंजकभेदे व्यंग्यभेदो भवेत् न च तथात्र एकस्य परिणामात्त्वापानतानाभिव्यक्तिरिति वादयति नन्वभयत्रे
विशेषाभावे सिद्ध इत्याह नेत्याहेति परिणामविशेषो वस्थाविशेषशब्दार्थः प्रमातृस्वरूपजिज्ञासायामुपाधिज
नितो विशेषः फलमिति फलस्वरूपं कथ्यत इति संगतिरित्यत्राह प्रमातेति टीकापेक्षितं हेतुमाहं कर्तृहीति

त्रमात्रफलसांकर्यापातात्र चैतन्यस्यैकतयाभिव्यक्तिरिति शंकते ननु चैतन्यस्येति कर्तृफलयोर्भेदस्य क्वोक्तत्र
सिद्धत्वात् तदसिद्धमुत्थं कर्तुः फलत्वमित्यर्थः उपाधिभेदादसांकर्यमित्याह तत्राहेति उपाधिमेव भेददर्शयन्नंतः
करणेति विषयस्थस्यासावपरोक्षैकरसश्चेति तथोक्तः आत्मेति शेषः बोधैकरसस्यात्मनो जन्यत्वात् कथं फल
त्वमिति शंकायां विषयानुभवसंस्कारादिरूपं वृत्तिसंसृष्टविषयाभिव्यक्ते चैतन्यस्य विषयानुभवत्वं ततश्च फल
त्वव्यपदेशउचित इत्यर्थः नन्वेवसंतिक्रियाफलयोः समानाश्रयविषयत्वप्रसिद्धेः विरोधः स्यादिति शंकते
ननु क्रियेति क्रियायां अंतःकरणपरिणामत्वात् समवायित्वं फलस्य तु चैतन्यप्रतिबिंबत्वाद्धि बंधनात् समवायि
त्वमिति भिन्नाश्रयत्वं तथा तयोर्भिन्नविषयत्वं च क्रियाया घटविषयत्वं चैतन्यस्यांतःकरणप्रतिबिंबतया तत्ता
धृतत्वं न च वृत्तिसंसृष्टविषयस्थस्य चैतन्यं तद्विषयमिति शंक्यं विज्ञापा यावृत्तिस्तद्विषयात्वादित्यर्थः भिन्ना

श्रयत्वभिन्नविषयत्व असिद्धमित्याह ऐसाहेति समानाश्रयविषयत्वप्रसिद्धिविरोधाशंकायां समानविषयत्व
मेव समाधीयते तत्कस्यादित्याशंक्याह विषय इति आश्रयविषयाभेदस्योक्तत्वात् कथं फलस्य क्रियासमाना
श्रयविषयत्वं तत्राह तदातःकरणेति परिणामैक्याध्यासादात्मनः क्रियाश्रयत्वं अंतःकरणस्य चात्मैक्यारोपाद
नुभवाश्रयत्वं वृत्तिसमानाश्रयत्वमतः करणवृत्तिसाधक चैतन्यस्य प्रसिद्धघटसाधकत्वात्तयोरेक
विषयत्वं चेत्यर्थः कर्मकारकाभिव्यक्त चैतन्यस्य तत्साधकत्वे सांख्यवचनविरोधः स्यादिति वादयति ननु तत्सि
द्धमिति विरोधमिति रासंप्रकारमारभ्य मति वृत्तिद्वारा बुधवत्तेष्यति विवितो भवतिप श्चात् बुध्येक्याध्यास
मात्र आत्मावृत्तिसंसृष्टविषयचैतन्याभेदेनाभिव्यक्तोर्थवेतयत इरास विरोधः आत्मनोभिव्यक्तस्याप्युपा
मेविघायातिवृत्तत्वात्संसर्गोच्छेदः स्यात् विशेषमात्रतावत्स्यात् असतोनभिव्यक्तौ विषयाभिव्यक्ति

तत्व॰
१०४ नस्याद्विषयाकाशस्याहोत्कमिति सर्वगतस्यापि घावच्छिन्नप्रकाशस्यात्मनोऽन्तःकरणपरिणामोपाध्यभिव्यक्त्यपेक्षणी
यमात्वत्वभिमतं नयः न चाविद्यानिवृत्तसंसारोच्छेद इति वाच्यं पूर्णाकारपरिणामस्य निवर्तकत्वाच्च दाकारपरि
णामस्य परिच्छिन्नत्वान्निवर्तकत्वं तत्रैवाभिव्यक्तत्वात्तन्मात्रत्वं वेत्याशयेनाह परिच्छिन्नेति यात्मनः स्वप्र
काशत्वात्कथमागन्तुकाभिव्यक्तिरिति शंकते नन्विति विषयस्य वैजस्य वरापास्याभिव्यक्तत्वादभिव्यक्ति
पुच्छेत्साह वारणेति अभिमतशब्देन प्रतिबंधोपि वस्यात्विषयावच्छिन्नात्मा ज्ञानानि वर्त्तिर्वा परिमाणल
क्षणोपाधौ प्रमाणं प्रच्छति नन्वित्यत्रेति श्रुतिः प्रमाणमित्याह श्रुतिमिति न तत्र कज्जादि धार्मिकं मनउक्तं न च ज्ञा
नपरिणामवद्दतः करणमिति तत्राह धीशब्देति ज्ञानपरिणामवद्यन्मनः तद्धि ज्ञानबुद्धिरित्युच्यत इत्यन्वयः रामः
धियि मनसो रेभ्रतात्मपरिमाणवतो बुद्धेः सिद्धे सर्थः विषय यथावस्थापासिद्धत्वान्न वेत्यादिग्रन्थवैयर्थ्यम १०४

नाशंक्योपसंहारतया व्याचष्टे तदेवमिति उपाधितोयवस्थाभावेपि तद्वत्तान्याय चोदितं सर्वमस्यमासेनेति तस्यारि
रतीयान्वयः यस्यकारकस्य प्रधानक्रियासाधनत्वं तत्रिष्ठरा वानुभवइति कथमुक्त सत्वं विषयानामपि वित्संनिधाने
विघंजकत्वाविशेषात्त त्राह परिणामेति परिणामेन संसृष्टो यः कस्मंकारकलक्षणउपाधिः तत्रैव वैतन्याभिव्यक्ति
नियमान्नातिप्रसंग इति भावः तत्रेत्यादेरयमर्थः स्वप्रकाशस्य न तवच्छिन्नस्यात्मन एकविषयमानेसकलविषय
मानस्यान्न च तन्न द्विषयव्यक्त्यैतन्यस्य न तत्साधकत्वांगीकृतेनीयं प्रसंग इति शंक्यपरिणामविशिष्टविषयस्य
व्यंजकत्वेगौरवाद्विषमानस्यतव्यंजकत्वमिति वाच्यं तदावाति प्रसक्तिरिति बोधार्थः कत्रादिकारकाणि संभवज्ञा
नंसाधयंजीयविवादं तयाच कामरक्तोतरयेन कर्मकारकेण संहतसाधनं तेन ज्ञानेन संसृष्टव्यक्तोनुनवेनतत
सिद्धिः वगौरवचोद्यं प्रामाण्णि केथे गौरवस्यादोषत्वादिति समाधानग्रंथार्थः प्रकारान्तरेणानियमता शंकतेनन

कर्मैतिरदमुक्तं भवतिपरगतसोक्षस्य सर्वसाधारणत्वसत्त्वमक्तं चेतन्यास्यापि सकलजनसाधारणत्वान्नियम इति सा
धारण्य। नासिद्धमित्याह नेत्याहेति येन प्रमात्रा सह प्रधानक्रियायाः साधनकर्मकार्यं तस्यैवापरोक्ष्यमिति कथं नियम
प्रदीपस्य व्यक्त्यतिरिक्तानामपि तदुपनिकार्यदर्शनादित्याहैतद्धिति तन्मात्रभेदेनाभिव्यक्तस्य विषयगतचैत
न्यस्य तत्साधककृत्वांगीकारात्सकलप्रमात्रभेदेनाविनाभियत्वस्फुरत्वान्नसर्वेषां भावप्रसंगइत्यर्थः उक्तां व्यवस्थामापेक्ष्यस
माधानपरः सरंस्पष्टी कर्तुमाक्षेपमवतारयति नन्विति सर्वगतनित्यप्रकाशात्मनः शुद्धस्वप्रकाशज्ञानसामर्थ्ये
पि नित्यप्रकाशनानुपकंभात् पाधिस्वीकार्यश्चेत्तत्रोपाधेः कुत्रोपयोगइति विवेचनीयं किं विषयप्रकाशने उत तदुप
रागइति नाद्यं प्रतिक्षिप्यति न चेति द्वितीयमनुवचनदति विषयेति विषयसंबंधवदुपाधिसंबंधोप्यसमर्थ राम्
संबंधेरा विषयसंबंधोपि स्यादित्याह तन्कारणेपीति सर्वासाम्युपाधिश्चेति वदुपाधिनेनेत्यर्थः उपाधेरति १०८

रूपणात्मनः स्वसंसृष्टसकलभासकत्वापादनमाकस्मिदं सहमानः सिद्धान्तीकसापत्तिष्टते स्यादेतदिति किं जी
वस्य सकलभासकत्वप्रसंजपासिद्धत ब्रह्मणइति विकल्प्याद्यं दूषयति अंतःकरणेति अवच्छिन्नः प्रातिस्विकस्थानीयइ
तिवमतद्वयमनुसरत्स्योक्तमिनेद्दूष्यं द्वितीयेष्टिष्टापत्तिरित्याह अस्मन्निति प्रत्यक्ब्रह्मणोरभेदात्तद्ब्रह्मगतसार्वज्ञ्यं जीवे,
स्यान्न जीवगतात्मज्ञत्वं च ब्रह्मणीसाशंक्योपाधिभेदाद्व्यवस्थेत्याह नवेति परिच्छिन्नस्यापि जीवस्य पुगतपरसकल
संसर्गवत्कृतिसंसर्गस्याथ संभवात्कस्य सरापेभानं न स्यादित्याह नेतसारमिति परिच्छिन्नस्यापि जीवस्य वृत्तिद्वारा।
विषयचैतन्यासंबंधात्तद्भासकत्वं पुक्तमिति शंकते नन्विति परस्पर्यान्वयपादित्सत्र वृत्तिद्वारेत्यनुषंगः अतिप्रस
गेनोत्तरमाह नैतद्युक्तमिति एकोपाधिसंसर्गाद्विषयजीवचैतन्ययोरभेदेनाभिव्यक्त्यभ्युपगमे सर्वज्ञत्वादिकं ब्र
ह्मणो जीवस्य चैकान्तःकरणसंसर्गदभेदाभिव्यक्तिरिति सर्वज्ञत्वादिकमपि जीवस्य प्रवीप्यादित्यर्थः तुच्छावच्छिन्नो जीव

१०८ इति नोपेपनेभिन्नत्वविद्यावच्छिन्नः सर्वगतश्चेनितनश्चविषयं संसर्गितज्ञानघटनइत्याथेपि नार्हं सर्वससक्तिन्तास्सर्वजीव
पङ्क्षेदित्याशंक्याह सर्वगागनममीति स्वपमपीयस्याय मर्थः चैतन्यं स्वरूपेणापि न प्रथते अन्यं न प्रकाशयतीति किमुव
क्तव्यं अप्रकाशमानं तेषिनपनवज्ञासक्तमित्याशंक्यं अत्यवपानेनवकाशकत्वान्नैव मित्याह नं चेति अविद्यासर्वं यतो वपरि
च्छिन्नानामानाभावातेनन्दिनीयः परिच्छिन्नस्य सर्वगतचैतन्यतिरोधायकत्वासंभवादित्याशंक्याह अंगुलिमात्रेणेति परि
च्छिन्नेनपीसन्नापि शब्दादज्ञानस्यापभिच्छेदस्य अयतिमापांनुपरुन्ति विंद्यादित्यादिमासक्तकमन्तनोति पादानतयासंसर्ग
नयतिपनेरित्यर्थः तदविद्यावन्नत्वात्किंचिदपि जानीयात्तप्रज्ञानेनासर्वंजानीयादित्याशंक्याह नत्रांतःकरणेति अ
हंकारादि पादिसह कृतमंतःकरणं यदाकारेण परिणमते तेन संसर्गात्तद्विषयावच्छिन्नाविद्यानावरणाभिभवेन स्यात्रकाशो रम
नान्यस्येत्यनेनमित्यर्थः कार्यस्य कारणाभिभावकत्वादर्शनादन्तःकरणस्य तत्त्वाभिज्ञाभावकत्वमयुक्तमित्याह तदपि १०८

MEMORIA

न युक्तमिति अंतःकरणावच्छिन्नत्वे विद्यावच्छिन्नत्वे वप्रमानत्वादियवस्थाघटनइत्याह बोध्यत इति नन्न प्रथममविद्यावच्छि
न्नत्वमादाय व्यवस्थामुपपादयन्नित्यादिना संयोगमावेप्यप्रकाशकत्वं कुतःस्यादित्याशंक्याह प्रकाशस्य चेति असंगत्वे
पि ब्रह्मणो यथा सकलभासकत्वं तद्वज्जीवस्यापि स्यादित्याशंक्य वैषम्योपणेत्तरयति अस्मत्त्विनितदभिदात्तजीवस्यापि तथा
मित्याशंक्याह न जीव इति चिन्मात्रस्य तदभेदेपि परिच्छिन्नतानशक्तेर्जीवस्यानोपादानत्वं ततः सकलभासकत्वानुपपत्ति
रित्यर्थः तदेवं स्वताविषयसंबंधाभावात्तत्सिध्यर्थमुपाधिराश्रयणीय इत्युक्तं नत्रोपाधिसंसर्गवद्विपप्रतं सर्पेपि स्या
त अन्यथोपाधिसंसर्गस्याप्यनुपपत्तिरिति शंकते ननु पंगुनीरिनि सर्वगतत्वेपि कस्यचिन्नेनचित्संअसर्गः क्रमविदसं
सर्गस्त्वभयवापि क्व नात्र विरोध इत्याशोषत इति सर्वगताजातिरितिमतमाश्रित्य दृष्टांतमाह यथेति व्यक्ति सर्वगतजा
तिरपक्षे दृष्टांतमाह यथात्र दीपेति स्वरूपेणासमर्थस्याप्युपाधिसंबंधात्सामर्थ्ये दृष्टांतमाह यथा चेति केचलेनात्रक्ष

तत्व०

१०

स्याअविषयाः परिणताहंकारसमानत्वेनात्मनाप्रकाश्यंतइत्यन्वयः सर्वगतोजीवइत्यादावप्रतिकर्मव्यवस्थास्थापिता
संप्रतितस्यपरिच्छिन्नत्वेपिव्यवस्थाघटत्विप्तुशंक्यतइत्याहाथवेति सोपाधिकत्वादिति अंतःकरणोपाधिकत्वादित्यर्थः
अहंकारावच्छिन्नचैतन्यस्यविषयचैतन्यासंबंधाद्विषयभानासंभवइतियदुक्तं तद्दूषयतिजीवेतिजीवावच्छेदेनिमि
त्तंपदन्तःकरणंतस्यपरिणामसंसर्गेणकृताभिव्यक्तिर्यस्य तत्तथोक्तं विषयप्रमातृचैतन्ययोरेकांतःकरणपरिणाम
संबंधाद्भेदेनस्फुरणंसोविषयप्रथोपपद्यतइत्यर्थः प्रसंगब्रह्मणोरथेकांतःकरणसंबंधात्ब्रह्मणोपिप्रत्यक्षेनस्फुर
णंस्यादितिपदवादितत्रकिं ब्रह्माकारपरिणतांतःकरणमात्रसंसर्गादिति विविक्तत्याद्यं दूषयति ब्रह्मेति द्वितीयं दूषयति
नचेति अंतःकरणससर्गेणव्यक्तिवयव्रब्रह्मव्यक्तिरपिकिंनस्यादित्याशंक्यदृष्टांतासमस्योत्तरमाहतीवाकारे राम
तत्रविनिगमनमाहान्यथेतिजीवाकाराहंवृत्त्यभावेजीवस्यभावनादर्शनादित्यर्थः बुध्यवच्छिन्नोजीवइतिमतेप्रमातृ १०७

त्वव्यवस्थोपपत्तेरुपसंहरसतइति जीवस्यसर्वगतत्वेविषययोपरागार्थमुपाधिरेवव्यवद्दृक्तं संप्रत्यावरणाभि
वार्थमितिमतांतरमुपन्यस्यत्यर्थवेति विषयाकारेणपरिणतांतःकरणमंतःकरणशब्दार्थः विषयस्यविवृतावरण
मावरणशब्दार्थः कार्यस्यकारणाभिभावकत्वेनेति यदुक्तं तत्राह द्वैषमितिवेत्स्योदुन अभिशब्दार्थः प्रतिकर्म
व्यवस्थामुपसंहरतीति सिद्धेति सर्वगतत्वेविषयोपरागार्थत्वेनावरणतिरोधायकत्वेन वोपाधिउपयोगः परिच्छि
न्नेत्वेविसर्गार्थमिस्कपाध्यपेक्षापाव्यवस्थायुक्तेत्यर्थः प्रइति शब्देनाद्वैतिमतनिरवद्यतोच्यतेविषयाभिव्यक्तेर्व
तन्येतत्रनीतिमिहितत्वाद्विषयसंविदोषाभेदानभिधानेनान्त्कथमपराधात्रश्चोपेतेननुत्वनीलादीत्यादिना
तस्मादसंगतेयंदीकेत्याशंक्यतात्पर्यमाहविषयस्येतिविषयस्यचैतन्यविवर्तत्वेनतद्येपेक्ष्यात्मनोन्यस्याभु
पपमात्रासिध्यंतइत्याशंक्याहाहमवभासेति अहम्मसवर्गोसोयस्यसतथोक्तंतेनाभिन्नमित्यर्थः प्रमातृविष

तत्व

१०८ य चैतन्ययोरभेदोनाभिव्यक्तेनुपपादनादस्तिवोघावसरइत्यर्थः अनुवृत्तव्यावृत्तभावेनविमयसंविदोभेदेपिविषयस्यभे
दाभ्युपगमादपसिद्धांतप्रसंगोदुर्वारः ततोमैवमित्यादिग्रंथासामजस्यमांशेक्यश्रियक्विवित्साम्येनापसिद्धांतं ब्रवीषु
तसर्वसामोनेतिविकल्प्याद्यं दूषयतियक्विविदितिसर्वासाम्यत्वंसिध्यमित्साहाणिनेनिसिद्धांतभेदमेवाहक्षणिकादितिवा
धितस्यापितत्वंतन्मतेयस्तीतिविशिनष्टिवाधिनामितिविषयाणांसवेदनप्रतियोगिकप्रामाणीकभेदाभावेपिआरोपितभे
दोररीकरणान्नमीमांसकमतप्रसंगोपीत्यर्थः गोगौरित्येकरूपताप्रतिभासेविगोभेदस्तयाश्रीयतेनतद्वत्रापीतिशंकते
स्तितिरद्मुक्तंभवंतिखंडमुंडादिभेदस्याध्यक्षसिद्धत्वात्गोगौरित्यनुवृत्तंप्रत्ययंस्ययथासामान्यविषयत्वंतथासंविद्य
प्यनुवृत्तप्रत्ययस्यसामान्यविषयत्वंभेदप्रतीतेश्चव्यक्तिविषयत्वंतदावनंसंविदेक्यमितिभेदावभासेप्यपरोक्षतः नभि रास
द्यतइतिकथमुक्तंभेदावभासस्यव्यक्तिभेदविषयत्वात्प्रत्यभिज्ञानस्यैवसामान्यविषयत्वादिति तत्राह स्वरूपेति १०८

दृष्टांतेव्यक्तिभेदस्यप्रामाणिकत्वात्प्रत्यभिज्ञायाःसामान्यविषयत्वंघटतेप्रकृतेतुसंवित्स्वेदस्याप्रामाणिकत्वात्प्रत्यभिज्ञायाः
स्वरूपविषयमित्यर्थः ननुनेकसंवित्सांतसंविदितिभेदःप्रतीयतेतत्राहपरोपाधीति उपाधिभेदमंतरेणाविभाव्यमाने
भेदत्वान्नसंविदांस्वतोभेदःकिंतूपाधितोगगनभेदवदनतोनभेदप्रत्ययस्यबाधकत्वमित्यर्थः व्यक्तानुवृत्तंविषयाइव
व्यावृत्ताःतथाप्यभिन्नाइतिद्वयोर्ययनेतद्वत्संवेद्ययोरभेदइतिशंकतेनन्वितितत्रापिवास्तवमैक्यंनांगीक्रियतेन्वयानुवृ
त्तवमैक्यमिष्यतइतिवैषम्यमितिइतिवैषम्यमित्यभिसंधायाहतत्राहेति एकेनप्रामाणेनसाधितेर्थेप्रमाणांतरोपन्या
सेकिंचेत्कल्पितुक्तानचपूर्वप्रमाणोपन्यासंपश्यामइत्याशंक्याहानुवृत्तस्येतिसंवित्संवेद्ययोरनुवृत्तव्यावृत्तभेदेविधुर
तावेसत्रदृष्टांतमाह आकाशेति अनुवृत्तंनत्वंततोव्यावृत्तोभेदवत् अनुवृत्तत्वाकाशावत्तनवनीतौव्यभिचारःतस्याः
पक्षानुत्पत्वादित्यर्थः ननुकाम्मिकासंविदित्यत्रनीलसंविदोरभेदउक्तःतथावनीलसंविदोहमवभासस्यचभेद

तत्व
१००
साधनसंगतमित्याशंक्याह नीमात्मिकेति तत्र हेतुमाह युगपदिति न च संविच्छेदेन नीलविचक्षणं नीलादन्यदस्त्युच्यतां
संविन्नग्रहणे नीलमपि वाच्यं संविध्यतिरेकेन नीलाभावेन संवित्त्वानुपपत्तेर्नीलसत्वेषव्येति येनानार्थत्वात् संविद्ग्रहणे सर्वः
प्रत्यगवभासप्रसक्तत्र प्रतीचोऽवभास इति विग्रहं संक्रास्यात्तन्न च सोपपद्यते अवभासव्यतिरिक्त प्रतीचोदभ्युपगमादिति त
त्राहं प्रत्यगिति अहं नीलं पश्यामीति ज्ञानमपरोक्षमिति प्रसिद्धं तत्र न संविदो ग्राह्यत्वे विषयविषयि संविदोस्तुल्यकालत्वं संस्था
तत्र चं तद्युज्यते तस्माद्येन नीलेन संविदो भेद उच्यते तेन तस्मान्नीलादहमुल्लेखस्याप्यतत्तैणांक्षिपतेन योग्राह्यग्राहकतानावानु
भवसिद्धेति द्वितीन तद्भेदस्य प्रत्यक्षं न चाल्पविज्ञानस्य घटादेश्च भेदः न दांगीकृतः इति न साधनं प्रस्तुतानानुमारिचेतिन
न्नमभिनत्वं आलयविज्ञानस्य परैरात्मत्वेनाभ्युपगतस्य विषयसंविदद्वैतवादिभिरेभ्यंगीकृतेनीलादहमुल्लेखभि राम
न्न इत्यनुभवात्कथं तद्भेदस्याप्रत्यक्षत्वं तत्राप्यहं नीलमिति नीलात्मकसंविदरस्तादेरेवार्थः अहंकारस्य चैतन्य १०० -
१००

व्यतिरेकेऽपि वेत्तव्यमाह मितिभावत्रीलाह धियोरैक्यमित्याशंक्यापामाह पराग्भावत्त्वे इति नित्यानुमेतयत्व्यावृत्त्यर्थमपरोक्षे
ति प्रत्यगवभास इति पदच्छेदः विकल्प इत्यस्य व्याख्या प्रत्यगवभास इति अन्यत्वे हेतुमाह स्वत्वपेति नकेवलमन्यतोप
मः किं तु तदनुभावो पीत्याह प्रतीयत इति नैतत्द्वयोरपीत्यत्रावि विषयविषयिमानोनिरूपितेन तदनुपपन्नं चौत्थेन तत्त्वभ्यु
पगमादित्याशंक्याह परमनेद्विषयविषयिभावो न संभवतीति चोदयतीत्याह त्रेति कुतः इति शब्दश्चिनानुपपत्तिदर्शयि
तुमिति किं संविदासंबंधः नीलभास्क न संबंधमिति विकल्पाद्यं दूषय अतिप्रसंगादित्यर्थः संविदो नीलाकारत्वाच्च
भासकत्वमिति शंकते भासंते वेदितिसंबंधमन्तरेण तदाकारत्वे सर्वाकारतया सर्वभासकत्वे किं न स्यादित्याह सर्वमिति
द्वितीयं निरस्यति विशेषति संयोगादिरूपसंबंधाः संवित्संवेद्ययोर्नाभेदादेनानारूपणाय यमनन्तरं तीत्यर्थः जन्यज
नकतासंबंधइति शंकते नीलस्येति किं जनकत्वमात्रं संबंधः आहोस्विद्विषयत इति ज्ञानकृतं नाद्यो तिप्रसंगादित्याह

तत्व०
२००

न्द्रियस्येति न द्वितीयो मूलकसंबंधाभावाद्विषयविषयिभावस्यानुपपत्तेर्विभयतयाजनकतायोगादित्यर्थः भेदपक्षेऽपि विष
यविषयित्वासंभवसाधनप्रकारमाह तस्मादिति नीलकविज्ञानयोर्यदि यमभेदसंबंधः सामान्यस्येसाहा साधारणेति न च तत्रहे
तुगवेषणाप्रवृत्तेः साह स्वभाविकेति स्वरूपमात्रे भिन्नापयोस्तौ स्वरूपमात्रनिष्ठौ न योः परस्परमसंसृष्टस्वरूपयोरिस स्तरा
कथं पुनरिति ग्रंथः पूर्वपक्षिणः उक्तासिद्धांतिनः नाद्यः पौनरुक्त्यापातादन्त्यः सिद्धांतिनामाद्याम्नाह कांतांगीकृते त्तदूष
णासंभवात्स्वभावानुसारित्वादेसत आह सिद्धांतीन्विति तयोर्यदि याद्याम्नाहबूतावभासः सत्वन्नतेवूयं स्यादिति टीकापा
ठना अहमिदं जानामीति ग्राह्यग्राहकतानुभवविरोधान्नाभेदप्रसक्ते अनुभवबाधासिद्धोहमिदं जानामीति आकारस्तान
नयासरूपगमादिति यदुक्तं नदनुपपन्नं युगपत्संन्निविनयानुपपत्तेः तस्मान्नाकारमेकं ज्ञानमेष्टव्यमित्यत्राह विज्ञानत्वा राम
दीन्विमिति ग्रदीहीन्गहणग्राह्यलक्षणमित्यर्थः ज्ञानान्वितयेसंबंधामोनुपपत्तेरन्यस्तक्रमयुक्तं संबंधावगमस्येवसि
२००

ध्येति साशंक्यतात्पर्यमाह क्रमेतित्रितयमित्यत्रान्योन्यसंसृष्टमिति शेषः तद्वासनेत्यादेः पूर्वग्रंथे शेषत्वसंबंधावगमाभा
वप्रतिपादनस्योभयत्राविशेषात्ततस्तैपौनरुक्त्यमित्यत आह विज्ञानवादीति पूर्वत्र संविदुद्दोपगमे योयं बंधापगमः प्रसि
ध्यः सनत्यादिस्फुटं अन्नाउतस्याप्रसिध्यिरूच्यत इतिनेकग्रंथमित्युक्तः तद्वासनेत्यत्र तच्छदेनानंतरप्रसक्तसंबंधावगमनि
र्देशः शंकास्यात्तन च सोपपद्यनेतस्यविज्ञानवादिनानुभ्युपगमादित्यत आहाहमिति अहमित्येवंरूपवाल्यना संहितमित्यर्थो
विषयविकल्पितमिति विषयरूपकल्पनाविशेषितमित्यर्थः तयोर्वासनातद्वासनेति विग्रहशंकास्यात्तन च सोपपद्ये
तिज्ञानान्यवासनानभ्युपगमात्तत्राहातस्त्वेति कर्मधारयसमासे उपपत्तिं नान्यइति संस्कारश्च पदस्यापि नोभावात्
र्विज्ञानमेवसंस्कार इत्युक्तं चोद्यग्रंथे इत्युक्तः प्रागुक्तेष्वन्यस्य सकृत्ज्ञानस्योत्तरज्ञानं प्रतिवासनात्वमिति शंक्यतततन
स्योत्तरज्ञानस्यांतताकारतास्यादित्यत आह संजानीयेति विजानीययोर्वास्यवासकताप्रसिध्येरित्यर्थः प्रकृतमाह

न्यल०
२०१

तत्रेति क्रियाविकल्पप्रसयात्रितयाकारमेकमुपसंघनइत्यन्वयः आकारोसत्तोहेतुमाह कारणेति किंपुनरिसत्र संबंधावभा
सस्यानुभवानारूढत्वाभिधानात्पूर्वग्रंथशेषशंका स्यात्तन चैवं संभवति उत्तरत्र तन्निरसनभावादित्यत आह हेति
तं शब्देनसंकल्पनात्मकतापरामृश्यते प्रक्रियाया अनुभवानारूढत्वमभिनयति नं हीति नं केकमेकैकारप्रसयादर्शनेन
युत आत्मकं ज्ञानमुदेतीत्याह किं त्विति कर्तावकर्मेषानुभावतश्चेति कर्तृकर्मानुभवास्त्रयो वा आकारोयस्य सतथोक्तः
पूर्वोक्तिमाह तस्मादितिअनुभवानारूढत्वक्रियेति प्रतिज्ञाय तत्र हेतुरूपन्यस्यते क्षणध्वंसिन इत्यादिना ग्रंथेनेति
वक्तुं न शक्यते तस्यानुभवानारूढत्वासाधकत्वात् न च पूर्वपक्षिणोयंग्रंथः क्रियानिमित्तसंबंधनिरासस्य क्षणिक
त्वस्य च प्रस्तुतानुपयोगित्वादित्याशंक्य पूर्वपक्षत्वेन व्याचष्टे संस्पृमिति अंगीकृतमंशमाह नानुभवमिति प्रति राम
भासानुपपत्तिः प्रतिभासमात्रमाक्षिपति नानाभेदमिति शंकते कथमिति तत्र वक्तव्यं किं स्थापिनोः प्रतिभासस्य

२०१

प्रतिभासकभावः उत क्षणिकयोरिति विकल्प्याद्यं प्रत्याह स्थापयित्वइतिक्रियाशब्देनातरबाह्येन्द्रियव्यापारोभिधीयते
स्थापित्वे विषयावभासः स्यादितिवदता काशंका स्थापित्वाभ्युपगमो निर्दिष्टः तत्र हेतुरुत्तरत्र वक्ष्यमाण इष्टव्यः द्वितीयं प्रत्या
ह क्षणिकस्येति क्रियानिमित्तो ह्यसाधारणसंबंधः क्रियाचेणिकपक्षेनुपपत्तेसर्थः संबंधिनः प्रतिभास इति सामान्य
व्याप्तिः क्रियानिमित्तः संबंध इति विशेषव्याप्तिः ततः क्रियानिमित्तसंबंधरूपव्यापकविशेषस्य क्षणिकत्वे संभवादभे
दसंबंध आस्थेयइति समुदायार्थः संविदं प्रति क्षणं भेदस्यानुभूयमानत्वात् क्षणिकमिति कथमुच्यते आनुमानि
कभेदसंभवादित्याशंक्य विकल्प्योत्तरत्वेन व्याख्यातुं विकल्पयति तत्रेति व्यापकविशेषभावस्य क्षणिकत्वापत्त्यनन्तं निरा
करणे व्यापकविशेषाभावो न सिध्यतीत्याशयेन क्षणिकत्वविकल्प इति इष्टव्यं क्षणिकत्वस्याप्रपक्षत्वादिविकल्पासंभवइ
त्याशंक्य प्रसक्तत्वं समर्थयते नन्विति नीलाकारज्ञानस्य नीलाभावव्यवच्छेदेन नदृश्यनास्तेनपीतादिव्यवच्छेदकत्ववदत्तेम

नमाकाकारज्ञानस्यावर्तमानस्याप्यावृत्तिगमत्वात्क्षणिकत्वस्य प्रत्यक्षत्वमित्यर्थः क्षणिकत्वस्य प्रत्यक्षतामुपपादयतानिराकार
णपरत्वेन टीकामवतारयति ननावदिति भेदस्य प्रत्यक्षत्वाभ्युपगमे त्वभ्यासादितिकृ प इत्याशंक्य विद्यमानस्यापि भेदस्य
ना ज्ञाभेदनदनुपलंभ इति शंका तेनान्वितेति भेदाप्रतिभासे वोदितेसर्वविवित्वरूपानवभासनाजगदांध्यप्रसंजनमनवसरप्र
हनमित्याशंक्याह वोभिप्राय इति किंभेदः सविद्यतिरिक्तो ज्ञानांतरगम्यः स्वतु तत्स्वरूपं तज्ज्ञानमेव तज्ज्ञानमितिकिंशब्दार्थः
आद्यमनुवदति यदि तावदिति ज्ञानांतरं हि भेदमात्रं ग्रहक्रावितु तद्धर्मादिविशेषतमिति विकल्प्याद्ये कल्पे संविद्भेदो न सिध्यतीत्या
हतदेतिततदात्तत्पार्न भेदग्रहः स्यादिति संबंधः द्वितीये दूषयति धर्मिप्रतियोगीति धर्मिप्रतियोगिप्रतिपत्तिमंतरेण
तद्विशेषितभेदो न प्रतिषत्तुं शक्यः न च धर्मिप्रतियोगिनोः प्रतीपत्तिः स्वप्रकाशत्वेन संविदंतरागोचरत्वादित्यर्थः राम
विपक्षे बाधकमाह विषयत्वदिति विमतं भेदसवेदनं कल्पितं तद्विषयत्वाद्योयद्विषयः सं तत्सित्कल्पितो यथा घटस्येत्यर्थः

धर्मादीनां संविदभिन्नत्वं तस्यास्तावविषयविषयिणोरभेदो गीकारादित्याह तदभिन्नत्वेति द्वितीयमनुवदत्यथेति संवि
द्वेदबोधयोरेकत्वाद्भेदानवबोधे बोधेन वा बोधाजवादांध्यापातइत्याह तत्राहेति सादृश्यांगीकारेण दूषणमुक्तानस्या
सिद्धिरुच्यते पिचेसनेनमंथेनतत्रतच्छेदेन प्रसक्तत संविरवरूपाभिधानात्तत्तद्विरुद्धत्वसादृश्यास्याप्रमाणिकत्वं वा
सिद्धमित्याशंक्याहापिचेति असिद्धिंपरिहरतिमित्रयोरिति तद्रूपप्रतीतेः इत्यत्र तच्छब्देन प्रसक्ततसादृश्याभिधान
शंकास्यात तथा वापसिद्धांतः तत्र ऐक्यप्रतिभासविरोधस्योक्तत्वात्तस्य तच्छब्देनाभिधानेपि सादृश्यस्याप्रामाणिकत्वं
त्रातेः सादृश्याद्यभावादित्याशंक्याभिप्रायं दर्शयति नन्वैक्येति ऐक्यप्रतिभासविरोधस्याभिधानात्तस्य तच्छब्देना
भिधानमित्यर्थः भ्रांतिमात्रस्य सादृश्यव्याप्त्याभावेपि तद्विशेषस्य व्याप्तिरस्तीत्याह हेतोरुक्तेति मित्रयोरैक्यभ्रमो भेदप्रति
भानमंतरेण न संभवति रोधानं च न सादृश्यं विनेति तत्सिद्धिरित्यर्थः इतरेतराश्रयत्वादि सत्रोपेक्षितं पूरयत्राहनेन

मिति व्यामोहापेक्षोक्तेन वैतराश्रयत्वस्याव्यामोहपक्षेपि साम्यमुक्तं स्यादेतदित्यत्र तदनुपपत्तेरैक्यप्रतिभासस्य स्वतःप्र
माण्यादित्याशंक्याह नत्वैवमिति ज्ञानैक्यप्रतिभासस्यापि स्वतस्त्वापातादित्यर्थः किं प्रयुक्तं तर्हि प्रामाण्यमिति पृच्छति
किं त्विति सादृश्यस्याविरुद्धत्वसमूलकत्वसिद्धौ वैक्यप्रतिभासस्य प्रामाण्यसिद्धेः तन्न निर्मूलत्वापाद्यत्तरैक्यस्य प्रामाणिकत्वं
मिर्मूलत्वादि वैक्यस्य प्रामाणिकत्वाय तमतीतराश्रयत्वमित्यर्थः नैतदित्यत्र प्रतीतेः प्रामाण्यमनपेक्षमित्युक्तं हेतावपेक्षा
सद्गुणादित्यादावस्य वित्तानां सामान्यतिरिक्तहेत्वापेक्षानिरस्यतदृत्साहैक्यमिति विज्ञानप्रयोजकप्रयोज्यत्वे संभवत्सभिनिरीक्षा
पेक्षायां गौरवं स्यादित्यर्थः न वज्ज्ञानैक्यप्रतिभासस्यापि स्वतस्त्वप्रसंगः शंक्यः ज्ञानाभेदग्राहि प्रामाण्यविरोधेन स्वतः
प्रामाण्यानुपपत्तेरित्यर्थः प्रतीतेः प्रामाण्यस्वारसिकं यस्मादनेनानपेक्ष्यमिति टीकायोजना सादृश्यकल्पनायामपि स्मृत राम
त्वसंभवान्नास्मन्मतेपीतरेतराश्रयत्वमित्याह नन्विति सादृश्यमिति स्वन एवेति ऐक्यप्रतिभासस्याव्यामोहत्वापेक्षाविनेत्यर्थे

२०३

सादृश्यकल्पनायाः स्वाभाविकत्वेऽप्युक्तवार्त्तिकस्मिन्नावेप्यैक्यप्रतिभानं तदपि सादृश्यनिमित्तं स्यादिति परिहारा
भिप्रायो गौरवदृष्टौ गावयदृष्टादावैक्यमन्तरेणापि सादृश्यसिद्धेर्नैतिभ्रान्तसंस्कारदृष्टमिति सांकेतेप्युत्तरे तियोगे गव
योरैक्यस्याप्रतीयमानत्वान्न तद्भ्रान्तित्वापेक्षं सादृश्यं अत्र वैक्यप्रतिभासान्तद्भ्रान्तिविना न सादृश्यमित्याशयेनाहान्तज्ञाने
ति अप्रामाण्यपूर्विकैसत्वकस्याप्रामाण्यमिति विचक्षायामाहैक्येति प्रत्यभिज्ञा प्रत्यक्षाविरोधात् सादृश्यसिद्धौ न तन्निमि
त्तं भेदाभानमित्युक्ते प्रत्यभिज्ञा संमतिमाशंक्य तेन नु केयमिति प्रत्यभिज्ञानिरूपणस्य प्रकृतसंगमित्याह यत्सामध्येति वि
पूर्वानुभवसंस्कारात्प्रत्यभिज्ञोत्पद्यते उताक्षसंयोगात् उत चोभाभ्यां नाद्यः संस्कारस्यानुभूतमात्रग्राहिकारणत्वे तद्देशादिवै
शिष्ट्यग्राहित्वायोगात् न द्वितीयः अक्षस्य वर्तमानमात्रग्राहित्वेन तद्देशादिवैशिष्ट्यग्राहित्वासंभवात् न तृतीयेपि निरपेक्षसाप
नीदृग्विपप्रत्यक्षत्वात्सम्प्रत्यभिज्ञापाभ्यनुभवसंस्मरणत्ववत्स्यात्तथातद्देशकालविशिष्टैक्यलक्षणविषयासंभवात्स्यरोक्ष्य

तत्व०

२०४ त्वेनापरोक्षत्वेन भ्रमज्ञानस्वरूपानिरूपणात्तस्मात्प्रत्यभिज्ञाप्रामाण्यमसंभवतीत्यर्थः तत्र कारणस्य तु निरूपत्वं नावदीमि
प्रभिसाह पूर्वेति पूर्वानुभवसंस्कारसहितेदानींतनप्रमितिकारणं प्रत्यभिज्ञासामग्रीत्यर्थः यत्तूक्तं प्रत्यभिज्ञायाः स्मृ
तित्वमन्यथा तत्त्व वस्यादिति तत्रेदमभिधीयते संस्कारमात्रजन्यत्वं स्मृतित्वव्यापकं तच्चावर्तमानं स्मृतित्वमप्यादा
य व्यावर्तनेनवानुभवस्यैतद्देशादिवैशिष्ट्यग्राहित्वं न स्यादिति शंक्यं संस्कारसंहकृतेन्द्रियस्य तत्ताग्राहित्वोपपत्तेरिति
द्रष्टव्य विषयासाभंव निरस्यति सेवस्येति तदेतद्देशकालोपलक्षितस्वरूपप्रत्यभिज्ञाविषय इत्यर्थः प्रत्यभिज्ञास्वरू
पमाह प्रत्यक्षेति उक्तप्रत्यभिज्ञान्यमनात्मन्यप्युपेत्यात्मनि तु पपत्रे स्यान तदहमिति सोऽहमिति प्रत्यभिज्ञाया अनुभव
सिद्धत्वात् कथं तदपलापः इति शंकते कथमिति सामग्र्या सेमवात्प्रत्यभिज्ञानुभवो भ्रम इत्याह विज्ञानस्य भावस्येत्या राम
दिना आत्मनः स्थायित्वे प्रत्यभिज्ञाकारणाना वन्न संभवतीति संबंधः संस्कारकरणामिति वदन्यच्च व्यः क्षिमागतु

२०४

कज्ञानसंस्कारकारणे उतत्स्वरूपज्ञानसंस्कार इति नाद्य इत्याह स्वयंप्रकाशस्येति स्वयंप्रकाशत्वमुपपादयति विज्ञाने
ति द्वितीयं प्रत्याह रूपस्येति प्रमितिकारणाभावं नाह स्वयंप्रकाशस्येति विदनान्तरेव च यस्य स्थायित्वमुक्तप्रत्यभिज्ञा
नासिध्यति आत्मनस्वस्वरूपज्ञानमेव प्रत्यभिज्ञा ततः स्थायित्वसिद्धिरित्याशंक्याह नवेति प्रत्यभिज्ञाविषयो
पिनुक्तमइत्याह सोऽहमिति किं ज्ञानव्यतिरिक्तो विषयाकार उपेयते उत न अथि आकारभेदे न विषयभेदात् ज्ञान
भेदः द्वितीये ज्ञानातिरिक्तपाविषयाकाराभावात्स्थायित्वविषयिणी प्रत्यभिज्ञेत्यर्थः प्रत्यभिज्ञानाकारणमुप
संहरति तस्मादिति विकल्पासहत्वात्रैतादृशा हात्रो व्यतइति किं विशिष्टप्रत्यभिज्ञा संभवः उतकेवल इति विक
ल्पाद्यस्तावदनुपपन्न इत्याह जः करणेति द्वितीयं निरस्यति निष्कलंकेति कथं तर्हि सस्य स्थायित्वमित्यत्राह
तस्येति अजो नित्यः शाश्वत इत्यादिरागमः शास्त्रशब्दार्थः अंतः करणस्याहं विनाशित्वात्तद्विशिष्टस्यापि व

नाशित्वमिति न प्रसमिताविषयत्वं तत्राह संसारेव स्थापामिति न च विशिष्टानयोर्येसिद्धांतविरोधः तदापी
तेः संसारव्यपदेशादिसत्र वेदांतहृदयवेदिना वादरायणमुनिनामुपपयस्य वस्थाखपिसूक्ष्मशरीरस्यस्थ
स्म रूपेणवनाविधानादित्यर्थः एवं प्रसमितापाविशिष्टविषयत्वमुपपाद्य तस्याः सामग्रीदर्शयति तत्रचै
सादिनाविशिष्टात्मविषयमिति पूर्वापरकालोपलक्षितरूपविषयमिति यावत् पूर्वानुभवसंस्कारसहिता
तःकरणस्य पूर्वतरकालोपलक्षितात्मप्रसमिताजनकत्वमुक्तं तत्रात्मनो विषयत्वादंतःकरणेस्य तद्विषय
प्रसमिताजनकत्वमनुपपत्तमित्याह नन्विति पूर्वे तत्र वक्तव्य किं मभिताविषयत्वा नाव च ज्ञानाविषयत्वउक्त
स्वप्रकाशत्वादिति तत्र भवस्तावदयुक्तरत्याह नेषइति विशिष्टविषयं प्रसमितानतत्रत्रोप्माविधमपिविष राम
त्वमुपपद्यत इति भावः अविषयस्यापीयत्रापि शाब्दिवृत्तिरूपाभिताविषयत्वमस्तीति सूचयति द्वितीयम्

स्थापयति ननु स्वयमिति किं निरूपाधिकस्याविषयत्वं ओपुत सोपाधिकस्योतविकल्पाद्यांगीकारेणाद्वितीयं दूष
यति नैव मिति स्वरूपेण प्रमाणांतराविषयत्वेपि विशिष्टस्य तद्विषयत्वं इष्टतमाह यथेति चोदनालक्षणो र्थोध
र्म इति तत्रागमैकसमधिगम्यतयाः सिद्धत्वेपि सुखादिनैर्लिंगेन फलेन सुखत्वविशिष्टाकारेणाद्दृष्टमनुमीयते यथात
द्वत्रापीत्यर्थः विधांतरेण विषयत्वमाक्षिपति नन्विति कर्तृत्वं क्रियोपसर्जनत्वं कर्मत्वं प्राधान्यं गुणप्रधानभा
वस्य भिन्नव्यक्तिनिष्ठत्वन्नैकस्मिन्संभवइत्यर्थः गुणप्रधानभावस्य भिन्नव्यक्तिनिष्ठत्वनियमोसिद्धइत्याह न
नु सर्वेतीद्रियाधितिरेक आदिशब्दार्थः अनुमानविषयत्वं नाम किं कर्मनयाजनकत्वउत तदाकारपदत्वमिति
विकल्पाद्येसिद्धिमाह तत्रेति भविष्यदादेरसत्वात्तत्ताननकतयाविषयत्वमित्यर्थः द्वितीयेक विरोधइत्याह आकारेति
आकारत्वप्रदत्वयमात्रेणेत्यर्थः प्रमसविषयस्य तत्कर्मभारकारकत्वादिरोधोदवोइत्याह प्रसेक्षेत्विति

तत्व॰ २०६

तस्मात्कर्तृकर्मविरोधान्नात्मनो विषयत्वमित्यर्थः एकस्मिन्नप्युपाधिभेदात्कर्मकर्तृभावो युक्त इत्याह व्यतइति
कालविशिष्टतयेति तदुपलक्षणमित्यर्थः उपाधिकल्पभेदनया विरोधनिराकरणद्वारं प्रत्यभिज्ञानं गी
कारामित्याशंक्याह सोहमिति वशब्दः शंकामिरस्यर्थः यथाकथंचिदितिउपाधिसंबंधविना ज्ञाता न ज्ञेयमाव
संभवेप्युपाधितस्तात्संभवइत्यर्थः उपाधितो विरोधनिरासेनं कुत्रापि कर्मकर्तृविरोधः स्यादिति शंकायाम
ह सोहमिति यथावान्यत्रान्यथासिद्धं कल्पनं तथात्रेत्यर्थः कालात्प्रत्यभिज्ञानद्वातिव्यमाशंक्याह व्यवहारेति
भेदग्राहिप्रमाणविरोधात्कालात्प्रत्यभिज्ञाया भ्रांतित्वं न च तथात्र बाधकमस्तीत्यर्थः आकारभेदात्स्ता न
भेद इति यदभ्यधायि तत्प्रति क्षिपति न च सोहमिति किं परमार्थतो ज्ञानस्य क्षणिकत्वाभावं त्वयीष्टतव्य
वहरत इति विकल्प्याद्यमंगीकरोत्यसमिति अंगीकृतमंशमाह विज्ञातरीति मात्रवबोधमाहनसतयेति

राम

BHAU DAJI MEMORIAL

धर्मस्य धर्मिणोभिन्नत्वादिरूपेणानिरूपणादुक्तेतो ज्ञानं निद्धर्मकमित्यर्थः तापि द्वितीये क्षेणिकत्वस्य प्रामाणि
कत्वादित्युक्तव्यन्तु अमुत्तरमित्याह तयेति जन्यत्वादिकमादिशब्दार्थः कालादीयत्रादिशब्देनोक्तः करणवत्त्विग
त्यंते कालकस्यस्थापित्वधर्मिता तदनुवेदीतज्ञाने स्थापित्वव्यवहारप्रवृत्तेर्जन्मादिधर्मित्वात्तत्संबंधात्ज्ञानेपि
तव्यवहारो वक्तव्यस्तस्मान्निर्धर्मकत्वमित्यर्थः किंतु सर्वमपोरंतरंतत्र हेतुरस्तीति विकल्प्यात्रत्यये प्रमाणमाह
सोहमि अनुभवस्तत्तन्मतेप्यस्ति तदर्थमाह व्यवहारेति नकेवलं विसंवाद्यभावः प्रत्युत संवादश्चेत्याह
र्थक्रियेति आत्मनः प्रत्यभिज्ञाविषयत्वेनस्थायित्वसाधनमाकर्ण्य तदसहमानाः प्राभाकराः प्रत्यवतिष्ठंत
स्य विधेयत्वानंगीकृत्य तत्रोक्तापत्तावाम इत्याशंक्य विकल्पो यत्र नयाभ्यावेष्टाकितं दिति न च शाब्दज्ञानस्य विधेयत्वे केवि
स्यानुपपत्तिरित्याशंक्य किं शाब्दज्ञानमात्रस्य विधेयत्वं उतावृत्तिविशिष्टस्येति विकल्प्योपपत्तेरिति द्रष्टव्यं। उभय
विषयत्वाभावहेतुमाहोभयथात्वइति। आलोकिकात्मज्ञानमात्रस्यासिद्धत्वात्कथं तद्देशेन संतानाविधानमित्या
शंक्य संतानं विधेयमित्यनं दर्शयन टीकार्थं स्पष्टयति। ननु प्रथममिति। उत्तरोत्तरज्ञानजातिसमयपूर्वज्ञानस्य न
ष्टत्वात् कथमपरोक्षप्रत्यादयः। तत्राह। तत्संस्कारेति। उपासीतेत्यादिशब्दात् प्रतिपन्नः तत्कथं लभ्यत इत्यत युक्त
मित्याशंक्य विकल्पपूर्वकमाचष्टे। किमुपासनेति। स्वभावसिद्धेति लोकिकात्मप्रत्ययमुपासीतेत्यत्र धनिष्ठपंच आ
त्मा प्रमाणान्तरानधिगतआत्मेत्यवतिवाक्येन प्रतिपाद्यत इत्यर्थः। आलोकिकात्मप्रतिपादकत्वं कस्मात् यथाश्रुति

तदुपास्तिविधिपरत्वमेव किं न स्यादित्याशंक्याह एवकारेति ततः किमित्यत आह। वाक्यस्येति। यद्वत्र योगः प्राथम्यमि
त्याद्युद्देश्यलक्षणं तद्वत्तमेवकारस्य स्यादुपादेयलक्षणमित्यभियुक्तोक्तेरित्यर्थः। विज्ञापनपरत्वादित्युक्तं व्यतिरेक
मुखेन द्रढयतुभयति। निदिध्यासितव्य इति वाक्यादुपासनविधिमवगच्छाम इत्याशंक्याह। निदिध्यासितव्य इति।
अत्रापि वाक्ये नोपास्तिविधानमिति शेषः। तत्र हेतुमाहात्मेति। पूर्वोत्तरवाक्ययोरात्मपरत्वादेतदपि तत्परमित्यर्थः।
अधस्तात्समिधं धारयन्ननुद्रवेदित्यत्र धारणविधिपरेपि वाक्ये यथोपरिधारणविधिः तथात्रापीत्याशंक्याह।
वाक्यभेदेति। तत्रैकार्थ्यासंभवात् वाक्यभेदेन तथात्र तव्यप्रत्ययस्यार्हार्थेपि स्मरणात् स्तावकत्वेनान्वयोपपत्ते
रित्यर्थः। द्वितीयमनुवदत्यर्थेति। उपास्तिवाचकपदाभावेपि ज्ञानशब्देन तल्लक्षणया विधानं युक्तमिति

शंकते। ननु ज्ञानस्येति। अविनाभावादिति ज्ञानं तत्र वा हेयोः साहचर्यमात्रं विवक्षितं अनात्मज्ञानवदात्मज्ञानस्या
पि प्राप्त्वाह साहचर्येण न तल्लक्षणेत्यर्थः। प्रवाहाभावेपि ज्ञानस्य दृष्टत्वात्तल्लक्षणेत्याह। नेत्याहेति। अभ्यासस्यापि
अविधेयत्वे साक्षात्कारहेतुत्वं दूरापास्तमिति उत्तरग्रंथचयपर्यमाशंक्योपासनविधिमंगीकृतस्य साक्षात्कार
हेतुत्वं निरस्यतीत्याह। अथापीति कथं विधिरिति वाक्यभेदेनेत्यर्थः। कामुकस्य कामिनीध्यानात्तदापरोक्ष्यदृष्टेः क
थं तस्य तद्धेतुत्वाभाव इत्याशंक्याह। ध्यानस्येति। इंद्रियसंयुक्तस्यापरोक्षं दृष्टं न व्यवहितकामिन्यादेरतदत्रा
प्यापरोक्ष्यमित्याह। विषयस्येति। आत्मज्ञानाभ्यासस्य साक्षात्कारहेतुतायाः श्रुतत्वात् कथं तदयोग इति
शंकते। ननु तत्र इति। अंतःकरणशुद्धिसमनंतरमित्यर्थः। श्रवणमात्रमंगीकरोति। सत्यमिति। तर्हि ध्यासि
द्धिरित्याशंक्य ध्यानं किं साक्षात् साक्षात्कारं प्रसूते उत परंपरयेति विकल्प्याद्यमंगीकरोति सेकत्रेति। समवधा

तान्नशब्देन विजातीयप्रत्ययतिरस्कारेण सजातीयप्रत्ययप्रवाहकरणं ध्यानं विवक्षितं। नन्वैकाग्र्यस्य प्रमा
करणत्वाप्रसिद्धेः कथं तद्द्वारेण साक्षात्कार इति तत्राह। तदैकाग्र्येति। तत्र हेतुमाहोपनिषदमिति। एवं कल्पना
यां ध्यायमान। पश्यत इति श्रुतिः विरुद्धेत्याशंक्याह। ध्यायमानेति। तात्पर्यतन्नेनेति ज्ञानमतः करणत्वस्य प्रसादः
एकाग्र्यतेन सहकारिणा शब्दक्षत्मतत्वं ध्यानवाच्यरूपतीत्यर्थः। ध्यानस्य शब्दसहकारित्वमदृष्टद्वारमिति शंकां
निरस्यति। स्पष्टदृष्टो ध्यानानपेक्षायामपि सूक्ष्मं दृष्टो तदपेक्षान्वयाद्यधिगतेत्यर्थः। परिशिष्टमापकल्पं प्रत्या
ह। दृष्टेति। ध्यानस्य साक्षात्प्रमितहेतुतापाः लोके दृष्टत्वात्कल्पनानुपपत्तिरित्यर्थः। अन्वयव्यतिरेकासिद्ध
साधनत्वादपि नान्यासं विधिरित्याह। परोक्षेति। मनननिदिध्यासनाभ्यां सहश्रवणं नामांगि विधीयत इत्यत्र
त्र निदिध्यासनविधिरस्त्विति तः कथनं निरसनमित्याशंक्याह। दृष्टार्थत्वादिति। साक्षादपरोक्षहेतुत्वे २९

ननिदिध्यासनं विधीयत इति पन्मतं तदत्रापि ध्यते। प्रथमवर्णके तु निदिध्यासनविध्यापत्तं यदिदं वृत्तैकाग्र्यलक्षणं दृ
ष्टफलसमलाप्य दृष्टं तास्मिन्नतिशब्दादेयापरोक्षप्रत्ययोत्पत्तेरभिधानान्न किं विदद्यामि सत्यर्थः। दृष्टार्थत्वादितिपा
ट कथस्वतः प्रवृत्तिरिति शंकानिरावष्टे। दृष्टार्थत्वादिति तत्फलं परस्य तद्ज्ञाति विधेः अयइत्तिकथं मुक्तमित्याशंक्य
किं ध्यानस्याप्रवृत्तप्रवर्तकत्वं उत विधिरिति विकल्प्याद्यं दूषयति। दृष्टेति ध्यानस्यैकाग्र्यद्वारेण यदिदं ज्ञानं हेतु
त्वं प्राप्तं तद्दृष्टफलत्वत्तु वादाभिप्रायमेतदित्यर्थः। विधेर्नियोगिकारेणाश्रंभसमर्थनस्य प्रस्तुतत्वात् नतु किमत्र
श्रवणे नत्वनुपपन्नमित्याशंक्याह। नन्वैकाग्र्येति नाप्रवृत्तप्रवर्तकं किंतु बोधकमेतदित्यर्थः। मुमुक्षुपायेना
पि शब्देन विधेरपि ध्यानं विधिनापुमान् ध्याने कस्मात्प्रवर्तता मितितत्राह। दृष्टेति दृष्टैकाग्र्यंद्वारं कारण

३०

यस्य साक्षात्कारस्तस्य सतथोक्तः नेते। तिविग्रहः यस्य साक्षात्कारनिमिति यावत्तथापि ध्याने प्रवृत्तिः कस्मादित्यत्राह
का ग्रेति। अत्र ध्यानेऽप्रवृत्तप्रवर्त्तकत्वलक्षणविधिश्रवणेन किं फलिष्यति नतावत्साक्षात्कृतो प्रवर्त्तयतीत्यो
हृत्यमिति। पित्य क्षितिघालक्षणा प्रवृत्तिस्तत्रिर्वधाना न्यतः सिद्धत्वादित्याह। सिद्ध इति। तस्मात्त्रिर्वर्त्तनल
क्षणा प्रवृत्ते विध्यधिनत्वं वक्तव्यं तदर्थं विधिकल्पनमिति राकार्यः फलरागादिना पि प्रवृत्तिसंभवात् न तदर्थं
विधिकल्पनमिति परिहाराभिप्रायः। टीकायामपेक्षितपूर्वसंतरणं पूरयति। अत इति। कश्चिदुभयार्थं नादृष्टेत
न्यायेन परत्रापितत्कल्पनात्समाधानाभासं च माशंक्य किं शब्दस्य क्रमेणोभयार्थत्वमुत युगपत्तत्राद्य इत्याह। न
स्यापीति। कुल्यामाः स्याइत्वा क्रमेणानेकार्थत्वं घटते नु न शब्दस्य तात्सीवृत्त्या बोधकत्वात्तात्पर्यस्य चोभय

२०

र्थतायुक्तेरित्यर्थः। सचेत्तस्यायमर्थः। कस्तर्हि न्याय इत्याशंक्य नित्यविषयज्ञानविध्यनुपपत्त्योपार्थत्वमुक्तं स्मरेत्या
ह। सचेति। अ मितिवेलत्राह। नेति। कल्प्योन रमेध्यनेति नि। त्विमिति येनरूपप्रसंगे नेति यावत् दृष्टव्यं। अथवा वग
म विध्यनुपपत्त्याभयपरत्वे स्वीक्रियतां तत्राह। सचेति। उभयपरत्वे साधको न्यायो नेति। कथमुच्यते तदुपलब्धे
रित्याशंक्यत्तिनुद्भूत्रिकद्वयप्रतिपत्तिरूपतायांतरपाह नेन्मेवमित्याह। नयुगपदिति। पादार्थानां विधायकः श
ब्दः क्रमस्यापि विधायक इत्युक्तं तत्र को सो विधायकः शब्द इति वीक्षायामाह। ननु समिध इति। प्रतिवचनस्य प्रश्ना
नुसारित्वमाशंक्य तात्पर्यमाह। पदार्थ इति। एकस्य युगपदनेककर्म्मानुष्ठानानुपपत्त्या क्रमप्रतिपत्तिरित्यर्थः।
शब्दस्योभयत्र प्रामाण्यं किं न स्यादित्यत आह नशब्देति। अन्यथासिद्धत्वादित्यर्थः। यच्छब्दस्य कवचनत्वा

त्रविधय इत्यनेनैनान्वयोयुक्त इत्याशंक्याह येनावदिति। प्रत्येकमिति। कर्मकर्मप्रतीत्यर्थः। प्रयाजादिविधिभिः प्रयाजादी
नां विधानमंगीकृतं तत्र च न तेषामेव विधानमित्यनुपपन्नमित्याशंक्याह। तेषामेवेति। प्रयाजादीनां क्रमशब्दाभिधेयत्व
स्येतेनानुक्त्वा तं निषेधोऽसमंजस इत्याशंक्य हेत्वंतराभिप्रायेण विकल्पपूर्वकामवतारयति। किं पदार्थस्येति। एकै
कपदार्थप्रतिपन्नावपि तदप्रतिपत्तेर्न पदार्थात्मकत्वं क्रमस्येत्यर्थः। आद्यपक्षमुत्थापयति। ननु विहितमिति। शक्य
क्रमस्य विधानमित्यत्र हेतुमाह। प्रयोगवचनेति। प्रयोज्यत्वमात्रेण कथं क्रमस्य विधेयत्वमित्याशंक्याह। अंगमिति।
तथापि कथं तस्य विधेयत्वमित्यत आह। विहितमंगं भवतीति। विहितस्यांगत्वादंगस्य च प्रयोगवचनप्रयोज्यत्वाद्वि
धायकांतरस्यानिरूपणाद्वाक्यमेव विधायकमित्यर्थः। प्रयोगवचनप्रयोज्यत्वमेवासिद्धमित्याह। नित्याहेति। दी ३१

क्षोपेक्षितं हेतुमाह। विहितस्येति। पदार्थानामेव विहितत्वमसिद्धं प्रयोगवचनप्रयोज्यत्वेन क्रमस्यापि विहितत्वाभिम
ानं प्रत्याख्यायेति। प्रयोगवचनप्रयोज्यत्व इत्यर्थः। प्रयोगवचनप्रयोज्यत्वमंतरेणापि क्रमस्य विहितत्वं स्यादिति तेने
तरेतराश्रयत्वमिति शंकते। ननु पदार्था इति। ऐकैकत्वरूपलब्धावपि वर्णानुपलब्धिवदेकैकपदार्थोपलब्धावपि क्रमा
नुपलब्धिर्युक्तेत्यर्थः। वर्णस्य तदात्मकत्वाभावादनुपलब्धिः क्रमस्य तदात्मकत्वे तदुपलब्धिः स्यात्। न च साक्षीति पदा
र्थात्मकत्वमसिद्धमित्याहने त्याहेति। पदार्थं विधाय कथं क्व्या क्रमासिद्धिमंगीकुर्वीत। क्रमाभावो नाश्रीयते। तत्
श्रुतनिषेधोऽनुपपन्न इत्याशंक्याह। पर आहेति। किमेकैकपदार्थवृत्तिः क्रमः उतानेकपदार्थवृत्तिः नाद्य इत्याह
केकस्मिन्निति। द्वितीये यथि किं युगपदुपलभ्यमानानेकवृत्तिः उत क्रमेण। नाद्य इत्याह। नैकेति। क्रमयोगादिति।

क्रमभवनायोगादित्यर्थः। द्वितीयेपि किम परिसमाप्यानेकत्रवर्त्तउत परिसमाप्येतिवक्तव्यं। नाद्यइत्याह। योगपद्यइति।
जाताजातयोः संयोगादृष्टेरित्यर्थः। द्वितीयेप्येकव्यक्त्युपलंभेगोरित्युपलब्धिर्वेदकस्य क्रिप्रतिपन्नावपिक्रमप्रतिप
त्तिःस्यादित्यर्थः। उपलभ्यमानोपिक्रमोननिरूपणापथमवतरतीत्युक्तं अनुवदति। ननुसंयोगवदिति। योगपद्य
संप्रगमुक्तं निरस्यति। क्रमत्वादिति। संयोगस्य नसंयोगविशिष्टवयविनिष्ठत्वं नापितदभावविशिष्टे किंतुयोग्ये।
तथाक्रमस्याप्येकक्षणावच्छिन्नपदार्थवृत्तित्वेक्रमत्वव्याघातात् अयुगपद्भाविपदार्थवृत्तित्वं। नचविद्यमानत्वात्पदा
र्थानांतदाश्रयत्वंनशक्यं। आक्षिप्तानस्यापिप्रतियोगिनो भावनिरूपकत्ववत् भविष्यदादेर्व्याप्तिनिरूपकत्व
वद्वक्रमाश्रयत्वोपपत्तेः। तस्मादयुगपद्भाविष्वपिक्रमोपपत्तिरित्यर्थः। एकदेशस्थत्वव्यतिरेकेणवर्णानुपलब्धि

वत्पदार्थादिव्यतिरेकेणाक्रमानुपलंभात् गौरवाच्चकथंतस्वीकरणमितिशंकते। ननुदेशेति। दृष्टापत्त्योत्तरमाह।
तदाहेति। दृष्टांतोविषमइतिशंकते। नन्वनुष्ठेयेति। तद्रूपाणामेकदेशकालस्थत्वात् तद्रूपाधौवनुष्ठेयादिविषयत्वंस
मिदादीनामयुगपद्भावाच्चैकदेशकालस्थतयाक्रमव्याप्यादिविषयत्वमित्यर्थः। स्मृतिज्ञानस्योपलब्ध्यनुरोधिनप
दार्थपरामर्शित्वेपि कथंपदार्थक्रमप्रतिपत्तिरित्याशंक्याह। पावेति। क्रमविधायकाभावात् नतस्यानुष्ठेयत्वमि
तिशंकते। ननुक्रमस्येति। अननुष्ठेयत्वमिष्टमित्याह। नक्रमस्येति। अक्रियात्वादित्यर्थः। गुणस्यानुष्ठानंस्यादि
तिशंकते। किंचेति। पाठक्रमानुसारणार्थेपि क्रमप्रतिपत्तेस्तदपलापइत्याह। अनुष्ठेयेति। अक्रियात्मनोपिद्रव्या
देर्यथाक्रियानुरक्ततयाविधेयत्वंतदवत्त्राधीति शंकांनिरस्यति। नविधीयतइति। अथवातिप्रसंगयेदक

स्यक्रमेमानंवक्तव्यमितिविवक्षितं। नविधायकमितिकल्प्याघनिरावष्टेनुष्टेपिति। द्वितीयंनिरस्यति। नविधायकत्वइ
ति। अथकुतस्तर्हिक्रमप्रतिपत्तिरित्याशंकतेकेनेति। पदार्थानामलौकिकत्वात्क्रमस्तावन्नलौकिकः। नापिशाब्दस्त
स्यान्यपरत्वादित्यर्थः। एवंश्रुतिवाक्ययोरपिक्रमाप्रतिपत्तेः संनिहितंचे। तिकथमुक्तमित्याशंक्याह। संनिहितंचेति
तत्वेस्यादेरयमर्थः। तत्ज्ञानांतरं प्रयोगवचनेनगृह्यतइतिसंबंधः। प्रयोगवचनस्यनक्रमज्ञानापादकत्वमनुपप
त्यदर्शनादित्याशंकत्वादिति। सुक्रमेणानुष्ठानेप्याकांक्षोपरमशंकांनिरस्यति। संनिहितमिति। अनतिक्र
म्यविशेषः। अथक्रमाभावेपीतिपदार्थानाम्। निष्पन्नत्वात्क्रमाभावेपीपाठक्रममनतिक्रम्यसंनिहितमनुष्ठे
यं। आग्नेयादिप्रयोगवचनेनगृह्यतइति योजना। संनिहितविषयत्वेनसंनिहितमित्युक्तं। तदाज्ञानविशेषणं ३२

संनिहितविशेषणंदृष्टव्यंदृष्टांतनिरसेनोपसंहरणमपेक्षितंदर्शयति। तस्मादिति अथवानियोगबोधकेननि अथ
वानियोगबोधकेनलिङ्ःपदेनयथाविषयादिसिद्धिः तद्वदत्राप्युभयसिद्धिः किंनस्यादित्याशंक्याह। तस्मादिति।
लिङादिनियोगप्रतिपत्तिर्थाद्विषयादिप्रतिपत्तिरितिप्रमाणभेदइत्यर्थः। चक्षुर्यथदर्वबोधयतितत्रतत्रस्कंभमेवप्र
माणंतदनुपपन्नासंप्रयोगमपेक्षत्वादित्याशंक्याह। प्रतिवस्त्विति। यत्कृतस्तुप्रतिसंयोगोविद्यतेयस्यतत्प्रतिवस्तु
संयोगंसंप्रयोगेसतितावन्मात्रेऽक्षस्यप्रमाणपसंभवतिनच तथाप्रतिपन्नमात्रेशब्दस्यप्रमाणपसंभवतीत्यर्थः।
अभिधानिकप्रत्ययोविधिविषयएवे। तिकथमुच्यतेश्वाभनोपिप्रतिपत्तेरित्याशंक्याह। नन्वाभिधानिकमिति। पद्यण्या
भाशब्दात्प्रतीयते तथापिनतस्यतत्रतात्पर्यमित्यर्थः। किंपरंतर्हिज्ञानमितिपृच्छति। किंत्विति विधिविषय

३४

यत्व कथमिति वीक्षायामाह। किंधायंकेति। प्रमितिविषयत्वेनाम प्रमिति निर्वाहकत्वमित्यर्थः। अवगमस्य
सविषयत्वं कथमिति विक्षायामाह। वगमेति। शब्दद्द्पतीयमानोप्यर्थः प्रतिपत्त एवेतिपूरिदा रस्याभासत्वमा
शंक्याह। परिहरतीति। सम्यकपरिहारत्वमाहेक स्मित्रिति। श्रुत्यनुपपत्तिः किंश्रुतावंतर्भवत्युतन। आद्येशब्दा
त्जायमानस्यापघज्ञानस्य अत्प्राप्रामाण्यंद्विति यस्य तुप्रामाण्यमित्य त्रिच्छांदसमित्यर्थः। द्वितीयद्द्षपति।
श्रुतिरिति। प्रत्यक्षादिविरोधादनुपपत्तिर्नप्रामाण्यमित्यर्थः। नत्वमस्यादिनाविधित्रेप्रतीयते तथापितत्वत्र
प्रमाणमिति। विरुद्धमित्यादिशब्दार्थः। प्रतिपत्तिविधिनाकारणेतिकर्तव्यतासंसर्गप्रतिपत्ते नियमेनवा
त्वंसंसर्गनगमयतीतिक्यमुक्तमित्याशंक्यतात्पर्यमाह। किंवेति। अवगम्यसत्वमंतरेणानुपपत्त्यभावादि
३५

त्यर्थः अनुपपत्त्यभावोसिद्धइतिशंकते। नचेति। हेत्वंतरमाह। न्यथेति। आरोपितज्ञानस्यारोपितविषयज्ञानस्यप्र
योजनाभावादित्यत्रोपासनविधिवैयर्थ्यस्यादित्यनुषंगः सनारोपितविषयो नामपिवाबुध्येवाद्युपास्तीनां
चोदनाप्रामाण्यायथाफलगत्वमाश्रीयते तथात्रापीत्याह। तत्राहेति। स्वतः प्रामाण्यातथाभूतार्थत्वमित्युक्तंनि
रस्यति। श्राभिधानिकेति। स्वतः प्रामाण्येविधिसंसर्गाभाकपितस्यप्रामाण्यं किंनाश्रीयतइत्यर्थः दृष्टांतो
विषमइतिशंकते। ननुविधेर्यति। वाग्धेन्वादेरविद्यमानत्वादारोपितविषयत्वंयुक्तं आत्मनस्तुपरमार्थत्वा
त्तस्यमितिजनकत्वेनज्ञानस्यफलवत्वसंभवेसमारोपितविषयत्वेनादृष्टफलकल्पनमयुक्तमित्यर्थः। प्र
त्यक्षविरोधाद्वाग्धेनुमुपासीतेत्यादेर्यथास्वविषयप्रमितिजनकत्वाभावः तथात्रापीत्याह। तत्राहेति। अ

दृष्टकल्पना स्यादित्युक्तं निरस्यति। सवात्लेति। कार्यनुष्टत्वेवस्तु सिद्धेन्नं कार्यनिष्टत्वमिति भ्रमं निभ्रमं निरस्यति।
तस्मादिति। कार्यपरत्वं वस्तुपरत्वं वा सिद्धांतैकदेशिनो मते तत्र कार्यनिष्टत्वे वस्तुनिष्टत्वं न संभवती ति तन्मत निर
सनमित्यर्थः। अतइत्यादेरयमर्थः। कार्यनिष्टं यद्येन वस्तुपरं वेत्तु कथं तत्र्यात्मसिद्धिरित्याशंक्य किमात्ममात्रासि
द्धिः उत विशेषासिद्धिरिति विकल्प्याद्योनेत्याहातइति। उभयपरत्वानुपपत्तिरज्ञः शब्दार्थः द्वितीयं निरस्यति। न
तस्येति। तत्वमस्य यमात्मात्रत्येत्यादीनां नवस्तुनिप्रामाराप मनिष्टः। नापिधर्म्मेतस्याप्रतिपत्तेः त्रत्र तस्वन
स्तिकतत्यतास्यादिति शंकते। ननुवेदांतानामिति। आदित्योयूपइत्यादो यूपयादिशब्दानां यथोपचारादन्यप्र
त्रप्रवृत्तिः तद्वदत्रापीत्याहनेत्याहेति। सर्वात्मनेत्यस्यार्थमाह। तत्रात्मनइति तत्रेति पदं निरूपित मित्यनेनानु

पज्यते। उत्पत्तिविध्यादिः प्रागेव मारम्यातः। उत्पतइत्यादिना सर्वस्य वेदार्थस्य न विचारितत्वमित्युक्तं तदसाधु वेदांता
नामुदाहृत्य विचारणाभावेपि तेषां विधिपरत्वाद्धि ध्यपेक्षितन्यायस्य च पूर्वत्रोदिरितत्वेनानारंभोक्तेरित्याशंक्य कार्यप
रत्वमेवासिद्धमित्याहात्रेति। पूर्वतंत्रइत्यर्थः। धर्म्मस्योपक्रीततेपि यथाप्रसंगात्प्रतिपथवादन्यार्थो निरूपितः तद्वद्वेदां
तार्थोपि निरूपितइतिशंकते। ननुधर्म्मस्येति। प्रासंगिकत्वेयेति। सर्वोविदोधर्म्मे प्रमाणमित्युक्ते वेदांतानां कथं ध
र्म्मेप्रामाराप मितिशंकायां सर्व्ववेदस्य कार्यार्थत्वात् तच्छेषत्वेन वेदांतानाम पिप्रामारापस्याभ्युपगमनीयत्वात् ब्र
ह्मणस्तत्र निरूपितत्वं इतिविवक्षिते। वेदार्थानिरूपणमनुपपत्तेर्विविरुद्ध मित्याहेनेत्याहेति। उक्तेर्थेविनिगमनका
रणं पृच्छति। अनुपलब्धेरसिद्धत्वाभिसंधिः यावनेत्यत्रापेक्षितहेतुमाह। सत्त्रेति। सामर्थ्यमेवदर्शयित्तत्रायमाशय

इति। आलंबनसंभवासंभवाभ्यां विंतेति दृष्टमं। विचारो नाम प्रमाणानुग्राहकस्तर्कोतेनानुग्राह्यं प्रमाणं प्रत्यक्षाद्यन्त
न्यायः नाद्य इत्याहः विचार्यमाणो इति धर्म्मस्य प्रत्यक्षाद्ययोग्यत्वात्तेषामनुग्राह्यत्व मित्यर्थः द्वितीयं दूषयति आद्यस्ये
ति। अदृष्टार्थतया विनियोगो सिद्ध इत्याशंक्याह। तदर्थमिति हेतुसिद्ध्यर्थमित्यर्थः। अध्ययनविधिरिति तव्यप्रत्य
या मिधयषे शाब्दभावनाकथ्यते शाब्दभावनाभाव्यार्थभावनायाः किमदृष्टफलं भाव्यं उत दृष्टमिति विमर्शार्थः अ
तिमं दूषयति दृष्टेति। अन्वयव्यतिरेकसिद्धफलसाधने विध्यसंभव इत्यर्थः। व्रीहीनवहन्यादित्यत्र दृष्टफलसा
धनेपि विधिर्दृष्ट इत्याशंक्य तत्राप्यदृष्टमस्तीत्याह। अदृष्टेति। यत्रादृष्टं तत्रैव विधिरिति नियमादित्यर्थः। तस्मादा
द्यपक्ष उपादेय इत्याह। दृष्टार्थ इति। किमध्ययनविधेः स्वतंत्रादृष्टार्थत्वं उत कर्म्मकारकसमवाय्यदृष्टार्थत्वमिति

विकल्प्याद्यं दूषयति। ननु स्वाध्यय इति। अवगम्यमान इति। तव्यप्रत्ययेनेत्यर्थः क्रियाजनितातीन्द्रियातिशयशालित्वं संस्का
र्यत्वं शब्दार्थः अवाधिः स्वाधीनोच्चारणक्षमत्वं तद्विषयत्वमवाप्यात्व मित्यर्थः। कर्म्मकारकगतत्वेन दृष्टस्यातिशयस्या
संभवात्कथं स्वतंत्रादृष्टार्थत्वमित्याशंक्याहेतीति। दृष्टसंभवो सिद्ध इत्याह। न संस्कृतस्येति। कृतोविनिपतकस्य विनि
योक्ष्यमाणस्य वा संस्कारो दृष्टः स्वाध्यायस्य न तादृश इति न तत्संस्कार्यत्व मित्यर्थः। सुखदुःख प्राप्तिनिवृत्त्यै सो
न्यातरं स्यफलत्वात्स्वाध्यायाभ्यासानी दृष्टानामपिफलत्वमित्याह। वाप्तस्येति। अन्यतर इति रागादिनेत्यर्थः। व्री
हीनवहन्यादिति कर्म्मकारकसमवाय्यदृष्टार्थयियाऽवाप्तेः स्वरूपेणाफलत्वेपि प्रणाज्याफलत्वमस्तीतिशं
कते। नन्विति: फलत्वं मगीकृत्य विधित्वं दूषयति। न दृष्टेति। अन्यतर इति रागादित्येत्यर्थः। व्रीहीनवहन्यादिति

विधित्वदत् स्वाध्यायोऽध्येतव्य इत्यत्राप्यवासत्वा ध्यायसमवेतादृष्टार्थत्वेन विधि स्यर्थवानुस्यादिति चेन्न। मैवं येषाम्
व्रीहीन्प्रोक्षतीति व्रीहीणां दर्शपूर्णमासापूर्वे विनियुक्तानां कथमपूर्वसाधनत्वमिति वीक्षायां पुरोडाशा द्वि द्वि
रेति निश्चीयते पुरोडाशभावश्च तंडुलनिष्पत्त्या तंडुलनिष्पत्तिश्चावहननेनेति नियम्यते न च तथा स्वाध्याय
स्याक्रमपूर्वेण गत्वयनाध्ययनेन नियमो घटते। तस्मात्कर्म्मकारकसमवाय्यदृष्टार्थविधिरित्ययमपि पक्षो सं
गत इति द्रष्टव्यं। तव्यप्रत्ययविरोधान्न स्वतंत्रादृष्टार्थत्वमिति शंकते। ननु कर्मेति। ग्रामो गंतव्य इत्युक्ते यथा
गमिक्रियाया ग्रामसमवेतातिशयसाधनत्वं तद्वदध्ययनस्यापि स्वाध्यायगतातिशयहेतुत्वस्य तव्यप्रत्यया
प्रतिपत्तेः कथं स्वतंत्रादृष्टफलत्वमित्यर्थः सक्तूञ्जुहोतीत्यत्र सक्तुप्राधान्यभंगवत् स्वाध्यायेऽपि प्राधान्य ३१

भंगस्तां याकारकजनितातिशयानिरूपणादित्याह न कर्म्मकारकस्येति। वाक्यस्य तर्हि का गतिरित्याशंक्या
ह। सक्तुन्यायेनेति अध्ययनविधिर्न स्वतंत्रादृष्टार्थत्वे फलाश्रवणादिति शंकते। ननु तस्य यत इति। यदेवाधी
ते यमसः कस्मात्तस्य यदिन्द्रस्यभिवहर्लीत्याद्यर्थवादेषु फलश्रुतेरित्याशंक्य तस्यातिस्वजपाध्ययनविधिफ
लत्वात्त प्रथमाध्ययनविधिफलत्वमित्याह। अर्थवादेऽपीति। फलाश्रवणमसिद्धमित्याह। तत्र जपेति। ध्रु
तकुल्यो दर इति कर्म्माणि षट्त्रिंशत्समापश्लोके श्रृणोतीत्यादिफलश्रवणस्य यथाश्रविधमानार्थस्यार्थवा
दत्वं न तद्वदस्यामीत्याशंक्याह। संस्कारेति। विनियुक्तविनियोसमानयोः संस्कारो दृष्टः स्वाध्यायस्य
तथात्वात्तदध्ययनस्य संस्कारकर्म्मकत्वेन तथाभूतद्रव्यात्तत्कृत्वं नगत्वाच्च न तत्फलश्रुतेरर्थवादता इ

३८

तरस्य तु वाक्यादिनाकत्वंगतायां सिद्धार्थापर्णतादिफलश्रवणस्यार्थवादत्वं वट तद्दत्यर्थः। श्रुतव्याकरणस्यै
वैदिकपदश्रवणादर्थप्रतिपत्तिर्जायमाना लक्ष्यते श्यातश्वामायमूलविचारप्रवृत्तिरितिशंकते। नन्वदृष्टे
ति। अंगुल्यादिवाक्यार्थप्रतिपत्तिवद्दाभासत्वेनाप्याम्नायार्थप्रतिपत्तिर्घटत इत्याशयेनाह। नाविषेति। अर्थ
विवक्षायाः प्रतिबंधोभावस्तस्य दृष्टेरित्यर्थः। पूर्वपक्षमुपसंहरति। तस्मादिति। अदृष्टार्थत्वेन पद्मार्थः अवि
षयत्वादित्यत्र विचार्यमाणार्थस्य विशेषः। प्रमाणवदेव विचारस्यापि स्यात्तं येणार्थसाधकत्वात् किमालं
बनान्वेषणेनेत्याशंक्याह। प्रमाणप्रतिपद्यार्थसंभवासाधकत्वस्याभावाद्विचारस्याननुग्राह्यत्वं कयनं नव
तस्तीति विचारानारंभ इत्यर्थः। स्वाध्यायाध्ययनविधिप्रतिनकर्तव्यता। दितिअध्येतव्य इति तव्यप्रत्यया ३८

भिहितशब्दभावनाभाव्यं विनानुपपद्यमाना पुंप्रवृत्तिलक्षणार्थभावनामुत्पादयति साच भाव्यं विनानुपपन्नेति स्वा
ध्यायो भाव्यत्वेन संबध्यते। तस्य फलवदर्थावबोधपर्यंतत्वाभावे भाव्यतानुपपत्तेः परथावबोधपर्यंतता क्षिप्यते अर्थ
निर्णयस्य च विचाराधीनत्वाद्विचारकर्तव्यतामध्ययनविधिराक्षिपतीत्यर्थः। स्वाध्यायस्याविवक्षितार्थत्वान्न
तदर्थनिर्णयार्थं विचारप्रवृत्तिः अर्थभावनाभाव्यं तत्र्य देवकिंचिदित्यसंबंधाथ शंकते। नाविति। गृहाभिसं
धितु तस्मृति। नाम्नायस्येति यथाश्रुतमादाय शंकते। नचदृष्टार्थ इति। सिद्धांती स्वाभिसंधिमुद्घाटयति। ना
ध्ययनस्येति। क्रियाजन्यातिशयशालिनः कर्मकारकत्वा। स्वाध्याये वातिशयातिरूपाणात्तनस्य कर्मका
रकत्वमितिशंकते। ननु कर्मकारक इति० अतिशयानिरूपणमसिद्धमित्याह। उत्पाहेति० नाभयस्येति॥

३० अवाप्तिसंस्कारलक्षणातिशयस्येत्यर्थः। तदेवविवृणोत्यध्ययनेनेति अवाप्तिः स्वाधीनोच्चारणक्षमत्वं तदर्थो
वाङ्मनसव्यापारोध्ययनमितिविभागः। दृष्टद्वारकेति। प्रथमंपादंश्राव्यते अनंतरमर्द्धर्चः ततः पूर्णमाप्यतद
तिक्रमेणसकलस्याध्यायाप्तिरित्यर्थसांगेति। प्राप्तुपादीतिकर्त्तव्यतासहिते इत्यर्थः स्वाध्यायस्यान्यत्राव
विनियुक्तत्वान्नसंस्कारः फलमितिशंकते। ननुसंस्कृतेविति। विनियोगाभावोसिद्धइत्याह। नक्रतुविधीति।
क्रतुविध्यनुपपत्तिप्रमाणादित्यर्थः स्वाध्यायमंतरेणक्रतुविधेरनुपपद्यमानत्वं नप्रमाणमित्याशंक्याह।
क्रतुविधिरिति। करणेतिकर्त्तव्यताज्ञानाभावेनुष्ठानानुपपत्तेस्तन्निमवरपंभावितत्वनस्वाध्यायं विनेतिसंस्कृ
तस्वाध्यायाक्षेपइत्यर्थः। स्वाध्यायमात्राद्बोधोस्त्वतेर्नसंस्कारस्याक्षेपइतिशंकते॰ ननुपादानेति॰ पाठका ३१

दे स्वाध्यायश्रवणेपिबोधात्संभवे कथंस्वाध्यायनात्स्यतज्जनकताभिधानामित्यत्राह नसंस्कारमिति॰ सं
स्कारमंतरेणापिसांगाध्यापनबोधोयुक्तइत्यर्थः। क्रतुविधिः स्वरूपेणनसंस्कारमाक्षिपत्युतान्यायेसपापी
तिविकल्पासमंगीकरोति। सत्यमिति। द्वितीयंदूषयत्यध्ययनेति। वाक्यपाठमात्रजनितज्ञानस्याश्रुतोप
कारितलिखितपाठाद्यवासवेदीस्यज्ञानस्यापूर्वोपकारकत्वसंभवात्सांगाध्ययनविधानंनस्यात् अस्ति
वत। तस्मात्संस्कारस्वाध्यायोत्थज्ञानस्यापूर्वजनकत्वमित्यर्थः। तथापिकथंक्रतुविधेः संस्काराक्षेपकत्व
मितितत्राह। नहीति। विधिसामर्थ्यमितिसांगाध्ययनविधिसामर्थ्यमित्यर्थः।। दृष्टादृष्टप्रयोजनकल्पना
द्वारंस्यतंत्रादृष्टकल्पनमित्याशयनोक्तंबोधयस्मारयति। ननुस्यतंत्रेति। प्रमाणत्वंस्वदृष्टानिकल्प्यानिश्रुतह्

४०

न्यपीति न्यायमभिसंधाय समाधत्तेन दृष्टेति। दृष्टं यदिदमक्षरस्वीकारणां तज्जन्यज्ञानादित्र यत्त समवायीत्य
र्थः। प्रवृत्तित्यादिशब्दार्थः श्रुतिविरोधेनेति। स्वाध्यायो ध्येतव्य इति तव्यप्रत्ययेन कर्म्मकारकभूतस्य स्वाध्याय
स्य प्राधान्यं अध्ययनवस्यत्वं छेयत्वं लक्ष्यते तस्य परित्यागेन स्वाध्यायस्योपसर्ज्जनत्वमादाय अध्ययनस्य स्वत्वे
यादृष्टार्थत्वकल्पनमयुक्तमित्यर्थः। अध्ययनस्य कर्तृगताभावात्कथं तदुपकारकत्वमित्याशंक्याह। अध्ययनव
दिति अध्ययनस्य स्वाध्यायसंस्कारार्थत्वं तव्यप्रत्ययविरुद्धमिति शंकते। ननु तव्येति। अविधारणस्योपरक्त
मित्यनेनानुषंगः अध्ययनस्यापूर्वद्वारेण फलसाधनत्वं कस्मात्स्वाध्यायसंस्कारद्वारेण फलसाधनत्वमेवा
स्त्विमाशंक्याह। स्वतंत्रमिति। स्वाध्यायासमवेतमित्यर्थः। अपूर्वप्रकृत्यर्थेनान्वयः तयोः समानपदोपात्त ५०

त्वात्स्वाध्यायेन भिन्नपदोपात्तेनेत्यर्थः। इष्टसाधनत्वादिः प्रत्ययार्थत्वात्रापूर्वस्य तदर्थत्वमित्याशंक्य तव्यप्रत्य
यात्वात्प्रकृतेः क्रियाबोधकत्वादित्रत्यनिर्देश इत्यर्थः। नयोरेवकृत्यकृत्यसत्यर्था इति तव्यप्रत्ययस्य कर्म्मणापि स्म
रणादेकपदोपात्तत्वमाह। नेन्वेति। अंगीकृत्याह पूर्व्वेति। पुस्तिङः तत्पदमिति पाणिनिस्मरणाद्यद्याप्यनेन स्मरणेनैकं वद
तथापि पदगतत्वादिति स्मरणाबोधकं पदमित्याशंक्य कर्म्मकारकस्य। तत्र तव्यप्रत्ययस्योपात्तकर्म्मकारकसम
वेतापूर्वाभिधानेनेरपेक्ष्यं इत्यत्र सापेक्षत्वं तथा यत्नाघवादापाः पक्ष आश्रयणीय इत्यर्थः। अपूर्वस्य क्रियाजन्यत्वात्त
दुपरक्तत्वं युक्तमित्याशंक्याह। भावार्थेनेति। यद्येन ज्ञायते तत्तत्समवायीति न नियम इत्युक्त्वा छिदि क्रियासाध्य
द्वैधीभावादाश्रयाभिचारादित्यर्थः। अध्ययनस्यादृष्टार्थत्वे विपमंत्रवद्दृष्टस्याविवक्षितार्थत्वं स्यादिति परक्तं तद

नुपपन्नं। किंस्वतंत्रादृष्टार्थत्वमेवार्थपरतापतिबंधकं उत्तेतरपदपि। आद्येपादं विविवती यं किमापायमा त्रस्याथवा
ध्ययनविधायकव्यतिरिक्तस्येति नाद्यइत्याह। दृष्टार्थत्वेयति। नद्वितीयोपि। अध्ययनविधिवाक्यस्या विवक्षितार्थ
त्ववदितरत्रापितदुपपन्नेरित्यर्थः। द्वितीयमुपसंहारव्याजेननिरस्यति। तस्मादिति। अदृष्टस्यैतिबंधकत्वामावा
दित्यतेन संबंधः तत्रहेतुमाह॥ स्वसमवायित्वयेति। अदृष्टस्वशब्दार्थ। स्वाध्यायोध्येतव्य इत्यारंभप्रदर्शनफल
माह। तदेवामिति। स्वाध्यायाध्ययनस्य विचारहेतुत्वात्तदनंतरं तस्यावसरइत्यर्थः। पूर्वग्रंथेन प्राचीनविचार
स्यैकदेशविषयत्वमिद्धः स्यादिहीत्यादिग्रंथवैयर्थ्यमित्याशंक्याह। प्रारभ्यमाणेति। आरभ्यपवीत्यविचन
याश्रगतार्थत्वं पूर्वग्रंथोक्तं। अत्रत्वारभ्यमाणधर्मविचारयापि दुपपादितइत्यर्थः। कथंच सूचितामनुपप

त्तिं दर्शयति। ननुवेदेति। प्रतिवचनस्य प्रश्नाननुसारित्वशंकां निरस्यति। ननु सामान्यतिवेदार्थमात्रेपि विवा
रपक्षेतत्रैव सामान्यप्रतिपत्ति विशेषविप्रतिपत्ती दर्शनीयेन च तया प्रदर्श्यते तस्माद्धर्मविषयसामान्यप्रसिद्धपादि
दर्शिनादिवाक्यानित्यविशेषवचनेनतत्त्वविषयत्वेननियम्यतइत्यर्थः। तत्राग्निहोत्रादिलक्षणइत्यादिः किंपूर्वपय
क्षिणो ग्रंथः उतासिद्धांतिनः नाद्यः तेनाग्निहोत्रादेर्धर्मत्वेनानंगीकरणात् नद्वितीयः वेदवाक्यानां विचाराभ्यस्त
रावंगीकरणात्तन्निषेधानुपपत्तेः। अतः आसंगतोयंग्रंथइत्याशंक्य तात्पर्यमाहेथमिति। पूर्वपक्षत्वमप्यनुप
पन्नामित्युक्तमित्याशंक्याह० नकारस्त्विति। तत्रेत्यादेरेषोर्थः यावज्जीवादिवाक्येषु मन्त्रमुक्त्यमग्निहोत्रादेर्ध
र्मताभावइति शंकायामुक्तं नतत्प्रतिपादकानामिति विवक्षितार्थत्वाद्विचारानवसरोधाकर्यमित्यालत्राह।

नामीति। वक्तुर्विवक्षाधीनं शब्दतात्पर्यं अपौरुषेये वेदे तु न घटत इत्यर्थः। बुद्धादिवाक्यमपि न विचार्यं विवक्षानुरो
धेनैतस्य प्रामाण्यापादितसाहानवेति। सामान्यप्रसिद्धादेर्धर्म विषयोक्तोक्तेर्विचारास्यैकदेशविषयत्वं तत्कस्मा
त्सूत्रे तदर्थप्रदर्शनमित्याशंक्याहैवमिति। सिद्धांतपर्यालोचनयाप्येकदेशविषयत्वमिति दर्शयितुं सूत्रे त
दर्थप्रदर्शनमित्यर्थः। फलाभावाद्विचारवैयर्थ्यमित्याशंक्याह। धर्म्मो यतीति। अविवक्षितार्थत्वात्र विचारः विव
क्षितार्थापेऽपि न तद्विचारप्रयोजनकमस्तीत्याशंक्याह। तदर्थेति। स वा सावर्थश्चेति तदर्थः। तद्विवक्षा विचारा
वेसर इति प्रतिभासते न वत घुज्यते आम्नायस्यानर्थक्याद्विवक्षया अविचारणा चेत्याशंक्याह। तस्येति। स्व
त्र्यास्वामिनिहानुपपुक्तमित्याशंक्याह। विवक्षेति। भलार्थवेदो जैमिनिनाप्युदस्त इति कथं गम्यते तत्र

हायमर्थ इति। सामान्यप्रासिद्ध्यादेर्धर्म्म विषयत्वोक्तेर्मेप्रश्नावसर इत्याशंक्य तात्पर्यमाह। नन्वेयेति। स्वाध्यायस्या
स्यत्र विषयवाचकेन विषयिणोऽध्ययनस्याभिधानमिति द्रष्टव्यं। अध्ययनस्य विचारहेतुत्वेऽपि कथं स सकलवेदार्थवि
चारविचारसिद्धिरित्याशंक्याह। स्वाध्याय इति। स्वाध्यायस्य भामसाकांक्षत्वाद्राम्नस्यार्थावबोधस्य विचारमंतरेणानु
पपत्तेर्वेदार्थविचारस्याक्षिप्त वइत्यर्थः। धर्म्मस्यापि तदर्थत्वात्र तद्विचारप्रतिज्ञाविरोध इत्याशंक्याह। न धर्म्मेति। स्वा
ध्यायाध्ययनमात्रभाव्यस्यार्थावबोधस्य सकलवेदार्थविचारहेतुत्वमित्यर्थः। विरोधस्यानिराकरणात्प्रतिवचनस्या
ननुरूपत्वमाशंक्योत्तरग्रंथं तत्संदर्भस्य तात्पर्यमाह। सामान्येति। स्वर्थं भावे तृतीयाश्रेयः साधने धर्म्म इति सामान्यरूपे
णाग्निहोत्रादिरेवेति विशेषरूपेण विचार्यमानत्वेनाप्रधानभूतो यो धर्म्मस्तस्याभिद्धापियद्धर्म्मपदं तेन ग्रहणसाम
र्थ्यादि विति ग्रहः। अथातः शब्दाभ्यां प्राबल्यं दर्शयितुं प्रधानेति विशेषणं तदुपपादयितुं सामान्येत्यादिः। धर्म्मस्ये

४२

भविर्यत्वे हेत्वंतर माहात्तस्येति। न केवलं विप्रतिपन्नत्वेन संदिग्धत्वाच्च धर्म्मस्य विचार्यत्वं किंतु फलवत्त्वादपीत्याह पु
रुषार्थेति। वेदार्थस्य तद्धेतुलक्षणप माह। प्रमाणेपेति। वेदप्रमाणोपसिद्धो तदर्थोधिगम्येत नान्यथा अत एव न वि
शेष विप्रति पत्त्यादेरधिगम्य इत्यर्थः एवं समुदायार्थयामभिधायोक्तमर्थं टीका हृदं करोति। तत्रेति अथातः शब्द
य पीलोवन यावेदर्थ एवं विचारित इत्युक्तमनुवदति। ननु धर्म्मेति। उक्तमित्युक्ते गौ करोति। मन्यामि तर्हि न ध
र्म्मस्य विचार्यत्वे स्यत आहाग्निहोत्रादेरिति। धर्म्मत्वं घटादिति। धर्म्मविप्रति पत्तिसंधव्यादित्यर्थः। तर्हि चे
पं वदनादरपि धर्म्मत्वं धन्वा सोपि विचार्यः स्यादित्याशंक्याह० देवागत्येति। धर्म्मत्वादिति। अग्निहोत्रादेर्वे
दयोध्यश्रयः साधनत्वाधिकारणत्वादित्यर्थः। नवास्मिन्पक्षस्याध्यायस्य हेतुत्वादिकमनुपयोगित्वादिति

वाच्यं। अग्निहोत्रादेरपि वेदार्थत्वात् तत्प्रदर्शनस्याप्युपयोगित्वादित्यर्थः। तदभिप्रेत्यायेदार्थ इत्युक्त्वा टीका यविदा
र्थीपश्रेयः साधनत्वा। इत्यार्थ इति यक्तव्यत्वाच्चाप्रितिनदिदमुक्तं धर्म्मत्वयेति। किंच धर्म्मप्रमाणविप्रतिपत्त्यु
पलक्षे शास्त्रायार्थ विवक्षाप्रदर्शनमुपयुक्तमित्युक्तं यत्न इत्यत्रत्न यच्छब्देन प्रकृतस्य विचार्यस्य परामर्शशंकामा
यत्तीयाति। यत इति। स्वरूपप्रमाणयोर्विप्रतिपन्नाविसत्रोक्त प्रमाणविप्रतिपन्ने यच्छब्देन परामर्श इत्यर्थः। वि
वक्षितो सावित्यचावसराग्निहोत्रादिपरामर्शशंकां निरस्यति। तेनेति। जग्ध्येनेव तु संसिध्येत ब्राह्मणो नात्र सं
शय इत्यादिवाक्यादध्यधनस्य जप इतो रेण पुरुषार्थहेतुत्वप्रतिपन्ने विचारो वृथेति शंकते। ननु पुरुषार्थत्वादिति।
कर्म्मकारकप्रधानाध्ययनविधायित्व प्रत्ययविरोधात्रात्नस्य स्वतंत्रपुरुषार्थसाधनत्वमित्याह नत्याहति।

टीकापेक्षितं विरोधनिराकरणोपसंहरणमातन्वानइति। इत्यमिसंधायधर्मजिज्ञासायुक्तेत्याहेत्यर्थः। विरोधमंगीकृ
त्यदूषणमाह। किंचेति। विचार्यमाणविषयत्वेन धर्मशब्दस्यप्राधान्यमित्यर्थः। किंचजिज्ञासितंहिविचार्यधर्मश्चजि
ज्ञासितइतिसएवविचार्यइत्याह। पुरुषार्थेति। वेदार्थजिज्ञासायाधर्ममेवेतिकथमुक्तंतत्राह। नत्स्यापीति। चोदना
याचेदात्मकत्वाच्चोदनालक्षणोधर्मइति। अभिधानयुक्तमित्याशंक्यतात्पर्यमाह। सामान्येति। यद्यपिचोदनापाव
दात्मकत्वंतथाप्यचोदनात्मकवेदार्थविशेषशंकांव्यावर्त्तयितुंवेदग्रहणंयुक्तमित्यभिप्रायः। एकस्यसूत्रवाक्यस्य
स्वरूपप्रमाणपरत्वमयुक्तमित्याशंक्यकस्यचोभयमुभयार्थविवक्षितत्वान्नविरोधइत्याह। धर्म्मेति। चोदनाग्रहण
स्यभूतार्थप्रतिपादकवेदवाक्येनविनानानुपपत्तिरित्याशंक्याह। नत्ववेदेति। अन्यदेवप्रयोजनमित्यत्रकस्मा ५५

दन्यदितिवीक्षायामाहानतनुचोदनेतिअर्थभावनालक्षणपुरुषप्रवृत्तेपुरुषार्थपर्यवसानमित्येवोधायेतुंचोदनाग्र
हणमित्यर्थः। प्रयोजनांतरंदर्शयितुंचोदनाशब्दानिरुक्तिःप्रदर्श्यते चुदप्रेरणइतिटीकायांतस्यापमर्थः। प्रेरणा
कर्म्मवाच्यंयस्यधातोःसप्रेरणाकर्म्मातस्यनिष्पन्नंरूपंचोदनेति। शब्दभावनाविधिरिति। केचित्। इष्टसाधनमि
प्रयेरनियोगइत्यन्ये। ततःकथंप्रेरणात्मकोविधिरित्युक्तमित्याशंक्याहायमर्थइतिप्रेरणालिङादिशब्दव्यापारः
शब्दभावनेतिकथ्यतइतिसंबंधःपरिस्पंदपरिणामविलक्षणार्थभावनोत्पादनानुकूलःशब्दव्यापारःशब्दभा
वनेतिदृष्टव्यं। शब्दभावनाप्रवर्त्तिकाचेत्तर्हिततएवालौकिकमर्थभावनयायेनतद्रव्यत्वेनस्वार्गादिकमादि
यतत्राह। पुरुषेति। शब्दभावनायामाव्यसौकांक्षत्वाद्राव्यांतरादर्शनाच्चधात्वर्थोस्त्यनुकूलश्चोदासीन्य
प्रयुतलक्षणःकष्टव्यापारार्थभावनामाव्यास्येयेत्यर्थः। तर्हिशब्दव्यापारस्यसदापुरुषप्रवृत्तिजनकत्वंकिंनस्या

४८

दित्याशंक्य सहकार्यभावान्नैवमित्याह। स्वतानेति। शब्दभावना स्वशब्दार्थः तथापि सर्वा किमिति न प्रवर्त्तयतीत्य
त्राह। स्तितीति। सप्रजापतिरात्मनो वपामुदखिददित्यादिस्तुत्यर्थवादः सोरोदीदित्यादिनिंदार्थवादः तदुक्त
ज्ञानमिति कर्त्तव्यतेति यावत्फलवाक्यं च आदिशब्दार्थः शब्दभावनाप्रतिपत्त्युपायाभावात् कथं तत्ज्ञानमित्यत आ
ह। लिङादीति। लिङादिशब्देनाभिधीयमानइतिसंबंधः। लिङादिनामर्थभावनाभिधायित्वात्र शब्दभावनाभि
धायित्वमित्यत आह। आख्यातेति। कथं तर्हि शब्दभावनाभिधायकत्वं तत्राह। लिङ्विशेषणेति। लिङ्रूपो विशे
षोयस्य स तथोक्तः लिंङ्शब्दः अप्रत्ययांतरगतविशेषोपलक्षणार्थः लिङादिशब्दस्य ख्यातत्वाकारेणार्थभाव
नाभिधायकत्वं लिङादिविशेषाकारेण शब्दभावनाभिधायकत्वमित्यर्थः। पक्षांतरमाह। शब्देनेति। शब्दगुण
तेति। अर्थभावनाभिधानसामर्थ्यमित्यर्थः। ज्ञानस्य कथं शब्दभावनाकरणत्वं तस्याः प्राक्सिद्धत्वादित्या ४९

शंक्याह। सर्वत्रेति। शब्दभावनायाः स्वरूपेण निष्पन्नत्वेप्यर्थभावनानिष्पादकत्ववैशिष्ट्योत्पत्तौ ज्ञानस्य करणत्वमि
त्यर्थः। सामान्योक्त्यापि प्रसक्तं नियोजयति। तत्रशब्देति। भवत्वेवं शब्दभावनाया अर्थभावनानिष्पादकत्वं ततः किमि
त्यत आह। सावेति। तस्याः पुरुषप्रवृत्तेरित्यर्थः। अर्थभावनायाः पुरुषार्थपर्यवसायित्वेपि कथं स्वर्गादिर्भाव्यता तस्य
पुरुषविशेषणत्वाद्धात्वर्थस्य च समानपदोपात्तप्रत्यासन्नहितत्वादित्याशंक्याह। तत्रश्चेति। चोदनेति शब्दभावना
भाव्यार्थभावनाया इत्यर्थः। स्वर्गादेर्नीर्षभाव्यत्वं न दृष्टेरित्याशंक्येति कर्त्तव्यधात्वर्थानुष्ठानात्स्वर्गादिसिद्धियुक्तेः
त्याशयेनाह। धात्वर्थेति। तथापि वेदपदमुदासेन चोदनाग्रहणे किं निमित्तमित्याशंक्याह। तदेवमिति। अध्यय
नस्य पुरुषार्थपर्यवसायित्वेपि यागभावनायाः कथं स्वर्गपर्यवसायित्वं ततः परिहारस्याभासत्वमित्याशंक्याह ने

४८

वत्सारमिति। समाधिप्रकारमेवाहतस्येति। स्वविषयं वलात् प्रवर्तकज्ञानं वेति स्वविषयप्रवर्तकज्ञानं तत्कारणं यस्याः
सा तथोक्ता। अध्ययनस्य फलमध्ययनं फलं तत्प्रतिपादका येर्थवादादयः ॰ तदुदर्थं ज्ञानमिति कर्तव्यता यस्याः सा
तथोक्ता प्राकरणिकफलज्ञानस्याप्यंगत्वात् तद्धेतुत्वप्रकरणमादिशब्दार्थः। टीकोक्तस्याकारादन्यथा संदेहव्युद
समाहापिवेति। प्रवर्तकवचनस्य चोदनात्वात्तल्लक्षणो धर्म इत्युक्ते। प्रवर्तकस्यादिवाक्यानामर्थान्तरपरत्वशंका
स्यात् तन्निरासार्थं सर्वस्य वेदस्य धर्मे प्रामाण्याभिधानमुचितमित्यर्थः। असंदेहादित्येतन्व्यसर्पवनरूपत्वमुत्त
रग्रंथस्य व्याचष्टे पतिसंदेहांतरमिति। चोदनानां लोके वेदे च विद्यमानत्वाच्चोदनालक्षणोर्थो धर्म इत्यत्र कीदृश्या
यस्यामिति विशयः स्यात् तन्निरासार्थं वेदाग्रहणमेवावितमित्यर्थः। संदेहव्युदासस्यान्यथोपपत्तिं शंकते। ननु ३८

वेदेति। वेदस्य प्रथमसूत्रे प्रस्तुतत्वान्न द्वितीयसूत्रेपि वेदचोदने वोपादीयत इत्यर्थः। प्रथमसूत्रस्यापि सांदिग्धा
र्थत्वात्तेनैतन्निरस्त इत्याह। न तत्रेति। प्रथमसूत्र इत्यर्थः। विशेषाभावादिति वेदाध्ययनानंतरं इति विशेषाभावादि
त्यर्थः। अथशब्दस्यानंतर्यार्थत्वात्कस्यानंतर्यमिति विक्षायां वेदाध्ययनानंतर्यं परिशेषात्सिद्ध्यतीत्याशंक्य परि
शेषो सिद्ध इत्याह। नेनेति। वेदाधिकरणपर्यालोचनया चोदनाशब्दार्थो नियम्यत इत्याह। प्रकारांतरेणेति। एकेनैप
पिकादया वेदानुपुरुषबुद्धिविरचितानां वक्ष्यते। तत्र हेतुमाह। संनिकर्षमिति। पुरुषसंबंधाभावे कावकमित्यादि
समाख्यानुपपत्त्या पुंबुद्धिप्रभवत्वमिति वेदाधिकरणाक्षरार्थः। सूत्रकारस्य कथमकौशलमिति शंकायामा
ह। लक्षणेति। सूत्रमाप्यवार्तिककाराभिप्रायेण वेदैकदेशस्याविचारितत्वं प्रागुक्तं तत्कथं सूत्रकारेणैवमुक्त

४७ मित्याशंक्योपलक्षणापरतया व्याचष्टे। तस्मादिति सूत्रकृदादिवचनसामर्थ्यादेकदेशस्य विचारितत्वात्तृतीयत्रे:
कथं वोधयितीत्याशंक्याह। ननु तेषामिति। तस्याम्नायस्य धर्म्माववोधनं नियोगस्तानं दृष्टं प्रयोजनमिति भा-
ष्यार्थः। तेषु पञ्चस्वर्थेषु भूतानां वर्त्तमानापपदानां कार्य्येण वाक्यार्थेन तत्संगति पञ्चस्य सत्वेन समाम्नाय इति सूत्रार्थः।
ननु परस्य इस्य इविरेधात्रद्वचनमप्रमाणमिति शंक्य उत्तरानुसारेण प्राचीनवचनात्तस्य नयनसंभवादित्यर्थः।
सत्यमित्यत्रोपक्रमानुसारेणोत्तरस्य नयनमित्युक्तं तत्कस्माद्विशेषाभावादित्याशंक्य तात्पर्यमाह। सत्यमिति
कार्यार्थत्वं दर्शितमित्युक्तं मृगीकृतं चेत्तर्हि कथमेकदेशविषयत्वं विचारस्येत्याशंक्याह। धर्म्मेति धर्म्मसूत्रचोद-
नासूत्रे चेति। धर्म्मचोदनासूत्रे तयोः प्रक्रमसामर्थ्यादित्यर्थः। दृष्टो हीति ग्रंथस्यैकदेशविषयत्वोक्तेरपि वलि ४७

पुनरुक्तमित्याशंक्याह। समाम्नायेनेति। तत्र कृत्स्ने वेदवाचकपदाभावादिति द्रष्टव्यं। कथं शब्दस्याविता मनुपपत्तिर्दर्शय-
ति। नन्वाम्नायेति। आत्तिक्रमिष्याम इत्यममाम्नायामित्यत्राम्नायस्य प्रकृतत्वात्तच्छब्देन तत्परामर्शः कस्मीचवाधनं दृष्टो
र्थः इति विशेषणादर्थात्तिरव्यावृत्तिर्लक्ष्यते तत्तः कथं तार्थत्तासद्भाव इति उक्तमित्याशंक्याह। न विनियोगेति। कृत्स्न-
स्य वेदस्य न कर्म्मणि विनियोगपरत्वमित्यर्थः। यद्यप्यानर्थक्यशंकायामर्थमात्रप्रदर्शनमुचितं तथापि धर्म्मजिज्ञा-
सेत्युपक्रमानुरोधेन कर्म्मावबोधनमित्युक्तं ननु सकलस्याम्नायस्य कर्म्मणि विनियोगाभिप्रायेणेत्यर्थः। अति-
क्रमिष्याम इत्यधीमायं मिमां। मित्वाध्याया दितिकल्पयामर इत्यर्थः। अयोगात्याये माप्यवच्छेद शब्दस्य सप्य
ताव्याचष्टे। अयोगव्यवच्छेद इत्यादिना। यद्यपिना। यद्यपि निखिलस्याम्नायस्य धर्म्मविनियोगपरं भाष्यं तथा-
पि धर्म्मवेदत्वलक्षणापि वेदार्थत्वोक्तेर्न पृथग्लक्षणविचार इत्याशयेन शंकतेनानुकर्म्मेति। कर्म्मशब्दस्य। अयन्त्र

प्रयोपिनात्र तद्विवक्षेत्याहनेत्यादिति। तत्रहेतुं पृच्छति क्रियायामिति। धर्मस्यात्र प्रकृतत्वात्स एवात्र निर्दिश्यत इत्या
ह। प्रकरणादिति। आनर्थक्यमर्थाभाव इति तेनातुक्तं त्वांतं निराकरणमनुचितमित्याशंक्य विकल्पपूर्वकल्प
वृष्टे। आनर्थक्यमिति। अध्ययनेन। द्वितीयं विकल्पमनुपपत्त्याध्यायाध्ययनविधिरित्यनेन तस्य निरसनमिति प्रतिभा
तितदर्थमाहाध्येति। अथेत्यारभ्यनग्राह्यमिति सत्तोनुवादः। उत्तरेण दूषणमित्यर्थः। निष्प्रयोजनत्वमिष्टमिति शं
कायामध्ययनविध्युपात्तत्वात्तस्य स्पष्टत्वमित्यभिप्रायेणोक्तस्याध्यायेति। यद्यपि सोरोदीदित्यादिवाक्ये पुरुषा
र्थसंसर्गो नोपलभ्यते तथापि स कल्प्यत इति शंकेचेन तुल्ये षामिति। वाक्यभेदप्रसंगश्च गात्र पृथक्फलकल्पने
मित्याहनेत्याहेति। वाक्यभेदोप्यत्र किंचित्तदुष्ट इति शंकते। तत्वधृत्वादिति। उपरिधारणस्यापूर्वत्वात् पूर्वेणैक
वाक्यतानुपपत्तेश्चैतस्य धर्मोपासमारोपाभिधानमुचितमित्यर्थः। असंदेहादिनेतत्वस्य पर्वतत्वमुक्तं ग्रंथस्य

तत्र वाक्यभेदकल्पनं न तथात्र तत्कल्पकमस्तीत्याह। नेत्यादिति। पुमर्थशून्यत्वात् सोरोदीदित्यादिवाक्यानां क्रियार्थ
त्वं वत्तद्वेदान्तानामपि भूतार्थत्वात्फलशून्यत्वमिति शंकते। वेदान्तेति। फलशून्यत्वमसिद्धमित्याहनेत्याहेति। वेदा
न्तानां सकलत्वमभिधायानतः स्वयमित्यत्र फलवैधुर्याभिधाने विरोध इत्याशंक्याह। नइति। वेदान्तानां क्रियासंस्पर्श
मन्तरेणा फलवत्त्वसमवेतः शब्दार्थः केषांचिदेव क्रियाशेषत्वं न सर्वेषामित्येतस्यार्थस्य प्रतिपादकश्च नोदाहरण
मनुपलब्धिनिरुद्धमित्याशंक्याह। क्रियेति। तद्विधान्येवेत्येवकारार्थमाह। न वेदान्तेति। केचिदित्यत्र नैयायिकपामि
ति वीक्षायामाह। यदपि केचिदिति धर्माधर्मोशास्त्रारंभः पूर्वत्र निर्दिष्टः तत्रोन्यथाशास्त्रारंभे अधर्मोपाधो
विचार इत्युक्तं स्यात् स चानुपपन्नः न च तत्रेहत्वपन्यास इत्याशंक्याह। यमाशय इति। सामान्यप्रतिपत्त्योर्द्वेदार्थे

४८

संभवात्तत्र तदुपाधेो विचार इति शंकते। ननु सामान्येते। असंभवो सिद्ध इत्याह। तत्रेति। वेदार्थे विप्रतिपत्तिश्चभिन्नपक्षसिद्धिरिति।
उद्देश्यविधेयभावनिरूपणार्थ उपक्रम इत्यनुपपन्नं आधेयस्त्र तदनुपपादनादित्याशंक्य सामान्येन वेदार्थविचार्यत्व सि
द्धो तद्विशेषविचारोपपत्तिरित्याशयेन वेदार्थमात्रविचारं समर्थयते स्म तत्कृतिपाह। न्यायत इति। आलंबनप्रमाणाभा
वाभावाभ्यां विनेति द्रष्टव्यं। पूर्वपक्षमाह नेति। हेत्वसिद्धे शंकते। नन्वाम्नायेति। तस्याविवक्षितार्थत्वसिद्धे तद्विचारो
युज्यते न तदेवासिद्धमित्याह। नाध्यायनेति। विधिशेषत्वमसिद्धमित्याह। कथमिति। उपनीयत तमध्यापयीतेति लिङ
पत्तपन्त पाध्यापनयोरेकार्थत्वाद्रूपनपाविधेश्च साधिकारत्वादध्यापनविधेरपि साधिकारत्वं आध्यापनस्य चाध्य
यनं मंतरेणासंभवादध्ययनस्य तच्छेषत्वमित्याह। अध्ययनमिति। तथापि कथं स्वाध्यायस्य तच्छेषत्वं तत्राह।

४९

स्वाध्यायोपीति अध्यत्वामाबे ध्ययनासंभवात्स्वाध्यायस्याध्ययननिष्पत्तिद्वाराध्यापनविधिनिष्पत्तिपरत्व
मित्यर्थः। तथापि कथमर्थविवक्षाभव इति आशंक्याह। विधेति। अध्यापनविधिप्रयुक्तिमात्रादध्ययनस्य न तदंग
त्वं न ह्याधानमुत्तरक्रतुप्रयुक्तिमात्रं तदंगमित्याशंक्यायां तेषामेव पक्षांतरमाह। अन्यत्विति। भक्तं भाव्यर्थोपदि
श्यत इति न्यायात् स्वाध्यायस्यापूर्वशेषत्वमित्यर्थः। स्वाध्यायाध्यापनस्याध्यापनविधिनिवर्तकत्वात् विमुक्तत्वा
कर्थंतरस्याध्ययनापूर्वशेषत्वं तत्राह। तत्रविहितेति। अध्यापनविधेरध्ययनमात्रप्रयो। जकत्वे। नुपनीताध्ययन
मप्यापत्तेतस्माद्विहिताध्ययनप्रयोजकत्वमिति स्वाध्यायस्याध्यायनानियोगांगत्वमित्यर्थः। सिद्धांतमाह।
तत्रोति। स्वाध्यायस्याविवक्षितार्थत्वात्तदनुग्राहकविचारारंभो युक्त इत्यर्थः। विवक्षितार्थत्वमसिद्धमित्युक्ते

नोधं स्मारयति। नन्वध्यापनेति। अध्ययनविधिप्रयुक्तानुष्ठानत्वादध्ययनस्य तदंगत्वमित्येतावदयुक्तमित्याह।
नप्रयुक्तीति। प्रयुक्तेरंगत्वप्रयोजकत्वमपि दृष्टमिति शंकते। ननु लिंगेति। पशुत्वाय जेनारुणयाक्रीणातीति
तिलिंगात्। सप्तदश प्राजापत्यानित्यादौ संख्याप्रोक्षणादौ रादिशब्दार्थः। तत्रापि तत्प्रयुक्तिमात्रमंगत्वप्र
योजकमित्याह। नप्रकरणादिति। क्रत्वादिवत् प्रयुक्तिमात्रमपि प्रयोजकमिति न शंक्यं। निरस्तत्वादित्या
ह। नचेति। मैत्रावरुणमनूद्य निरस्यति। यत्त्विति। अपूर्वस्य स्वरूपेण पुरुषार्थत्वात्पुरुषार्थपर्यवसायित्वं वक्तव्यं।
नवदृष्टे फले संभवत्यदृष्टकल्पनानायुक्तेत्यर्थावबोधः फलमित्यर्थः। अर्थावबोधस्य न विधिफलत्वं
अन्वयव्यतिरेकसिद्धत्वादिति शंकते। नन्विति। अन्वयव्यतिरेकाभ्यां स्वाध्यायावबोधः फलमित्यर्थः अर्थावबोध १०

स्य न विधिफलत्वं अन्वयव्यतिरेकसिद्धत्वादिति शंकते। नन्विति। अन्वयव्यतिरेकाभ्यां स्वाध्यायस्य यदर्थावबोधजनन
सामर्थ्यं दृष्टं तज्जन्यमित्यर्थः। दृष्टसामर्थ्यजन्यमित्येतदंगीकरोति। सत्यमिति। न तर्हि विधिफलत्वमित्यत आह
नैयोगिकेति। सांगाध्ययनसंस्कृतस्वाध्यायसमुत्पन्नस्य तज्ज्ञानस्य क्रतूपकारि अन्यथा विधिवैयर्थ्यात्स्यादि
त्यर्थः। लोके विवक्षामानादस्तात्पर्यनिमित्तत्वे समधिगते तस्य वेदेनुपपत्तेः सांगाध्ययननियोगाधीनं तात्पर्यक
ल्पनमित्यार्थकल्पनमित्याह। अथवेति। तत्र तस्यार्थमाह। तत्र वेदार्थ इति। तत्रेति। पूर्वतन्त्र इत्यर्थः वेदार्थोपायो वि
चारस्य प्रवृत्तत्वात्कथं न निखिलप्रतीतिरित्युक्तमित्याशंक्याह। वेदार्थ इति। दार्थमात्रस्य विचार्यत्वेन धर्मग्रह
णानुपपत्तिरित्यर्थः। कथं शब्दस्य विनामनुपपत्तिं दर्शयति। ननु कस्येति। विचारस्यैकदेशविषयत्वे कृत्स्नाध्य

८१

यनविधिप्रयुक्तत्वनुपपत्तिरित्यर्थः। मेवमित्यादि परिहारसूचकाभावादेक ग्रंथत्व शंकानिरस्यति। परिहरतीति।
विचारस्यकृत्स्नाध्यनविधिप्रयुक्तत्वासंकलवेदार्थविषयत्वंविवक्षितं अथैकदेशविषयत्वेन कृत्स्नाध्ययनविधि
प्रयुक्तनुपपत्तिः तत्राद्यदूषणं टीकायाभिधाय द्वितीयं दूषयति। प्रतिवाक्येति। वाक्याध्ययनं वाक्याध्ययनं प्रति
तथा वाक्यविचारं वाक्यविचारं वाक्यविचारं प्रतिवेत्यर्थः। अध्ययनविधेः सकलवेदसाधारणपपिकेषां वि
वाक्यानामध्ययने इतिकर्तव्यभेदापेक्षणा द्विविधव्यापारभेदः तथा वमुमुक्षूणामल्पत्वाज्ञो गार्थिनां ववकुलत्वा
त्तदभिलषितस्वर्गाधिप्रतुरोधेन तद्वाक्यविचार आक्षिप्यतेनकृत्स्नावेदविचारः सर्वेषां वेदार्थानितानां ज्ञाना
भावादित्यर्थः। तत्रदृष्टांतमाहाध्ययेति। तथा मतिस्पेनेन हेतोनुक्तत्वाद्यत इत्यादेर्थैयर्थ्यमित्याशंक्यास्मिन्

८१

Dr. Bhau Daji Memorial

कल्पेनकेवलमश्रुतकल्पना श्रुतस्यागोपात्याहान्येथेति। धर्मेतिज्ञासेति धर्मग्रहणा दिकेदेशाक्विारपर्युदासः इतरवे
दार्थजिज्ञासेति स्यादित्युक्ते सत्यमितितदंगीकारः पूर्वपक्षिणाश्चाभातितथावनविप्रतिपत्तिरित्याशंक्याभिभि
प्रायं दर्शयति। धर्म्मेति। नहिधर्मग्रहणमनुपपन्नमितिशंकते। किंत्विति। प्रयोजनवशात् ग्रहणमित्याहवेदेति
धर्मोपाधीन विचारप्रवृत्तिरित्येतावन्मात्रं मन्तव्यं शब्देनांगीकृत्य तेधर्मशब्देन वेदार्थस्य विवक्षितत्वात्तस्यापि विचार
योग्यतया वेदार्थोपाधौ विचारस्य प्रयुक्तत्वात् परिहारस्याभासत्वमाशंक्याह परिहरतीति। सम्यक् परिहारमे
वाह। धर्मशब्दस्येति। धर्मशब्दः किंवेदार्थेषु घावर्तते आहो गुणयोगेन नाघइत्याहानतावदिति। अविप्रतिपत्त्यप्र
योगस्य दृष्टत्वा दत्र च प्रयोगविप्रतिपत्तिं वेदार्थेरूढत्वमित्यर्थः। द्वितीयमनुवदन्यथान्वयेति। वेदार्थोपाधौवि

४२

याद इति वदता। किमभिसंहितं किं वेदार्थब्रह्मपर्युदासः उत संग्रह इति तत्राद्यो युक्त इत्याह केवलं हीति। तत्र हेतुमाह। श्रेयः
साधनं धर्मशब्दार्थः ब्रह्म च श्रेय इति न धर्मशब्दवाच्यत्वमित्यर्थः। न द्वितीय इत्याह॰ अन्यथेति॰ ब्रह्मण आपातप्र
सिद्धिरित्याशंक्याह॰ न ह्यनुष्ठेयेति॰ अनुभवविरोधादित्यर्थः। धर्मग्रहणसामर्थ्याद्विचारस्यैकदेशविषयत्वं पूर्वो
क्तं तथा चेत्यत्रापि तद्वोच्यत इति पौनरुक्त्यमित्याशंक्याह लक्षणेति। वेदार्थजिज्ञासोपक्रमे तस्यैव लक्षणं वक्त
व्यं नान्यस्येत्यर्थः। वेदार्थविषयमेव लक्षणाभिधानमिति शंकां निरस्यति। लक्षणं हीति। वेदार्थेऽपि विप्रतिपत्तेः
संभवात्तन्निराकरणार्थं लक्षणाभिधानं युक्तमिति शंकते। ननु वेदेति। अस्मिन्पक्षे सूत्रमननुगुणं स्यादित्या
ह। तत्राहेति। किं च किमर्थवादलक्षणमित्यत्र कार्यरूपे वेदार्थे विप्रतिपत्तिरभिसंहिता उत ब्रह्मरूपे अयवोभ ४२

यत्रूपे नाद्य इत्याह। मंत्रादिविति। नोत्तरो विधिमंत्राभ्यदेतद्प्रतिपत्तिरित्यभिसंधिः। धर्मशब्देन वेदार्थस्य विवक्षितत्व
विप्रतिपत्तिनिरासः संभवतीत्याशयेन शंकते। ननु धर्मेति। आत्रापानवबोधो नोत्तरमाह। अत एवाहेति। टीकापेक्षितं
हेतुमाह। वेदार्थेति। अप्रतिपन्नस्य वेदार्थविप्रतिपत्तिनिरासस्य ग्रहणास्वीकारः तस्यायोगादिति विग्रहः। पूर्ववादी
स्याशयमुद्घाटयति। अथ धर्मशब्देति। टीकायां लक्षणाशब्देन निरासाभावाभ्यां धर्मशब्दस्य वेदार्थप्रवृत्ति शंकां निर
स्यति। तत्र न तावदिति। विप्रतिपन्नप्रयोगत्वादित्यर्थः। लक्षणापक्षं दूषयति। नापीति। लक्षणाशब्देन किं जहल्ल
क्षणा विवक्षिता गंगाशब्दवत्। उताजहल्लक्षणा शोणशब्दवत्। नाद्य इत्याह। अभिधेयादिति। गंगापदलक्ष्यस्य
तीरस्य गंगात्वाभाववज्जहल्लक्षणया धर्मपदेन लक्ष्यमाणस्य वेदार्थस्य धर्मत्वं हीयेतेत्यर्थः। तस्मात्सक्षात्तत्पर

शिष्यत इत्यहि।दानीमिति।स्वार्थप्रक्षेपेणाजहल्लक्षणयेत्यर्थः। नन्वेति।इच्छादिशब्दविशेषपर्यायार्थविशेषे संकेतित
तद्धर्मशब्दोपि वेदार्थसंकेतित इत्यर्थः। तत्राद्यं दूषयति। तत्र न तावदिति। यत्तावदिति। यदि तावदित्यर्थः। अजहल्ल
क्षणया धर्मशब्दस्य वेदार्थप्रवृत्ते। तदिपक्षान सिद्धान्तीत्युक्तं तत्र हेतुमाह। चोदनालक्षणस्येति। चोदनाशब्दस्य
वेदैकदेशवाचित्वाद्धर्मशब्दस्य च साधनवाचित्वात्र वेदार्थे वृत्तासिद्धिरित्यर्थः। अथ पुनरित्यत्र कस्य वा नाभि
संविक्षितमिति। वीक्षायामभिप्रायमाह। चोदनेति। धर्मविचारोपक्रमविरुद्धं नाम संबंधप्रतिपादनमित्याह।
तदप्रक्रान्तमिति। अनुपक्रान्तत्वेप्यनन्यथासिद्धफलभावाच्चदभिधानं युज्यते न च तदस्तीत्याह। निष्प्रयोजन
मिति। एतावच्छास्त्रस्यापि प्रतिपादनेऽइदं प्रतिपाद्यं नेदमिति नियमो नास्त्यादि त्यत आह। अतिप्रसंग इति। धर्मशब्दस्य ८२

वेदार्थवाचकतायाविरस्तत्वाद्वेदार्थ एव चोद्यत इति कथमुक्तमित्याशंक्यांगीकारतादर्थ्यात्र विरोध इत्याहांगीकृत्येति।
धर्मशब्दस्य वेदार्थवाचकत्वं गीकृत्येवेत्तर्हि कथं विदितिमर्थमित्याशंक्य तात्पर्यमाह। यमा वद इति। श्येनादिया
वृत्त्यर्थमर्थपदमित्याशंक्य श्येनादीनां चोदनालक्षणं वेदार्थत्वं वास्तीउतनेति विकल्प्याद्यं दूषयति। श्येनादी
नामिति। द्वितीयं दूषयत्यचोदनेति। नाभ्यासिद्धोप्यर्थपर्यानुपपत्तेर्थशब्देनेत्याशंक्याह। लक्षणेति। द्वितीयं सूत्रं लक्ष
णपरमिति पक्षेऽर्थशब्दवैयर्थ्यमभिधाय प्रमाणपरत्वपक्षेपि तद्दर्शयति। प्रमाणेति। धर्मोपायो विचारप्रति।
ज्ञायां कथमशब्दोऽर्थवानित्याशंक्याह धर्मेति। एवं गुरुमते अर्थशब्दवैयर्थ्यमभिधाय दोषांतरं समुच्चिनोति।
तथेति। चोदनाशब्देन कृत्स्नवेदलक्षणापां कोहेतुरितिशंकते। कथमिति लक्ष्यलक्षणयोरैक्यमित्यस्यायमर्थः।

८४

धर्म्मशब्दाभिहितवेदार्थशब्दितचोदनालक्षणोर्थो। निर्द्दिश्यते चोदनालक्षण इत्यत्रापि स एव निर्द्दिश्यत इति लक्ष
णयोरैक्यं स्यादिति। आद्यमनुवदत्यलिवेरेदिति। विकल्पासहत्वान्नाद्यमपि साधुरित्याह। सापीति। अथ चोदना
भागप्रमेयस्य चोदनाप्रमेयत्वं व्याहन्येतेत्याहार्थवानिति। द्वितीयेपि व्याघात इत्याहार्थशून्य इत्यादिना। अर्थानर्थवि
दिति। सविषयनिर्विषयरूपवाक्यद्वयसमुदायरूपवेदार्थ इत्यर्थः। फलितं दर्शयति। तस्मादिति। शब्दद्वयेति। अर्थ
शब्दवैयर्थ्यं चोदनाशब्दस्य स्वार्थपरित्यागो वेति दूषणद्वयमित्यर्थः। वेदप्रामाण्यस्य मीमांसकैरभ्युपगमात् सि
द्धप्रामाण्यविचारः इतीष्टमित्याशंक्य तात्पर्यमाह। तथा सतीति। विचारादित्यर्थः। अनिश्चितत्वमसिद्धमिति शंकते
ननु प्रथमेति। किं वेदप्रामाण्यनिश्चयपूर्वकमर्थवत्त्वं निश्चितमुत नेति विकल्प्याद्ये दूषणमाह। नानिश्चितेति। ५५

आद्येपि किं विधिप्रयुक्तप्रामाण्यमात्रस्य निराकरणमुत सर्वप्रकारप्रामाण्यकोस्येति विकल्प्याद्यमंगीकरोति। न
ह्यत्रेति। द्वितीयं दूषयति नत्विति। विरुद्धार्थत्वादिरादिशब्दार्थः। सकलप्रकारप्रामाण्यनिराकरणस्य सूत्रेनुपलंभा
दित्यर्थः। अर्थात्प्रामाण्यं न तत्र निर्दिष्टमिति शंकते। अन्यथेति। प्रथमसूत्र एव प्रामाण्यसिद्धौ तत्प्रमाणं बादरायणस्ये
त्यादिना पुनः प्रामाण्यप्रतिपादनं मुधेत्याह। तत्राहेति। उक्तप्रपंचनरूपत्वान्नोत्तरग्रंथवैयर्थ्यमिति शंकते। ननु त
स्येति। कर्मवत्त्वे निश्चिते तद्दृढीकरणार्थमारंभः उतानिश्चित इति विकल्प्योभयमपि क्रमेण निरस्यति। नार्थवत्त्व इत्या
दिना। प्रथमसूत्रेणैव वेदप्रामाण्यासिद्धेर्नैव तावन्नोत्तरत्र तत्प्रतिपादनानुपपत्तिः धर्म्मवद्वेदप्रामाण्यस्यापि वे
दार्थत्वात्प्रतिपादनोपपत्तेरिति शंकते। ननु वेदेति। न वप्रामाण्यस्य वेदार्थत्वमसिद्धमिति शंक्यं। अध्ययनविधि

र्थध्ययनस्य फलस्य पर्यंतातार्थं वेदस्य फलवदर्थावबोधनसामर्थ्यं प्रतिपादयतीति न वेदप्रामाण्यस्यापि वेदार्थोपपत्ति
रित्यभिप्राय। प्रामाण्यस्य वेदार्थत्वमसिद्धमित्याह। न वेदेति। प्रथमसूत्र एव प्रामाण्यप्रतिपादनमित्येतदिति। प्र
तुयुक्तमित्याह। भाष्यकार इति। वेदार्थस्य चोदनाप्रमाणकत्वं न द्वितीयसूत्रार्थ इत्यत्रोपपत्त्यंतरं समुच्चिनोति। किं
चास्मिन्निति। अर्थवादाधिकरणमित्याम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यत इति सूत्रं
सर्वस्याम्नायस्य धर्मपरत्वेनार्थवत्त्वे वायुर्वै क्षेपिष्ठेत्यादीनामपि तथात्वं वक्तव्यं अन्यथानर्थक्यं स्यादित्येत
द्यत्र प्रतिपाद्यते न तल्लघु युज्यते। द्वितीयसूत्र एव धर्मे प्रामाण्यस्य निराकरणादित्यर्थः। सिद्धार्थबोधिनो मंत्रादेः
साक्षाद्धर्मे प्रामाण्यानुपपत्तेः गतिप्रदर्शनार्थमधिकरणारंभो युक्त इति शंकते। स्तावकत्वेनेति। प्रयोगवि २५

ध्यपेक्षितप्राशस्त्यानुष्ठानोपयुक्त इष्टदेवतादिस्मरणद्वारा विध्यर्थपर्यवसायित्वमित्यर्थः। तथापि पूर्वपक्षाभावान्नाधिका
रणारंभ इत्याह। नात्रेति। तस्मादगतार्थत्वाद्वेदांतमीमांसाशास्त्रमारंभणीयमिति सिद्धं तदेतदभिप्रेत्योक्तं वेदां
तमीमांसाशास्त्रस्य व्याचिख्यासितस्येति। इति श्रीमत्परमहंसपरिव्राजकाचार्य स्वयंप्रकाशानुभूतिपूज्यपादशिष्येण स्वरूपानं
दमुनिना विरचिते विवरणतत्त्वदीपने द्वितीयवर्णकं समाप्तमिति॥ ॥द्वितीयाध्यायसमाप्त॥ ॥संवत्॥
१८३० समयनाममाघसुदिपंचमीरोज अतबार

BHAU DA... MEMORIAL

श्रीकृष्णाय नमः फलसीद्ध्यवर्यान्तत्वामो धीकारीप्रसीध्यतीकीमुनस्यंथेनेनीवेन्नामुमुक्षत्वमात्रस्या
धीकारमितीत्तत्वासंभवाद्विशेषणांतरमेष्टव्यंतयावसाधनचतुष्टयवीसीष्टाधीकारीनीरूपणार्थंवर्णकांतरप्रार
मायुक्तः। व्यवहीताव्यवहीतहीनेवीषयफलसीध्युनरसंभये अधीकारीफलसादनैसुकरीमतीपौर्वायियेवेदांत
शास्त्रमारंभणीयमुतानारंभणीयमीतीवीसीष्टाधीकारीसंभवासंभवाभ्यासंदीहीतेनत्रवीसीष्टाधिका
रीणोप्रमाणाभावादीदंशास्त्रमनारंभणीयमीतीपूर्वःपक्षः परीक्ष्यलोकान्कर्मवीतान्ब्राणोनोदांनइत्यादीवाक्य
पर्यालोचनयासाधनचतुष्टयेवीसीष्टाधीकारीप्रतीपत्तेरारंभणीयमीतीसीद्धांतः। तत्रानंतर्यस्साधनमुखे
नाधीकारीसमर्पणाद्येयमथशब्दइतीप्रतीपादयन्नुमधीकाराद्यर्थत्वंतस्यप्रतीक्षेपभाष्यकृतदनुपपन्नत्व
कृस्यत्वाद्रूपानेकार्थत्वानुपपत्तीरेवीकाराद्यर्थत्वेकानवतारात्सूत्रस्यैतीतत्रभाष्येनव्याख्यानवासंगनमी

तत्व०३ सा शंक्यता सर्वमाह तत्रेत्यादी नातत्रेती पदमथशब्दे नेनानुषंजेते सुत्रस्वरूप दानाम ध्यइत्यर्थः इतरपर्युदासस्तो
१ नाप्रतीपाद्य त्वेपीसुखप्रतीप्रत्यये संदेशा तदशंपीसुमाकाक्षाम वताख्यतीकथमीतीइतरपर्युदासइतीशेषः
जीज्ञासा शब्दस्ययौगिकत्वमादाय धीकारा धर्थत्वमन्यत्रेउतत्रटिंतत्राचेद्वषशामाहाजी ज्ञासेती इच्छायाःआरंभो
नामकीर्तव्यत्तोतप्रतीपाद्य ता ताधः वीषयसंदर्यत्वम्पवादीत्यपा इत्याशयवाना हेच्छायाइतीनदृतीतीयोपीमाहअस धी
कारशमीती पुर्वपक्षसीद्धांतान्यामीछा प्रतीपादनस्यप्रथ धीकरशमीष्टेरीत्यर्थः।मंगलार्थत्वंदूषयतीअलंती।प्रसी
द्धत्वाअतदृक्व्यमीत्यर्थः हेत्वसीद्दिमतानेमताहा प्रसीद्धे त्वेपीती।नवार्थवादत्वमीष्टमीत्यपी शाक्यं।सुत्रस्य
न्यायप्रतीपादकत्वादीत्यर्थः प्रफलादयाऽरम्भपक्षा द्वार्थ इतीपुर्वपक्ष नीरस्पती इच्छायाइती।परीशेषादानंत राम०
र्यार्थमीती तीशाद्वार्थः अर्थसीद्धत्वा दानंतर्यम पोननीदेष्टव्यमीती शकतेननु इच्छायाइतीआ ननपोमासस्य १

प्रसीद्धी मंगी करोती सप्तमीती नयुशाखा वृथा नत्राहाहि तुफ लेती मुख्यं द्यानरायीति प्रयाद्यंत त्वहेतुफल
यो:अहेतुफलयोस्त्वानंत र्य मनुख्यं व्यभी चारा व्यवधेप्ये त्यर्थः तयापीतदमी पाधमुषेमाशंक्याहन तयेती
अथवा हेतुफलभावे नप्रसक्ताद्या तरनयशाद्वे नसनध्यतइतीशंकानी स्पप्रानं तपे तीयस्पा न तरपद्धवती
सनस्पहे तुशेतीहितु त्वसी ध्यर्थमा नंत र्य मा आयारोपीयंत नत्तदेवसम न्यतामीत्यर्थः।पुधाने कारणस्यापी
कार्यत्वीजान्नुमीतत्वा नाथशाद्वा पेक्षेतीशंकते ननुअतु कुतोअनुमेयत्व मंगीकरोतीसप्तमीतीत अर्थशाद्वे
षध्य ने प्राही खेतीशास्त्रि यवीशेषरा प्रतीपतीधीकस्मादीत्रीत तत्रा हा तमतीत मीरीतीयदीदं पुर्वप्रवत्तयु
क्तत्वकारशा तस्पशास्त्रियताना नापेतीःसदोग्यापवृतीतस्पात शास्त्र पर्युदस्तवशाकाया अपीसंभवा ते
तस्माछा स्त्रीया धीकारी वीशेष राासमप्यशास्त्रत्वमपशाद्वस्पेत्यर्थः।कीतछास्त्रीयवीशेषरामीती

तत्व०२ शंकायं नीराकुर्वन्नुत्तमननमपसंहरति नेती॰ अधिकारो वीशेषणमतीपत्ते: प्रवृत्त्युपयोगित्वं तच्छब्दार्थजी
२ ज्ञासाशब्देवीचारे रूढत्युक्तमप्यंत जीज्ञासा शब्दस्य तत्राव धवदपर्थप्रतिपत्तिसंभवे येनघाम्ग यशोनाक्रमधी
कारः पर्यंतशंकेनीशंकायामाह ननु तीज्ञासेतीटीकया अयमर्थः जीज्ञासा शब्दस्य कर्थं वीचारत्वं न लमी
मांसायां तथा शब्दप्रयुक्तत्वादीत्याह मीमांसेती प्रयोगमेव दर्शयती दमीती॥ क्रतु गुणाकर्मगति कर्त्यगोदेश्य
दीवीषयमीमांसार्थः। जीजवं संसारो तयानायक शब्दार्थः संख्यातू प्रयुक्त इतीअखंडशब्दमेवप्रयुक्त इत्यर्थः तथापी
कथवीचारार्थत्वमीत्यत आह संज्ञानेतीउक्तं यतीरेकमुखेनोपपा॰ दयन्नघोतीती ज्ञासा शब्दस्या वायवशा
क्तयार्थपरत्वे धर्मजीज्ञासीत्वमीत्यनुपपन्न जीज्ञासाशब्दे च्छाया नीर्दिष्टत्वात् इच्छा वीषयत्वेन धर्मस्य सत्त्वे राम०
तस्माद्धर्मज्ञात्वमीच्छेदीषामीयात्तस्मादीत्यर्थः। तत्रैव लींगातस्मात् तत्त्वेती जीज्ञासाशब्दस्य योगो २

क्तत्वे दृश्यमानफलवत्त्वीं हेतुस्तत्री दर्शा॰ नपेक्षणादीषयस्य च नीदीष्टत्वात्तत्पुरुषसमासस्यात् वीचारार्थत्वे तस्यप्र
योजनापेक्षायां चतुर्थीप्रयोजना नीर्देशान्नपेक्षणाद्वीषयस्य च नीर्दिष्टत्वात् षष्ठीसमासः स्यात् वीचारार्थत्वे त
स्य प्रयोजनापेक्षायां चतुर्थ्या प्रयोजननीर्देशो युक्त इत्यर्थः॥ उत्तर ॰ त्रवीचारस्यनीर्दिष्टत्वात्तदीनार्थजीज्ञासा
पदं तद्वीषयत्वे तथाख्येयमीत्याह तदनुसारेणेति आसमद्रुक्तानुसारेणाथर्थः समन्वायेः। क्रत्वर्थः क्रतुस्वरूपोप
कारी प्रोक्षणादिः। फलोपकारीप्रयाजादिः। फलोदेशेन क्रीयमाणः कर्मफलं च पुरुषस्येवेते पुरुषार्थशे
ष्ठार्थः॥ सत्यातस्यार्थं च वादीक्षणादी फलोपकारीप्रयाजादी; परखंडशब्दस्य वीचारलक्षणार्थत्वादीत्यर्थः। अ
तत्राशब्दार्थमाह शास्त्रे तीवीचारवन्न इत्यर्थः। वाक्यार्थमाह॰ तेनेती॰ कीमीमर्थयुक्तोक्रमात्राज्जिज्ञासा शब्द
स्य वीचार वाचीत्वे वीवक्षातंतु तनीपदादीसहरुतो क्तेरीतीवीकल्पद्वयहदीनी धायाहोक्त्यतइतीअथ

तत्व ३ ।नीरस्यती नायमीती केवलान्वमी मांसावेती केवल मीमांसा तस्याः पर्यायके वलशब्दो र्थमाहांपरीसंके ति।अ
३ वयवार्थेपादानेनापीप्रयोगोपपर्यःतरीहमीसि धीः।द्वीतीयंनीरस्यतीनापीनीपातो द्वष्ठेःप्राव आन्नयोगव
तीपरीग्रहस्तत्राहानवेमीनीसीद्दप्रयोगस्यावयवार्थेनार्थेवलोसमवाद्दिवारार्थत्वमीहास्यवानाहानतुन
चायमीती।असीद्दोहेतुरीत्याहातस्यती।परीहारप्रकरणमाहाहद्दती।न्यायस्यवीषयमेद दर्शद्दतुशब्दवती
मेदानाहावलारद्दती।रूढियोगगोरागपक्षरा।।नुपाद्दपथेः।क्रमेरातानेवाहातत्रेपादीन।अखंडाभी
धानस्यामी धेयेनसंबधोनुपरीसुके मकेतीकशब्देघनस्याप्तिः तद्दथेमभीधाना मी धेयथतीरीकि मीनी
मकीनीकशब्देसुसंकेतापेक्षातीयावन्योगा।कशब्दव्याद्दनार्थमखंडेतीवीशेषण।।कथनलतीपतीरीप्रा राम०
काक्षायमुकंवद्दुयवहारप्रयोगसामर्थ्यादीनी।अत्रगो घटद्दप्पा घ घदाहरणावीसीष्टार्थमीधा ३

नयोगद्दत्युक्तेवनसेनादिषतीप्रसंगःतदर्थस्वावयवेतीवाक्यास्यावयवनुयदगदनशक्तिद्वोरेणावी
र्थो सीष्टाभीधाद्दत्वं यावत्तद्दतुमेकपघमीती विशेषण।तत्रहेतुमाह समादिन नीरुज्यपअदिद्दवार्थः।पावकलाव
कादीशब्दा।अत्रोदाहरणांगोण।।लक्षणाभ्यारूढियोगयोश्चावलस्य घोतपीतुमाहे तदीती।अर्थोनरेवानिगो
द्दत्युत्रोपेतःऊनश्चीदर्थांनित्रमानस्यगोशब्दस्यापीगोस्यातस्याजं० तदथेस्वाम्मीषेथादीनी० एनावभ्रूके
सोमशब्दःशितासौवत्रे मानउपासहीतेपीशंकरवनेद्दत्तनीव्याप्तिःतदथेनक्षणायेतीनचलनणागोण
साक्यमीभीधेयानीनाभुतेवती लक्षणा।।तऊनगुणयुके वतीगोगिद्दतीवीभागासमवादीपर्मः।फति
नद्दोयती।नवेती।एकस्यशब्दस्यार्थानेत्रव्याप्ररतत्र स्यार्थातखेयोगवत्या प्रयोगेकीरूघावलवनना
र्थोशाद्दउत्तयागावत्नवेननतीवीशायेनद्दा र्थोग्रासतस्याअवीलवीतप्रतीपत्रीकला।नण त्रवत्तोटिया
गमपहरती नीन्यायावरसद्दत्यर्थः यत्रतुमुख्यामुख्यग्रहण।शंकातत्रमुख्यस्यग्रहणामीतरस्यपरी

तत्व ३ शागइत्याहत्राटिती। नूटिश्चयोगश्चेमुढियोगौतवीवमुख्य इमी नयोः संभवइती वीग्रहः। कथंततीजासा
५ न्यद्धा नवीवारपारी सागेने छाप्तनीपात्रिः तत्राहात त्रैकस्मीत्रि नुधै त्रेहेतुमहरुस सामर्थ्येनेनी अवयव
स्पन्त्य त्यर्थः अखंडन्राक्य (वीनानुपपत्स्यमानकार्याभावान्न नत्कल्पनेतथानक त्पापांरूढयोगान्नुप्रा
पत्नेनावकल्प्यनतइत्यर्थः। पंकजशब्दादीषुयोगसंभवे पीयथावत्पानरमात्रि त्वं त दत्रदयोगसंभवेपी
नूणीक त्पनस्यादीतीशाकत्तोननुपंकजेनी अप्रसीद्धुत्वानसकल्पनागौरवप्रसंगएवनवत्न्यंतरकल्प
नमीप्तत्रा हा त्रा कीदृयमीत्तीपुवत्रैकस्यरूढस्यद्वाम्पां शक्तिभ्यांमितिसम्मीत्रर्थेवति रूक्ता अत्रन्वयव
मवशाक्य नेकार्थत्वंअखंडशाक्यानामसार्थत्वमी तीवीभाग दृष्टांतोसप्तनी पत्रइप्पाहानत्रापीती
दृष्टांतसमर्थयतेनमुपालेनीपकनशब्दोयोगरत्र्यानामसंबोधयतीचेत् नहियोगरत्रयुपत्लादीष्
वीशेषानूपंकजशीदानूनत्प्रतीपात्रिरपीस्यात्तन्नचतथा प्रतीपद्यतेतस्मान्नामरसेमत्न्नतरत्न्यतर राम
५

वाश्रयणिस्पमी स्पर्थो कल्पनागौरवप्रसंगानत्रवहंतरा था श्रयाणियंनच नामरसे मत्र्यंते रत्न्यंतरंवा
